ॐ

नमो वीतरागाय

पंडित प्रवर आशाधर विरचितः

धर्मामृतस्य उत्तरभागः

सागारधर्मः

प्रकाशकः—

जैन साहित्य प्रसारक कार्यालयस्य

सत्त्वाधिकारी

बिहारीलाल कठनेरा जैनः ।

प्रथमावृत्तिः—— १००० प्रति ।

आषाढ, वीर नि० सं० २४५४

जून, सन् १९२८ ई०

मूल्यं सार्द्धैकरूप्यकम् ।

प्रकाशकः—

बिहारीलाल कठनेरा जैन,
मालिक,
जैनसाहित्य प्रसारक कार्यालय,
हीराबाग, गिरगांव बम्बई ।

मुद्रकः—

वंशीधर उदयराज पंडित,
मालिकः—श्रीधर प्रेस, भवानीपेठ,
सोलापुर.

आभार--प्रदर्शन ।

श्री माणिकचन्द दिगम्बर जैन ग्रंथमाला द्वारा—प्रकाशित संस्करण परसे हमने इसे प्रकाशित किया है । अतः हम ग्रंथमालाके आभारी हैं । औ श्रीमान पंडित बंशीधरजी जैन शास्त्री, मालिक श्रीधर प्रेस, सोलापुर ने इसका प्रूफ संशोधन करनेका कष्ट उठाया है । इसलिये आपको धन्यवाद है ।

—प्रकाशक ।

पाठ्य ग्रथ ।

जैन सिद्धांत ।

गोमट्टसार–जीवकांड–सार्थ २॥)
गोमट्टसार–कर्मकांड–सार्थ २॥)
जैन सिद्धांत प्रवेशिका ।=)
तत्वार्थराजवार्तिकालंकार–सटीक ४)
तत्वार्थश्लोकवार्तिकालंकार-सटीक ४)
तत्वार्थसूत्र (मोक्षशास्त्र)-सार्थ ।।।)
द्रव्यसंग्रह-सान्वयार्थ ।)विस्तृतअर्थ ।।।)
बृहद्द्रव्यसंग्रह-सटीक, सभाष्य २)
पंचाध्यायी-मूल ॥) विस्तृत भाष्य ५॥)
पुरुषार्थसिद्ध्युपाय सान्वयार्थ १)
पुरुषार्थसिद्ध्युपाय-विस्तृतभाष्य ५॥)
रत्नकरंडश्रावकाचार-सटीक २)
रत्नकरंड श्रावकाचार-सान्वयार्थ ।-)
सर्वार्थसिद्धि–मूल २)
सर्वार्थसिद्धि-सार्थ प्र. खंड ६)
द्वि. खंड ८)
समयप्राभृत दो सं. टीका सह ३॥)
त्रिलोकसार स. १॥), भाषाटीका ५॥)
सागारधर्मामृत–सटीक १॥)

न्याय ।

अष्टसहस्री ३)
आप्तपरीक्षा-मूल -) सार्थ ।-)
आप्तमीमांसा-मूल -) भाषा ॥-)
आप्तमीमांसा-प्रमाण परीक्षा सटीक १)
तर्क संग्रह ।=)
द्रव्यानुयोग तर्कणा २)
परीक्षामुख सार्थ ।=), ॥)
प्रमेयरत्नमाला–संस्कृत ।।।), भाषा १)
प्रमेयकमल मार्तंड ४)
सप्तभंगीतरंगिणी–सार्थ १)

व्याकरण ।

कातंत्र पंचसंधि–सार्थ ।)
कातंत्र रूपमाला संपूर्ण १॥)
,, ,, पूर्वार्ध ।।।), उत्तरार्ध ॥=)
जैनेन्द्र प्रक्रिया-पं. वंशीधरजी २)

जैनेन्द्र लघुवृत्ति—पं. राजकुमार १)
जैनेन्द्र पंचाध्यायी-मूल सूत्रपाठ: ।)
धातुरूपावली ≡)
बालबोध व्याकरण-सार्थ-पूर्वार्ध ।।।)
बालबोध व्याकरण—उत्तरार्ध ।=)
मध्यसिद्धांत कौमुदी—वरदराज १।)
लघुसिद्धांत कौमुदी ,, ।।)
शब्दरूपावलि =)
शब्दार्णवचन्द्रिका ३)
समासचक्र -)।।
सारस्वत-मूल-पूर्वा. ।≡) सजि. ।।-)
सारस्वत चन्द्रकीर्ति टी.पू.१।।।)उ.१।।)
सारस्वत-तीनों वृत्ति १=) सजि. १।)
सारस्वत चंद्रकीर्ति टीका तीनों. ३)
सिद्धांत कौमुदी-भट्टोजीदीक्षित ३)
सिद्धांत कौमुदी तत्वबोधनीटीका ६)
संस्कृत प्रवेशिनी द्वि. भाग १)

कोष ।

अमरकोष—मूल ।।), शब्दकोषसहित ।।।=)
अमरकोष—सटीक १=), सार्थ ३)
धनंजय नाममाला—सार्थ ।।=)
पद्मचंद्रकोष— ७)
बृहद्जैन शब्दार्णव—प्र. खंड-३।)
विश्वलोचनकोष— १।≡)

काव्य चम्पू और अलंकार।

अलंकारचिंतामणि— ।।।)
काव्यानुशासन—हेमचंद्र २।)
काव्यानुशासन-सटीक-वाग्भट्ट ।≡)
गद्यचिंतामणि २)
चन्द्रप्रभ चरित-मूल १) भाषा १।)
जयकुमार-सुलोचना ।=)
जयन्त विजय १)
तिलकमंजरी २।)
धर्मशर्माभ्युदय १)
प्रभावक चरित १।।)
पार्श्वाभ्युदय ।।।)
पुरुदेवचम्पू ।।।)
यशस्तिलक चम्पू-पू. ३।।।) उ. २।।।)
वाग्भटालंकार-सटीक ।।) सार्थ १।।।)
हितोपदेश-मूल ।।।) सार्थ १।।।),२)
क्षत्रचूडामणि सार्थ १।।।) सजि. २)
क्षत्रचूडामणि जीवंधर चम्पू संयुक्त २)
हीरसौभाग्य ५।।)

सब जगहके छपे सब प्रकारके जैन ग्रंथोंके मिलनेका पता:—

बिहारीलाल कठनेरा जैन,
मालिक—जैन साहित्य प्रसारक कार्यालय,
हीराबाग, पोष्ट गिरगांव, बंबई।

नमो वीतरागाय ।

धर्मामृतस्थ उत्तरभागः सटीकः

सागारधर्मः

श्रीवर्धमानमानम्य मन्दबुद्धिप्रबुद्धये ।
धर्मामृतोक्तसागर-धर्मटीकां करोम्यहम् ॥ १ ॥
समर्थनादि यन्नात्र ब्रुवे व्यासभयात्क्वचित् ।
तज्ज्ञानदीपिकाख्यैत-त्पञ्जिकायां विलोक्यताम् ॥ २ ॥

अथ चतुर्थाध्याये—

सुदृग्बोधो गलद्वृत्त-मोहो विषयनिःस्पृहः ।
हिंसादेर्विरतः कार्त्स्न्याद्यतिः स्याच्छ्रावकोंऽशतः ॥

इत्युक्तम् । अतो मध्यमङ्गलविधानपूर्वकं विनेयान्प्रति सागारधर्मामृतं प्रतिपाद्यतया प्रतिजानीते—

अथ नत्वाऽर्हतोऽक्षूण-चरणान् श्रमणानपि ।
तद्धर्मरागिणां धर्मः सागाराणां प्रणेष्यते ॥ १ ॥

टीका—प्रणेष्यते प्रतिपादयिष्यतेऽस्माभिः । कः, उक्तकर्मतापन्नः धर्मः एकदेशविरतिलक्षणं चारित्रम् । केषां, सागाराणां वक्ष्यमाणलक्षणानां गृहस्थानाम् । किंविशिष्टानां, तद्धर्मरागिणां तेषां श्रमणानां धर्मे सर्वविरति-रूपे चारित्रे रागिणां संहननादिदोषादकुर्वतामपि प्रीतिमताम्, यतिधर्मानु-रागरहितानामगारिणां देशविरतेरप्यसम्यग्रूपत्वात् । सर्वविरतिलालसः खलु देशविरतिपरिणामः । किं कृत्वा प्रणेष्यते, नत्वा शिरःप्रव्हीकरणादिना विशुद्धमनोनियोगेन च पूजयित्वा । कान्, अर्हतस्तीर्थकरपरमदेवान् । किंवि-शिष्टान्, अक्षूणचरणान् अक्षूणं सम्पूर्णं सकलमोहप्रक्षयादाविर्भूतत्वेन नित्यं निर्मलं चरणं यथाख्यातचारित्रं येषां ते अक्षूणचरणास्तान् । न केवलमर्हतो

नत्वा श्रमणानपि नमस्कृत्य ; श्राम्यन्ति बाह्यमाभ्यन्तरं च तपश्चरन्तीति श्रमणा आचार्योपाध्यायसाधवस्तान् । किंविशिष्टान्, अक्षूणचरणान् अक्षूणं भावनाविशेषबलादनतिचारं चारित्रं क्षायोपशमिकसंयमपरिणामो येषां ते तान् । कथं अथ, अथेति शब्दो मङ्गलार्थः अधिकारार्थो वा । इतः सागारधर्मोऽधिक्रियते इत्यर्थः ॥ १ ॥

किंलक्षणाः सागारा इत्याह——

अनाद्यविद्यादोषोत्थ-चतुःसञ्ज्ञाज्वरातुराः ।
शश्वत्स्वज्ञानविमुखाः सागारा विषयोन्मुखाः ॥ २ ॥

टीका—अत्र भवन्तीति क्रियाध्याहारः । भवन्ति । के, सागाराः अगारं गृहं सकलपरिग्रहोपलक्षणं सह अगारेण वर्तन्ते इति सागाराः । एतदेव अनाद्यविद्येत्यादिविशेषणत्रयेण स्फुटयति—किंविशिष्टाः सागारा भवन्ति, शश्वत्स्वज्ञानविमुखाः शश्वदनवरतं स्वज्ञाने

"एगो मे सासदो आदा णाणदंसणलक्खणो ।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा"

इत्यादिपरमागमप्ररूपिते स्वात्मावबोधे विमुखाः पराङ्मुखाः, तत्र मुख्यतयाऽनुपयुक्ता इत्यर्थः । पुनः किंविशिष्टाः, विषयोन्मुखाः विषयेष्विष्टेषु स्रक्कामिन्यादिष्वनिष्टेषु च दुर्भोजनदुर्व्यसनादिषु उन्मुखाः रागात् द्वेषाच्च व्यापृताः उद्युक्ताः । कुत एतदिति हेतुं प्रथमान्तत्वेन निर्दिशति । पुनः किंविशिष्टाः, अनाद्यविद्यादोषोत्थचतुःसञ्ज्ञाज्वरातुराः अविद्या अनित्याशुचिदुःखानात्मसु विपरीतख्यातिः, यस्मात्पूर्वं नास्ति स आदिः, नास्त्यादिर्यस्याः साऽनादिः, अनादिश्चासौ अविद्या च अनाद्यविद्या, सैव दोषो वातपित्तकफानां वैषम्यम्, उत्थानमुत्था उद्भूतिः, अनाद्यविद्यादोषादुत्था येषां ते अनाद्यविद्यादोषोत्थाः, सञ्ज्ञाः आहाराद्यभिलाषानुभवनसंस्काररूपाश्चतस्रः, तथा ज्वराः प्राकृतो वैकृतश्चेति द्वौ प्रत्येकं साध्योऽसाध्यश्चेति चत्वारः, सञ्ज्ञा एव ज्वरा मोहसन्तापरूपत्वात् सञ्ज्ञाज्वराः, चत्वारश्च ते सञ्ज्ञाज्वराश्च चतुःसञ्ज्ञाज्वराः, अनाद्यविद्यादोषोत्थाश्च ते चतुस्सञ्ज्ञाज्वराश्च अनाद्यविद्यादोषोत्थचतुः-

सञ्ज्ञाज्वराः तैरातुराः कदर्थिताः । यत एवम्भूतास्ततः शश्वत्स्वज्ञानविमुखाः । अत एव च नित्यं विषयोन्मुखाः स्वपरप्रकाशात्मकत्वादात्मनो विमुखाः॥२॥

भङ्ग्यन्तरेण तानेवाह—

अनाद्यविद्यानुस्यूतां ग्रन्थसञ्ज्ञामपासितुम् ।
अपारयन्तः सागाराः प्रायो विषयमूर्च्छिताः ॥ ३ ॥

टीका—अत्रापि भवन्तीति क्रियाध्याहारः । एवमश्रूयमाणं क्रियापदं पुरस्तादप्यध्याहार्यम् । भवन्ति । के ते, सागाराः । किंविशिष्टाः विषयमूर्छिताः कामिन्यादिविषयेषु ममेदं भोग्यमहमस्य स्वामीत्येवं ममकाराहङ्कारविकल्पपरतन्त्रतयाऽध्यवसिताः । कथं प्रायो, बाहुल्येन सुदृष्टयोऽपि चारित्रावरणकर्मोदयवशादेवं पर्यवसन्नाः सम्यग्दृष्टयः । ये तु केचिज्जन्मान्तराभ्यस्तरत्नत्रयानुभावात्साम्राज्यादिश्रियमप्यनुभवन्तोऽसतीनांथोपभोगन्यायेन तत्त्वज्ञानदेशसंयमप्रणिधानपरत्वेन भुञ्जाना अप्यभुञ्जानवदवभासन्ते तद्व्यभिचारप्रदर्शनार्थं प्राय इत्युच्यते । किं कुर्वन्तस्ते तथा भवन्तीत्याह—अपारयन्तः अशक्नुवन्तः । किं कर्तुं, अपासितुं निराकर्तुं । कां, ग्रन्थसञ्ज्ञां ग्रन्थे परिग्रहे सञ्ज्ञा ममेदमिति मूर्छापरिणामस्तां । किंविशिष्टां, अनाद्यविद्ययाऽनुस्यूतां बीजाङ्कुरन्यायेन सन्तत्या प्रवर्तमाना ताम् ॥ ३ ॥

एवं सागारान् लक्षयित्वा तद्भावाभावनिदानयोरविद्याविद्ययोर्बीजोपदेशार्थमिदमाह—

नरत्वेऽपि पशूयन्ते मिथ्यात्वग्रस्तचेतसः ।
पशुत्वेऽपि नरायन्ते सम्यक्त्वव्यक्तचेतनाः ॥ ४ ॥

टीका—पशूयन्ते हिताहितविवेकविकलतया पशव इवाचरन्ति । के ते, मिथ्यात्वग्रस्तचेतसः मिथ्यात्वेन विपरीताभिनिवेशेन ग्रस्तमाविष्टं चेतो

---

१ धात्रीबालासतीनाथ—पद्मिनीदलवारिवत् ।
दग्धरज्जुवदाभाति भुञ्जानोऽपि न पापभाक् ॥

२ वपुर्गृहं धनं दाराः पुत्रमित्राणि शत्रवः ।
सर्वथान्यस्वभावानि मूढः स्वानि प्रपद्यते ॥

मनो येषां ते । क्व सति, नरत्वेऽपि, नरा हि प्रायो विचारचतुरचेतसः किल प्रसिद्धास्तद्भवेऽपि सति किं पुनस्तिर्यगादिभवे इत्यपिशब्दार्थः । एवमविद्यामूलकारणं मिथ्यादर्शनं विभाव्य विद्यामूलकारणं सम्यग्दर्शनं भावयितुमाह—पशुत्वेऽपीत्यादि, नरायन्ते हिताहितविचारचतुरतया नरा इवाचरन्ति । के ते, सम्यक्त्वव्यक्तचेतनाः सम्यक्त्वेन तत्वार्थश्रद्धानलक्षणेन सम्यग्दर्शनपरिणामेन व्यक्ता प्रशमसंवेगानुकम्पास्तिक्यानुभावैः प्रतीतियोग्या कृता चेतना चैतन्यसम्पद् येषां ते । क्व सति, पशुत्वेऽपि, पशवस्तिर्यञ्चस्ते चात्र सञ्ज्ञिन एव । जात्या तिर्यग्भावेऽपि सति सम्यक्त्वमाहात्म्याद्धेयोपादेयतत्त्वज्ञाः पशवोऽपि भवन्ति किं पुनर्मनुष्यादय इत्यपिशब्दार्थः ॥ ४ ॥

एवं सामान्यतो मिथ्यात्वानुभावं प्रदर्श्येदानीं तस्य त्रिविधस्याप्यनुभावमुपमानैरनुभावयितुमाह—

केषाञ्चिदन्धतमसा-यतेऽगृहीतं ग्रहायतेऽन्येषाम् ।
मिथ्यात्वमिह गृहीतं शल्यति सांशयिकमपरेषाम् ॥ ५ ॥

टीका—अन्धतमसायते घोराज्ञानविवर्तहेतुतया निबिडांधकारवदाचरति । किं तत्, मिथ्यात्वं । किंविशिष्टमगृहीतं परोपदेशमन्तरेण प्रवृत्तत्वादनुपात्तं अनादिसन्तत्या प्रवर्तमानस्तत्त्वारुचिरूपश्चित्परिणाम इत्यर्थः । केषां तत्तथा स्यादित्याह—केषाञ्चित् एकेन्द्रियादिसञ्ज्ञिपञ्चेन्द्रियपर्यन्तानां । क्व, इह संसारे । तथा ग्रहायते विविधाकारकारितया ग्रहवदाचरति भूतावेशवद्विवर्तत

१ रागादिषु च दोषेषु चित्तवृत्तिनिबर्हणम् ।
तं प्राहुः प्रशमं प्राज्ञाः समन्ताद्व्रतभूषणम् ॥
२ शारीरमानसागन्तु-वेदनाप्रभवाद्भवात् ।
स्वप्नेंद्रजालसंकल्पा-द्भीतिः संवेग उच्यते ॥
३ सत्वे सर्वत्र चित्तस्य दयार्द्रत्वं दयालवः ।
धर्मस्य परमं मूल—मनुकम्पां प्रचक्षते ॥
४ आप्ते श्रुते व्रते तत्त्वे चित्तमास्तिक्यसंयुतम् ।
आस्तिक्यमास्तिकैरुक्तं युक्तं युक्तिधरेण वा ॥

इत्यर्थः । किं तत्, मिथ्यात्वं । किंविशिष्टं, गृहीतं परोपदेशादुपात्तमतत्त्वाभिनिवेशलक्षणं चिह्नीकृतं । केषां, अन्येषां सञ्ज्ञिपञ्चेन्द्रियाणां । तथा शल्यति चहुदुःखहेतुत्वाच्छरीरान्तःप्रविष्टकाण्डादिवदाचरति । किं सत्, मिथ्यात्वं । किमाख्यं, सांशयिकं मिथ्यात्वकर्मोदये सति ज्ञानावरणोदयविशेषवशात् किमिदं जीवादि वस्तु यथा जैनैरनेकान्तात्मकमुच्यते तथा स्यादुतस्विदन्यथेति चलिता प्रतीतिः संशयः, संशये भवं सांशयिकं क्वचिदप्राप्तनिश्चयमात्मस्वरूपं । केषां तत्तथा स्यादित्याह—परेषाम् इन्द्राचार्यादीनाम् ॥ ५ ॥

नन्वविद्यामूलमिथ्यात्वनिर्मथनसमर्थस्य सम्यक्त्वपरिणामस्य कतमा प्रादुर्भावनसामग्रीत्यनुयोगे सतीदमुच्यते——

आसन्नभव्यताकर्म—हानिसञ्ज्ञित्वशुद्धिभाक् ।
देशनाद्यस्तमिथ्यात्वो जीवः सम्यक्त्वमश्नुते ॥ ६ ॥

टीका—अश्नुते प्राप्नोति । कोऽसौ, जीव आत्मा । किं तत्, सम्यक्त्वं तत्त्वार्थश्रद्धानं । किंविशिष्टः सन्, आसन्नभव्यताकर्महानिसञ्ज्ञित्वशुद्धिभाक्, भव्यो रत्नत्रयाविर्भावयोग्यो जीवः, आसन्नः कतिपयभवप्राप्यनिर्वाणपदः, आसन्नश्चासौ भव्यश्चासन्नभव्यस्तस्य भाव आसन्नभव्यता, कर्महानिर्मिथ्यात्वादीनां सम्यक्त्वप्रतिबन्धककर्मणां यथासम्भवमुपशमः क्षयोपशमः क्षयो वा, सञ्ज्ञा शिक्षाक्रियालापोपदेशग्राहित्वं सञ्ज्ञाऽस्यास्तीति सञ्ज्ञी सञ्ज्ञिनो भावः सञ्ज्ञित्वं,

मनोऽवष्टम्भतः शिक्षा—क्रियालापोपदेशवित् ।
येषां ते सञ्ज्ञिनो मर्त्या वृषकीरगजादयः ॥ इति ।

शुद्धिर्विशुद्धपरिणामः, आसन्नभव्यता च कर्महानिश्च सञ्ज्ञित्वं च शुद्धिश्चेतीतरेतरयोगे द्वन्द्वे सति ताश्चतस्रो भजते सेवते ततो नापैतीति तद्भागन्तरङ्गसम्यग्दर्शनादिभावकारणसम्पन्न इत्यर्थः । पुनः किंविशिष्टः, देशनाद्यस्तमिथ्यात्वः देशना सम्यग्गुरूपदेशः सा आदिर्यस्य जातिस्मरणजिनप्रतिमादर्शनादेर्बहिरङ्गकारणकलापस्य स देशनादिः तेन अस्तं निराकृतमुपशमाद्यवस्थां नीतं मिथ्यात्वं दर्शनमोहाख्यं कर्म तद्धेतुको वा सर्वथैकान्ताभिनिवेशो यस्य स तथोक्तः॥६॥

साम्प्रतं योऽयं सम्यक्त्वसामग्र्यां सत्यां सम्यग्गुरूपदेशोऽवश्यंमृग्यस्तस्ये-दानीमत्र समुपदेष्टृणां प्रविरलत्वानुशोचनद्वारेण दुर्लभत्वं लक्षयति—

कलिप्रावृषि मिथ्यादि-मेघच्छन्नासु दिक्ष्विह ।
खद्योतवत्सुदेष्टारो हि द्योतन्ते क्वचित्क्वचित् ॥ ७ ॥

टीका—द्योतन्ते प्रकाशन्ते आत्मानं दर्शयन्ति दृश्यन्ते इत्यर्थः । के ते, सुदेष्टारः सु शोभनं निर्बाधं सम्पूर्णं वा जीवादितत्वं दिशंत्युपदिशन्तीति सुदेष्टारः सम्यग्गुरवः । क्वचित्क्वचित्, क्वापि न सर्वत्र । कस्मिन् इह भरत-क्षेत्रे । किंवत्, खद्योतवत् ज्योतिरिङ्गणा यथा । कासु सतीषु, दिक्षु सदुपदेशेषु ककुप्सु च । किंविशिष्टासु, मिथ्या सर्वथैकान्तविषयत्वादसत्या दिशो बौद्धादिवाद्युपदेशास्त एव मेघा दिशामिवानेकान्तोपदेशनाबारकत्वात् तैश्च्छन्नासु छादितासु प्रतीत्यविषयीकृतासु । कदा, कलिप्रावृषि कलिः दु-ष्षमाख्यः पञ्चमकालः स एव प्रावृड् वर्षाकालस्तत्र । अयमर्थः—यदा वर्षाकाले मेघाच्छदितासु दिक्षु सूर्यादिप्रकाशाभावे क्वचित्क्वचित्प्रदेशे खद्योता द्योतन्ते तथेह दुष्षमायां क्वचित्क्वचिदार्यदेशे सदुपदेष्टारः प्रकाशन्ते न पुनः कृतयु-गादिवद्यत्रतत्र श्रुतकेवलिनः केवलिनो वा दृश्यन्ते इति । हि शब्देन कष्टार्थे भान्तस्तापमभिव्यनक्ति ।

इह दुष्षमासमयसामर्थ्याद्दे शिकवद्देश्यानामपि दर्शनमोहोदयाक्रान्तचित्त तया देशनानर्हत्वात्प्रायो भद्रका अपि पुरुषा देशनायां भूयासुरित्याशास्ते—

नाथामहेऽद्य भद्राणा-मप्यत्र किमु सद्दृशाम् ।
हेम्न्यलभ्ये हि हेमाश्म-लाभाय स्पृहयेन्न कः ॥ ८ ॥

टीका——नाथामहे भद्रका अपि जीवा देशनार्हा भूयासुरित्याशास्महे । के, वयं । केषां, भद्राणामपि । किमु, किं पुनः । सद्दृशां सम्यग्दृष्टीनां विशेषतो

१ विद्वन्मन्यतथा सदस्यतितरामुद्दण्डवाग्डम्बराः
शृंगारादिरसैः प्रमोदजनकं व्याख्यानमातन्वते ।
ये ते च प्रतिसद्म सन्ति बहवो व्यामोहविस्तारिणो
येभ्यस्तत्परमात्मतत्वविषयं ज्ञानं तु ते दुर्लभाः ॥

नाथामह इत्यर्थः । क्व, अत्र क्षेत्रे । कदा, अद्य अस्मिन्काले । अमुमेवार्थमुत्तरार्द्धेन समर्थयते । हि यस्मादर्थे । को न स्पृहयेत् नाभिलषेत् । कस्मै, हेमाश्मलाभाय सुवर्णोपलप्राप्त्यर्थं । क्व सति, हेम्नि सुवर्णे । किंविशिष्टे, अलभ्ये लब्धुमशक्ये ॥ २ ॥

भद्रकस्य लक्षणमुक्त्वा तस्यैव द्रव्यतया देशनार्हत्वमाह—

कुधर्मस्थोऽपि सद्धर्मं लघुकर्मतयाऽद्विषन् ।
भद्रः स देश्यो द्रव्यत्वा-न्नाभद्रस्तद्विपर्ययात् ॥ ९ ॥

टीका—भण्यते । कोऽसौ, भद्रः । किं कुर्वन्, अद्विषन् द्वेषविषयमकुर्वन् । कं, सद्धर्मं सन् समीचीनः प्रमाणोपपन्नो धर्मोऽभ्युदयनिःश्रेयसोपायस्तम् । कया, लघुकर्मतया लघु अल्पं कर्म सद्धर्मद्वेषनिमित्तं मिथ्यात्वं यस्य सोयं लघुकर्मा तस्य भावस्तत्ता तया लघुकर्मतया । किंविशिष्टोऽपि, कुधर्मस्थे प्रमाणबाधिते धर्मे आसक्तः; न केवलमुभयोर्मध्यस्थ इत्यपिशब्दार्थः । किं पुनरसावित्याह-देश्यः, धर्मे व्युत्पादनीयः । कोऽसौ, स भद्रः । कस्मात्, द्रव्यत्वात् अगामिसम्यक्त्वगुणयोग्यत्वात् । न पुनर्देश्यः । कोऽसौ अभद्रः कुधर्मस्थः सद्धर्मं गुरुकर्मतया द्विषन् । कस्मात्, आगामिसम्यक्त्वगुणयोग्यत्वाभावात् ।

इदानीमाप्तोपदेशसम्पादितशुश्रूषादिगुणः सम्यक्त्वहीनोऽपि तद्वानिव सद्भूतव्यवहारभाजां प्रतिभासते इति निदर्शनेन प्रव्यक्तीकरोति—

शलाकयेवाप्तगिराऽऽप्तसूत्रप्रवेशमार्गो मणिवच्च यः स्यात् ।
हीनोऽपि रुच्या रुचिमत्सु तद्वद् भूयादसौ सांव्यवहारिकाणाम् ॥१०॥

टीका—यः पुरुषः स्यात् भवेत् । किंविशिष्टः, आप्तसूत्रप्रवेशमार्ग एव । चशब्दस्यात्रावधारणार्थस्य योजनात् । सूत्रं परमागमः, प्रवेशमार्गः शुश्रूषादिगुणः, सूत्रस्य प्रवेशमार्गोऽन्तस्तत्त्वपरिच्छेदनोपायः सूत्रप्रवेशमार्गः, आप्तः प्राप्तः सूत्रप्रवेशमार्गो येन स तथोक्तः । कया, आप्तगिरा सद्गुरुवाचा । कयेव, शलाकयेव छिद्रकरवज्रसूचिकया यथा । किंवत्, मणिवत् यथा मणिः शलाकया आप्तप्रवेशमार्गः स्यात्, आप्तः प्राप्तः सूत्रस्य तन्तोःप्रवेशमार्गः छिद्रं येन स तथोक्तः असौ भूयात् प्रतिभासेत । किंवत्, तद्वत् रुचिमानिव । केषां सांव्य

वहारिकाणां सुनयप्रयोक्तृणाम् । केषु मध्ये, रुचिमत्सु सुदृष्टिषु दीप्तिमन्मणिषु च मध्ये । किंविशिष्टोऽपि हीनोऽपि रिक्तोऽल्पो वा । कया, रुच्या शुध्द्या दीप्त्या किं पुना रुचिसम्पन्न इत्यपिशब्दार्थः । एतेनाव्युत्पन्नसम्यक्त्वानां सुदृष्टिषु मध्ये गणनीयतोपदिष्टा । सुदृष्टिवत्तेऽपि सतां मान्या भवन्तीति भावः ।

एवं देश्यदेशकौ व्यवस्थाप्य सागरधर्मांचारिणमगारिणं लक्षयितुमाह—

न्यायोपात्तधनो यजन् गुणगुरून् सद्गीस्त्रिवर्गं भज—
न्नन्योन्यानुगुणं तदर्हगृहिणीस्थानालयो ह्रीमयः ।
युक्ताहारविहार आर्यसमितिः प्राज्ञः कृतज्ञो वशी
शृण्वन् धर्मविधिं दयालुरघभीः सागारधर्मं चरेत् ॥ ११ ॥

टीका—अत्र 'पूज्याश्चार्हे' इत्यनेनार्हे सप्तमी । चरितुमर्हतीत्यर्थः । विधौ वा, यथोक्तगुणेन गृहिणा सागरधर्मश्चरितव्य इत्यर्थः । अत्र पूर्वो भद्रक उत्तरो द्रव्यपाक्षिक इति विभागः । चरेत् अनुतिष्ठेत् । कोऽसौ, 'न्यायोपात्तधन' इत्यादिविशेषणैश्चतुर्दशभिः समस्तैर्व्यस्तैर्वा विशिष्टो गृही । कं, सागारधर्ममिति वाक्यार्थः । इतो विशेषणानि व्याख्यायन्ते । न्यायोपात्तधनः, स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायः तेनोपात्तमुपार्जितमात्मसात्कृतं धनं विभवो येन स तथोक्तः । यजन् गुणगुरून्, गुणाः सदाचारसौजन्यौदार्यदाक्षिण्यस्थैर्यप्रियपूर्वकप्रथमाभिभा-

१ सर्वत्र शुचयो धीराः सुकर्मबलगर्विताः ।
स्वकर्मनिहितात्मानः पापाः सर्वत्र शङ्किताः ॥
अन्यायोपार्जितं वित्तं दशवर्षाणि तिष्ठति ।
प्राप्ते त्वेकादशे वर्षे समूलं च विनश्यति ॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥

२ लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः ।
कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्तितः ॥

षणादयः स्वपरोपकारिण आत्मधर्मास्तान् पूजयन् बहुमानप्रशंसासाहाय्यकरणादिना समुल्लासयन्, तथा गुरवो मातापितरा[१]वाचार्यश्च तानपि पूजयन् त्रिसन्ध्यप्रणामकरणादिनोपचरन्, तथा गुणैर्ज्ञानसंयमादिभिर्गुरवो महान्तो गुणगुरवस्तानपि यजन् सेवाञ्जल्यासनाभ्युत्थानादिकरणगणेन मानयन्, गुणाश्च गुरवश्च गुणगुरवश्चेति विगृह्यैकशेषेण गुणगुरवस्तान् । सद्गीः[२], सती प्रशस्ता परावर्णवादपारुष्यादिदोषरहिता गीर्वाग्यस्यासौ सद्गीः । त्रिवर्गं[३] भजन्नन्योन्यानुगुणं, परस्परानुपघातकं त्रिवर्गं धर्मार्थकामान् भजन् सेवमानः । तदर्हगृहिणीस्थानालयः, गृहिणी कौलीन्यादिगुणालङ्कृता पत्नी, स्थानं पुरग्रामादि वास्तु च, आलयो गृहं, गृहिणी च स्थानं च आलयश्च गृहिणीस्थानालयाः, तदर्हास्त्रिवर्गयोग्या गृहिणीस्थानालया यस्य सः तथोक्तः । ह्रीमयः, लज्जाया निर्वृत्त इव लज्जाभूयिष्ठो वा । युक्ताहारविहारः, युक्तौ शास्त्रविहितावाहारविहारौ भोजनविचरणे यस्य सः ।

१ यन्मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥

२ यदिच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादशस्येभ्यो गां चरन्तीं निवारय ॥
परपरिभवपरिवादा-दात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभव—मनेकभवकोटिदुर्मोचम् ॥

३ यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥
पादमायान्निधिं कुर्यात्पादं वित्ताय खट्वयेत् ।
धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे ॥
आयार्द्धं च नियुञ्जीत धर्मे समधिकं ततः ।
शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥

४ अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधौ तस्योपचर्या स्वयं ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राज्ञैः पुत्रि निवेदिताः कुलवधूसिद्धांतधर्मा इमे ॥

आर्यसमितिः, आर्येषु सदाचरणैकप्राणेषु, न तु कितवधूर्तविटभट्टभण्डनटादिषु, समितिः सङ्गतिर्यस्यासौ । प्राज्ञः, ऊहापोहात्मकमतिज्ञानातिशयवान् । कृतज्ञः, कृतं परोपकृतं जानाति न निन्हुते । वशी, इष्टेष्वर्थेष्वनासक्त्या विरुद्धे वाऽप्रवृत्त्या स्पर्शनादीन्द्रियविकारानिरोधकान्तरङ्गादिषड्वर्गनिग्रहपरश्च । शृण्वन् धर्मविधिं, धर्मस्याभ्युदयनिश्रेयसहेतोर्विधिः युक्त्यागमाभ्यां प्रतिष्ठा तं श्रण्वन् प्रत्यहमाकर्णयन् । दयालुः, दुःखितदुःखप्रहाणेच्छालक्षणां दयां शीलयन्, 'धर्मस्य मूलं दयेति'

१ यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथ सज्ज्ञानगोष्ठीषु पतिष्यसि पतिष्यसि ॥

२ इदं फलमियं क्रिया करणमेतदेष क्रमो
व्ययोऽयमनुषङ्गजं फलमिदं दशेषा मम
अयं सुहृदयं द्विषत्प्रयतदेशकालाविमा—
विति प्रतिवितर्कयन्प्रयतते बुधो नेतरः ॥
प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ॥

३ विधित्सुरेनं तदिहात्मवश्यं कृतज्ञतायाः समुपैहि पारम् ।
गुणैरुपेतोऽप्यखिलैः कृतघ्नः समस्तमुद्वेजयते हि लोकम् ।

४ भव्यः किं कुशलं ममेति विमृशन्दुःखाद्भृशं भीतिवान
सौख्यैषी श्रवणादिबुद्धिविभवः श्रुत्वा विचार्य स्फुटम् ।
धर्मं शर्मकरं दयागुणमयं युक्त्यागमाभ्यां स्थितं
गृह्णन्धर्मकथाश्रुतावधिकृतः शास्यो निरस्ताग्रहः ॥

५ प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्वीत मानवः ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ॥
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
अवृत्तिव्याधिशोकार्ता—ननुवर्तेत शक्तितः ।
आत्मवत्सततं पश्ये—दपि कीटपिपीलिकाः ॥

श्रुतेस्तामवश्यं कुर्वाणः। अघभीः, अघात्पापात् दृष्टादृष्टापायफलात्कर्मणश्चौर्यादेर्मद्यपानादेश्च बिभ्यत् पापभीरुरित्यर्थः । एषां संक्षेपतो व्याख्याऽत्र कृता। विस्तरतो धर्मामृतपञ्जिकायां ज्ञानदीपिकासंज्ञिकायां कृता, सा सर्वाऽत्र द्रष्टव्या ॥ ११ ॥

साम्प्रतं मन्दमतिविनेयानां सुखस्मृत्यर्थं सकलसागारधर्मं सङ्गृह्णाति——

सम्यक्त्वममलममलान्यणुगुणशिक्षाव्रतानि मरणान्ते ।
सल्लेखना च विधिना पूर्णः सागारधर्मोऽयम् ॥ १२ ॥

टीका— भवति। अयं श्रूयमाणः सागारधर्मः। किंविशिष्टः, पूर्णः समग्रः। किं किमित्याह—सम्यक्त्वं तावत्किंविशिष्टं, अमलं शङ्कादिदोषरहितं। तथा अणुगुणशिक्षापूर्वाणि व्रतानि अणुगुणशिक्षाव्रतानि अणुव्रतानि गुणव्रतानि शिक्षाव्रतानि च। किंविशिष्टानि अमलानि निरतिचाराणि। न केवलं निरतिचारतत्वार्थश्रद्धानपूर्वाणि निरतिचाराणुव्रतादीनि, किं तर्हि, मरणान्ते विधिना सल्लेखना चेत्ययं सम्पूर्णः श्रावकधर्मः। शेषविशेषणानां यथास्वमत्रैवान्तर्भावादनुक्तसमुच्चयार्थेन चशब्देन समुच्चयनाच्च । तत्र मरणमेवान्तो मरणान्तस्तद्भवमरणं, नत्वावीचिमरणं तस्य प्रतिक्षणं सर्वप्राणिषु भावात् । सल्लेखना सम्यक् लाभाद्यनपेक्षत्वेन लेखना, बाह्येनाभ्यन्तरेण च तपसा कायकषायाणां कृशीकरणम् । विधिस्तु सप्तदशाध्याये वक्ष्यते । [यत्प्रतिसमयमायुषः कर्मणो निषेकस्योदयपूर्विका निर्जरा भवति तदावीचिमरणम्]

असंयमिनोऽपि सम्यग्दृशः कर्मक्लेशापकर्षो भवतीत्युपदेशार्थमिदमाह——

भूरेखादिसदृक्कषायवशगो यो विश्वदृश्वाज्ञया
हेयं वैषयिकं सुखं निजमुपादेयं त्विति श्रद्दधत् ।
चौरो मारयितुं धृतस्तलवरेणेवाऽऽत्मनिन्दादिमान्
शर्माक्षं भजते रुजत्यपि परं नोत्तप्यते सोऽप्यघैः ॥ १३ ॥

टीका—नोत्तप्यते नोत्कृष्टं क्लिश्यते । कोऽसौ, सोऽपि अविरतसम्यग्दृष्टिः, किं पुनः त्यक्तविषयसुखः सर्वात्मनैकदेशेन वा हिंसादिभ्यो विरतश्चेत्यपि-शब्दार्थः । कैः कर्तृभिः, अघैः पापैर्दोषैर्वा बहुभिः । यः किं करोतीत्याह—यो भजते सेवते । किं तत्, शर्म सुखम् । किंविशिष्टं, आक्षं अक्षेभ्य इंद्रियेभ्य आगतं चक्षुरादिभिरिष्टरूपादीननुभवत आविर्भूतमित्यर्थः । न केवलमिन्द्रिय सुखमनुभवति यो रुजत्यपि पीडयति च । कं, परं स्थावरं जंगमं वा भूत-ग्रामं । किं कुर्वन्, श्रद्दधत् अभिनिविशमानः । किं, हेयं वैषयिकं सुखं निज-मुपादेयमिति एव तु अत्रावधारणार्थो भिन्नक्रमः । हेयं त्याज्यं न जातु सेव्यं । किं तत्, सुखं । किंविशिष्टं, वैषयिकं विषयेष्विष्टकामिन्यादिष्वनुभूयमानेषु जातं, तत्सेवनस्य दुःखकारणकर्मबन्धनिबन्धनत्वात् । तथा उपादेयं रत्नत्रयो-पयोगादात्मन्याविर्भावनीयं । किं तत्, सुखं । किंभूतं, निजं आत्मोत्थं नित्यं वा । इत्येवं रोचमानो न स्वप्नेऽप्यन्यथा । कया हेतुभूतया, विश्वदृश्वनः सर्व-ज्ञस्य आज्ञा शासनमनुल्लंघ्यं तया 'नान्यथा वादिनो जिना' इति दृढतमप्रति-पत्त्येत्यर्थः । एतेन निश्चयसम्यग्दर्शनभाग्भवन्नित्युक्तं वेदितव्यम् । पुनः किंविशिष्टः सन्, आत्मनिन्दादिमान् धिग्मामेवं प्रदीपहस्तमप्यन्धकूपे पतन्त-मित्यात्मानं निन्दयन्, भगवन्कथमस्मै दुर्गतिदुःखाय घटिष्यते एवमुत्पथचारी जनोऽयमिति गुरुसाक्षिकं गर्हमाणश्च । नन्वेवंभूतो भवन्नपि कुतोऽक्षसुखं सेवते, कुतश्च तदर्थं भूतग्रामं पीडयतीत्याह—भूरेखादिसदृक्कषायवशगो यतः, भूरेखादिभिः पृथ्वीभेदादिभिः सदृशास्तुल्याः कषायाः भूरेखादि-सदृक्कषायाः, दृषदवनीत्यादिसूत्रोक्तलक्षणा अप्रत्याख्यानावरणादयो द्वादश क्रोधादिविकल्पाः तेषां वशः पारतंत्र्यं तं गच्छतीति तद्वश्चरित्रमोहोदयपर-तंत्रः सन्नित्यर्थः । क इव, चौर इव तस्करो यथा । किं विशिष्टः, धृतो रुद्धः

१ न दुःखबीजं शुभदर्शनक्षितौ कदाचन क्षिप्रमपि प्ररोहति ।
सदाप्यनुप्तं सुखबीजमुत्तमं कुदर्शने तद्विपरीतमिष्यते ॥

२ णो इंदिएसु विरदो णो जीवे थावरे तसे वापि ।
जो सद्दहदि जिणुत्तं संमाइट्ठी अविरदो सो ॥

किं कर्तुं, मारयितुं। मारयिष्याम्येनमहमिति प्रतिरुद्धः। केन, तलवरेण कोट्टपालेन। अयमर्थो-यथा तलवरेण मारयितुमुपक्रान्तश्चौरो यद्यत्तेन खरारोहणादिकं कार्यते तत्तत्करोति तथा जीवोऽपि चारित्रमोहोदयेन यद्यदनात्मनीनं भावद्रव्यहिंसादिकं कार्यते तत्तदयोग्यं जानन्नपि करोत्येव, दुर्निवारत्वात्स्वकाले विपच्यमानस्य कर्मणः। एतेन सम्यक्त्वग्रहणात्पूर्वमबद्धायुषोऽसंयतस्यापि सम्यग्दृष्टेः सुदेवत्वसुमानुषत्वव्यतिरेकेण सकलसंसारसंहरणात् कर्मक्लेशापकर्षः। बद्धायुषस्तु पश्चादगृहीतसम्यक्त्वस्य नरकगतेरपि रत्नप्रभायां जघन्यस्थित्यैवानुभवनसम्भवात् बहुदुःखोपरमश्च प्रतिपादितः प्रतिपत्तव्यः। ततः संयमलब्धिकालात्पूर्वं संसारभीरुणा भव्येन सम्यग्दर्शनाराधनायां नित्यं यतितव्यमिति विधौ पर्यवसन्नमेतत्सूत्रमधिगन्तव्यम् ॥

इदानीं धर्मशर्मवद्यशोऽपि मनःप्रसत्तिनिमित्तत्वात् शिष्टैरवश्यं सेव्यमित्युपदेष्टुमाह—

धर्मं यशः शर्म च सेवमानाः केऽप्येकशो जन्म विदुः कृतार्थम्।
अन्ये द्विशो विद्म वयं त्वमोघान्यहानि यान्ति त्रयसेवयैव ॥ १४ ॥

टीका—विदुः जानन्ति। के, केऽपि लौकिकाः। किं तत्, जन्म मनुष्यभवग्रहणम्। किंविशिष्टं, कृतार्थं कृतः साधितोऽर्थः प्रयोजनं साध्यं यस्य तत्। किंकुर्वाणाः, सेवमानाः कर्तव्यतानुरक्तबुद्ध्या साधयन्तः। कं, धर्मं सुकृतम्, यशः कीर्तिम्, शर्म सुखम्। कथम्, एकशः एकैकम्। केचिद्धर्ममात्रं केचिद्यशोमात्रं केचिच्च सुखमात्रं साधयन्तो वयं प्राप्तमनुष्यजन्मफला इति मन्यन्ते नानारुचित्वाल्लोकस्य। तथा अन्ये लोकच्छन्दानुवर्तिनः शास्त्रज्ञम्मन्याः

१ दुर्गतावायुषो बन्धात्सम्यक्त्वं यस्य जायते।
गतिच्छेदो न तस्यास्ति तथाप्यल्पतरा स्थितिः ॥

२ जन्मोन्मार्ज्यं भजतु भवतः पादपद्मं न लभ्यं
तच्चेत्स्वैरं चरतु न च दुर्देवतां सेवतां सः।
अश्नात्यन्नं यदिह सुलभं दुर्लभं चेन्मुधाऽऽस्ते
क्षुद्व्यावृत्त्यै कवलयति कः कालकूटं बुभुक्षुः ॥

विदुः । किं, जन्म । किम्भूतं, कृतार्थम् । किं कुर्वाणाः, धर्मं यशः शर्म च सेवमानाः । कथं, द्विशः द्वे द्वे । केचिद्धर्मयशसी केचिद्धर्मशर्मणी केचिद्यशःशर्मणी च साधयन्तो जन्म फलवन्मन्यन्त इत्यर्थः । तर्हि युष्माकं किं मतमित्यत्राह-तुर्विशेषे । विद्म जानीमः । के ते, वयं लौकिकशास्त्रज्ञपरितोषकारिणः । कानि अहानि दिनानि अर्थान्नृजन्मसम्बन्धीनि । किं कुर्वन्ति, यान्ति गच्छन्ति । किंविशिष्टानि, अमोघानि सफलानि । कया, त्रयसेवया धर्मयशःशर्मसाधनया, न पुनरेकैकस्य द्वयोर्द्वयोर्वा निर्वर्तनयेत्येवकारार्थः । एतेनाहरहर्यथाशक्ति-धर्मादित्रयं साध्यामिति विधिः प्रत्येयः ॥ १४ ॥

एवं भावितसम्यक्त्वस्य संयतत्वसामग्रीविरहे कालादिलब्धिलाभादवश्या-रोहणीयं सँयतासँयतत्वपदं निर्देष्टुमाह—

मूलोत्तरगुणनिष्ठामधितिष्ठन्पश्चगुरुपदशरण्यः ।
दानयजनप्रधानो ज्ञानसुधां श्रावकः पिपासुः स्यात् ॥१५॥

टीका—स्यात् भवेत । कोऽसौ, श्रावकः शृणोति गुर्वादिभ्यो धर्ममिति श्रावकः । किं कुर्वन्, अधितिष्ठन् उपयुञ्जानः । कां, मूलोत्तरगुणनिष्ठां मूलानि उत्तरगुणप्ररोहणनिमित्तत्वात् सँयमार्थिभिः प्रागनुष्ठेयत्वाच्च उत्तरे मूलगुणानन्तरसेव्यत्वादुत्कृष्टत्वाच्च, मूलानि च उत्तरे च मूलोत्तरास्ते च ते गुणाश्च संयमविकल्पाः तेषां निष्ठा निर्वाहो दृष्टफलनिरपेक्षतया निराकुलं वहन् । किम्भूतो भूत्वेत्याह—पंचगुरुपदशरण्यः, पंचानां गुरूणामर्हदादीनां पदानि चरणाः शरण्यानि शरणे आर्तिहरणे स्वात्मसमर्पणे वा साधूनि योग्यानि यस्य स तथोक्तः । एवं सम्यग्दर्शनपूर्वकं देशसँयममधितिष्ठतो दानयजना-ध्ययनलक्षणमाचारं कर्तव्यतया दानेत्यादिना निर्दिशति—कीदृशस्तथाभूतः श्रावकः स्यात्, दानयजनप्रधानः दानं—पात्रादिभिश्चतुर्धा, यजनं—नित्य-महादियज्ञः पंचधा, दानं च यजनं च दानयजने प्रधाने मुख्ये यस्यासौ ।

१ जो तसवहादु विरदो अविरदओ तह य थावरवहादो ।
एक्कसमयह्मि जीवो विरदाविरदो जिणेक्कमइ ॥

२ ध्यानेन शोभते योगी संयमेन तपोधनः ।
सत्येन वचसा राजा गेही दानेन शोभते ॥

चार्तो तु श्रावकस्य गौणीति प्रधानग्रहणाल्लक्षयति। किं चरिष्णुः श्रावकः स्यात्, पिपासुः पातुमिच्छुः उपयोक्तुकामः। कां, ज्ञानसुधां स्वपरान्तरज्ञानामृतम्।

एवं पञ्चमगुणस्थानं निर्दिश्य तद्विकल्पानां भावद्रव्यात्मनामेकादशाना मुपासकपदानां मध्येऽन्यतमं विशुद्धदृष्टिर्महाव्रतपरिपालनलालसो यथा-त्मशक्ति यः प्रतिपद्यते तमभिनन्दति

रागादिक्षयतारतम्यविकसच्छुद्धात्मसंवित्सुख-
स्वादात्मस्वबहिर्बहिस्त्रसवधाद्यंहोव्यपोहात्मसु।
सद्दृग्दर्शनिकादिदेशविरतिस्थानेषु चैकादश-
स्वेकं यः श्रयते यतिव्रतरतस्तं श्रद्दधे श्रावकम् ॥ १६ ॥

टीका—श्रद्दधे साधु करोत्ययमिति प्रतिपद्येऽहम्। कं, तं श्रावकं। यः किं, यः श्रयते स्वीकुरुते। किं तत्, एकं पदं। केषु मध्ये, दर्शनिकादि-देशविरतिस्थानेषु एकादशसु वक्ष्यमाणेषु। कथम्भूतो भूत्वा, सद्दृक् सम्यग्दर्शनशुद्धः। पुनः किंविशिष्टः, यतिव्रतरतः यतीनामनगाराणां व्रतानि सर्वहिंसादिविरतिपरिणामास्तेषु रत आसक्तः, सर्वविरतिकलशारोपणो हि श्रावकधर्मप्रासादः। किंविशिष्टेषु भावतस्तेष्वित्याह-रागादिक्षयतारतम्येत्यादि, क्षयः सर्वघातिस्पर्द्धकानामुदयाभावः अर्थाद्देशघातिस्पर्द्धकानामुदयः, तार-तम्यं यथोत्तरमुत्कर्षः, रागादीनां रागद्वेषमोहानां क्षयतारम्येन विकसन्ती आविर्भवन्ती चासौ शुद्धात्मसंविच्च निर्मलचिद्रूपानुभूतिः सैव तदुत्थं वा सुखमानन्दस्तस्य स्वादः स्वसंवित्याऽनुभवः स एवात्मा स्वरूपं येषां तानि तदात्मानि तेषु। क्व, एवंभूतेषु अबहिरध्यात्मं। तर्हि द्रव्यतः किंरूपेष्वित्याह-बहिः शरीरे वाचि मनसि च त्रसवधं आदिर्येषां स्थूलादीनां तानि त्रसव-धादीनि तान्येव अंहांसि पापानि तत्फलत्वात्तेभ्यो व्यपोहो विधिपूर्वकं

१ आयुःश्रीवपुरादिकं यदि भवेत्पुण्यं पुरोपार्जितं।
स्यात्सर्वं न भवेन्न तच्च नितरामायासितेऽप्यात्मनि॥
इत्यार्याः सुविचार्य कार्यकुशलाः कार्येऽत्र मंदोद्यमा।
द्रागागामिभवार्थमेव सततं प्रीत्या यतन्ते तराम्॥

देवगुरुसधर्मसाक्षिकमपोहो विरतिः सैवात्मा एषां तानि तेषु । च शब्दस्यात्र भिन्नक्रमस्य योजनात् ॥ १६ ॥

किंलक्षणास्ते दर्शनिकादयो भवन्तीत्युद्दिशति—

दृष्ट्या मूलगुणाष्टकं व्रतभरं सामायिकं प्रोषधं
सच्चित्तान्नदिनव्यवायवनितारम्भोपधिभ्यो मतात् ।
उद्दिष्टादपि भोजनाच्च विरतिं प्राप्ताः क्रमात्प्राग्गुण-
प्रौढ्या दर्शनिकादयः सह भवन्त्येकादशोपासकाः ॥ १७ ॥

टीका—भवन्ति। के, उपासकाः श्रावकाः। कति, एकादश। किन्नामानः दर्शनिकादयः। दर्शनिकोऽथ व्रतिक इत्यादिना वक्ष्यमाणाः। किंविशिष्टाः सन्तः, प्राप्ताः प्रतिपन्नाः। किं तत्, दृष्ट्या मूलगुणाष्टकमित्यादिविरतिमित्यन्तं देशसंयमं। तथा हि-सम्यक्त्वेन विशिष्टं मूलगुणाष्टकं प्राप्तो दर्शनिकः। स एव च व्रतभरं निरतिचाराण्यणुव्रतादीनि प्राप्तो व्रतिकः। एवमुत्तरेष्वपि सम्बन्धः कर्तव्यः। व्यवायो मैथुनम्, वनिता स्त्री, उपधिः परिग्रहः, मतात् मदर्थं साधु कृतमनेनेदमित्यनुमोदितात्, अपि भोजनात् मतादुद्दिष्टाच्च भोजनादपि विरतिं प्राप्तोऽनुमतविरत उद्दिष्टविरतश्च, योऽनुमतमुद्दिष्टं च भोजनमपि न कुर्यात् स किमर्थं अन्यत्रारम्भादौ पापकर्मण्यनुमतिं दद्यात्, उद्दिष्टं च वसत्याच्छादनादिकमुपयुञ्जीतेत्यपिशब्दाल्लभ्यते। कथं ते, तत्तत्पदं प्राप्ताः, सह सार्धम्। कया, प्राग्गुणप्रौढ्या दृष्टिमूलगुणाष्टकप्रकर्षेण सह व्रतभरं, तत्त्रयप्रकर्षेण सामायिकमित्यादियुक्त्या ते तथा भवन्तीत्यर्थः। कस्मात्तथा भवन्ति, क्रमात् अनादिविषयाभ्यासासंयमभग्नमनस्कतया युगपत्तत्रासामर्थ्यात्।

साम्प्रतं दुरितापचयनिमित्तेज्यादिधर्मकर्मसिध्यर्थं कृष्यादिषट्कर्मलक्षण वार्तामाचरतो गृहस्थस्यावश्यंभावी सावद्यलेशः प्रायश्चित्तेन पक्षादिभिश्च निराकार्य इत्युपदेशार्थमाह—

नित्याष्टाह्निकसच्चतुर्मुखमहः कल्पद्रुमैन्द्रध्वजा-
विज्याः पात्रसमक्रियान्वयदयादत्तीस्तपःसंयमान् ।
स्वाध्यायं च विधातुमादृतकृषीसेवावणिज्यादिकः
शुद्ध्याऽऽप्तोदितया गृही मललवं पक्षादिभिश्च क्षिपेत् ॥१७॥

टीका–क्षिपेत् निराकुर्यात्। कोऽसौ, गृही गृहस्थः। कं, मलवं पापलेशम्। कया, शुध्द्या प्रायश्चित्तेन। किंविशिष्टया, आप्तोदितया। न केवलं तया पक्षादिभिश्च पक्षचर्यासाधनैस्त्रिभिः। किंविशिष्टः सन्, आदृतकृषीसेवावणिज्यादिकः आदृतानि यथास्वं प्रवर्तितानि कृषीसेवावणिज्यानि आदिशब्दान्मषीविद्याशिल्पानि च षडाजीवनकर्माणि येन सः आदृतकृषीसेवावणिज्यादिकः। किं कर्तुं, विधातुं कर्तुं करिष्याम्यहमिज्यादीनि जिनागमप्रसिद्धानि पञ्च धर्मकर्माणीति अध्यवसाय। कानि तानीत्याह–नित्येत्यादि, नित्यमहः *अष्टाह्निकमहः सच्चतुर्मुखमहः कल्पद्रुमः ऐन्द्रध्वजश्चेति पञ्चार्हत्पूजाविशेषाः इज्याः।

उक्तं च आर्षे भगवज्जिनसेनपादः—

प्रोक्ता पूजार्हतामिज्या सा चतुर्धा सदार्चनं।
चतुर्मुखमहः कल्प–द्रुमश्चाष्टाह्निकोपि च॥

१ तत्र नित्यमहो नाम शश्वज्जिनगृहं प्रति।
स्वगृहान्नीयमानाऽर्चा गन्धपुष्पाक्षतादिका॥
चैत्यचैत्यालयादीनां भक्त्या निर्मापणं च यत्।
शासनीकृत्य दानं च ग्रामादीनां सदार्चनं॥
या च पूजा मुनीन्द्राणां नित्यदानानुषङ्गिणी।
स च नित्यमहो ज्ञेयो यथाशक्त्युपकल्पितः॥

* अष्टाह्निको महः सार्व–जनिको रूढ एव सः।

२ महामुकुटबद्धैस्तु क्रियमाणो महामहः।
चतुर्मुखः स विज्ञेयः सर्वतोभद्र इत्यपि।

३ दत्वा किमिच्छुकं दानं सम्राड्भिर्यः प्रवर्त्यते।
कल्पवृक्षमहः सोयं जगदाशाप्रपूरणः॥

४ महानैन्द्रध्वजोन्यस्तु सुरराजैः कृतो महः॥
बलिस्नपनमित्यन्य–त्रिसंध्यासेवया समं।
उक्तेष्वेव विकल्पेषु ज्ञेयमन्यच्च तादृशं॥
एवं विधविधानेन या महेज्या जिनेशिनाम्।
विधिज्ञास्तामुशन्तीज्यां वृत्तिं प्राथमकल्पिकीं॥
वार्ता विशुद्धवृत्या स्यात्कृष्यादीनामनुष्ठितिः।

चतुर्मुखस्य सदितिविशेषणादत्रेदानीमयमेव परमोत्कृष्टः कल्पवृक्षस्यासम्भवादिति प्रकाशयति । अत एवेन्द्रध्वजेन सह समस्यैव निर्दिष्टः । पात्रेत्यादि. समा आत्मना समाना क्रिया आधानादिका उपलक्षणान्मन्त्रव्रतादयश्च यस्यासौ समक्रियः, पात्रं च समक्रियश्च अन्वयश्च दया च पात्रसमक्रियान्वयदयास्तदाश्रया दत्तयो दानानि तद्दत्तयस्ताः, पात्रदत्तिं समानदत्तिमन्वयदत्तिं दयादत्तिं च । तपोऽनशनादि संयमं व्रतधारणं । स्वाध्यायं श्रुतभावनाम् ।

किमेतत्पक्षादित्रयमित्याह——

स्यान्मैत्र्याद्युपबृंहितोऽखिलवधत्यागो न हिंस्यामहं
धर्माद्यर्थमितीह पक्ष उदितं दोषं विशोध्योज्झतः ।
सूनौ न्यस्य निजान्वयं गृहमथो चर्या भवेत्साधनं
त्वन्तेऽन्नेहतनूज्झनाद्विशदया ध्यात्यात्मनः शोधनम् ॥

टीका—स्यात् भवेत् । कोऽसौ, पक्षः अहिंसापरिणामत्वं । किमात्मा, अखिलवधत्यागः अखिलोऽनृतादिसहितो वधः प्राणातिपातः, स चेह सागारधर्मप्रक्रमात्त्रसवधविषय एव तस्य त्यागो वर्जनं। किंविशिष्टः, मैत्र्याद्युप-

१ चतुर्धा वर्णिता दत्ति–र्दयादानसमाऽन्वयैः ॥
सानुकम्पमनुग्राह्ये प्राणिवृन्देऽभयप्रदा ।
त्रिशुद्ध्यानुगता सेयं दयादत्तिर्मता बुधैः ॥
महातपोधनायार्चा–प्रतिग्रहपुरःसरम् ।
प्रदानमशनादीनां पात्रदानं तदिष्यते ॥
समानायात्मनाऽन्यस्मै क्रियामन्त्रव्रतादिभिः ।
निस्तारकोत्तमायेह भूहेमाद्यतिसर्जनम् ॥
समानदत्तिरेषा स्यात् पात्रे मध्यमतामिते ।
समानप्रतिपत्त्यैव प्रवृत्ता श्रद्धयाऽन्विता ॥
आत्मान्वयप्रतिष्ठार्थं सूनवे यदशेषतः ।
समं समयवित्ताभ्यां स्ववर्गस्यातिसर्जनं ॥
सैषा सकलदत्तिः स्यात् स्वाध्यायः श्रुतभावना ।
तपोऽनशनवृत्त्यादि संयमो व्रतधारणम् ॥

बृंहितो मैत्रीप्रमोदकारुण्यमाध्यस्थ्यभावनाभिरुपचितः । केन, न हिंस्यामहं धर्माद्यर्थमित्येवम्प्रकारेण सङ्कल्पेन धर्मार्थं देवतार्थं मन्त्रसिध्द्यर्थमौषधार्थ-माहारार्थं वा प्राणिघातं न कुर्यामिति प्रतिज्ञाय । अयं हि मन्दकषायोऽपि गृहवाससेवनरतत्वेन प्रवर्तितारम्भत्वादनारम्भजामेव साङ्कल्पिकीं हिंसां परिहर्तुं शक्नोति, न पुनरारम्भानुषङ्गिणीम्, तस्या गृहिणोऽवश्यम्भावात् । क्व पक्षः स्यात्, इह एतेषु पक्षादिषु मध्ये । तथा भवेत् । काऽसौ, चर्या दर्शनिकादारभ्यानुमतिविरतं यावदुपासकाचारः । कस्य गृहिणः । किं कुर्वतः, उज्झतस्त्यजतः । किं तत्, गृहं । किं कृत्वा, न्यस्य स्थापयित्वा । क्व, निजान्वयं स्वं पोष्यवर्गं धनं, धर्म्यं च । क्व, सूनौ पुत्रे । तदसम्भवे तत्तुल्ये वंश्येऽपि । किं कृत्वा, विशोध्य विधिपूर्वकं प्रायश्चित्तेन शास्त्रोक्तविधानेन निराकृत्य । कं, दोषं हिंसादिकं । किंविशिष्ट,-मुदितं कृष्यादिद्वारेणोत्पन्नं कथ-मथो, पक्षसँस्कारानन्तरं वैराग्यपरिणामे प्रत्यहमारोहति सतीत्यर्थः । तथा भवेत् । किं तत् साधनं । किं, शोधनं शुद्धी रागादिदोषापनयनं । कस्य, आत्मनः चिद्रूपस्य । कया, ध्यात्या ध्यानेन । किंविशिष्टया, विशदया शुद्धया । कस्मात्, अन्नेहतनूज्झनात् अन्नं चाहार ईहश्च शरीरचेष्टा तनुश्च शरीरमन्नेहतनवस्तासामुज्झनं नियतकालं यावज्जीवं च यथोचितं परित्यागस्त-स्मात् । क्व, अन्ते गृहत्यागावसाने मरणे चासन्ने । 'तु' शब्दादुदितं दोषं विशोध्येत्यनुवृत्यात्रापि योज्यम् ॥ १९ ॥

इदानीं पक्षादिकल्पनाद्वारेण कृतावतारान् श्रावकस्य त्रीन् प्रकारानुद्दिश्य संक्षेपेण लक्षयन्नाह—

पाक्षिकादिभिदा त्रेधा श्रावकस्तत्र पाक्षिकः ।
तद्धर्मगृह्यस्तन्निष्ठो नैष्ठिकः साधकः स्वयुक् ॥ २० ॥

टीका—भवति । कोऽसौ, श्रावकः । कतिधा, त्रेधा त्रिविधः । कया, पाक्षिकादिभिदा पक्षेण चरति दीव्यति जयति वा, पाक्षिकः आदिर्यस्यासौ पाक्षिकादिः, पाक्षिको नैष्ठिकः साधकश्चेति स एव तेन वा भिद् भेदो विकल्पकथनं पाक्षिकादिभिद् तया । तानेव लक्षणतो दर्शयति—तत्रेत्यादि, तत्र तस्यां पाक्षिकादिभिदि । भवति । कोऽसौ, पाक्षिकः । किंरूपः, तद्धर्म-

गृह्यः तस्य श्रावकस्य धर्मे एकदेशहिंसाविरतिरूपं व्रतं गृह्यं पक्षः प्रतिज्ञाविषयो यस्यासौ प्रारब्धदेशसंयमः श्रावकधर्मस्वीकारपर इत्यर्थः । तथा भवति । कोऽसौ, नैष्ठिकः निष्ठया चरति तत्र वा भवः किंविशिष्टः, तन्निष्ठः तत्र धर्मे निष्ठा निर्वहणं यस्यासौ, घटमानदेशसंयमो निरतिचारश्रावकधर्मनिर्वाहपर इत्यर्थः । तथा भवति । कोऽसौ, साधकः समाधिमरणं साधयतीति साधकः । किंविशिष्टः, स्वयुक् स्वस्मिन्नात्मनि युक् समाधिर्यस्यासौ निष्पन्नदेशसंयम आत्मध्यानतत्पर इति भद्रम् ।। २० ।।

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचंद्रिकासञ्ज्ञायामादितो दशमः
प्रक्रमाच्च प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

एवं सागारधर्मं सूचयित्वा पाक्षिकाचारं प्रपञ्चयितुकामः प्रथमं तावद्यादृशस्य भव्यस्य सागारधर्माभ्युपगमो धर्माचार्यैरभ्युनुज्ञायते तादृशं तं दर्शयन्नाह——

त्याज्यानजस्रं विषयान् पश्यतोऽपि जिनाज्ञया ।
मोहात्त्यक्तुमशक्तस्य गृहिधर्मोऽनुमन्यते ॥ १ ॥

टीका—अनुमन्यते क्रियतामित्यनुज्ञायते धर्माचार्यैः । कोऽसौ, गृहिधर्मः । कस्य, अशक्तस्य असमर्थस्य । किं कर्तुं, त्यक्तुं । कान्, विषयान् इष्टकामिन्यादीन् । कस्मात्, मोहात् प्रत्याख्यानावरणलक्षणचारित्रमोहोदयोद्रेकात् । किं कुर्वतोऽपि, पश्यतोऽपि प्रतिपद्यमानस्य, न पुनरनन्तानुबन्धिरागादिपरतंत्रवत्सेव्यतयाऽभ्युपगच्छत इत्यपिशब्दार्थः । कान्, विषयान् । किंविशिष्टान्, त्याज्यान् असेव्यान् । कथम्, अजस्रं शश्वत् । कया, जिनाज्ञया वीतरागसर्व

१ विषयविषमाशनोत्थित—मोहज्वरजनिततीव्रतृष्णस्य ।
निःशक्तिकस्य भवतः प्रायः पेयाद्युपक्रमः श्रेयान् ॥

ज्ञानुलंध्यशासनेन सम्यग्दर्शनशुद्धस्य सत इत्यर्थः । इदमत्र तात्पर्यं, एकदेश-विरतिमहं करिष्यामीति प्रतिपद्यमानो गृही सूरिभिरोमित्यनुज्ञायते । एतेन स्थावरवधानुमतिदोषानुषंगोऽप्याचार्याणां परिहृतो भवति ॥ १ ॥

अधुना पाक्षिकं दर्शनविशुद्धिमध्यासीनमहिंसासिध्यर्थं मद्यादिविरतौ नियुंक्ते—

तत्रादौ श्रद्दधज्जैनी-माज्ञां हिंसामपासितुम् ।
मद्यमांसमधून्युज्झे-त्पश्च क्षीरिफलानि च ॥ २ ॥

टीका—उज्झेत् त्यजेत् । कोऽसौ, देशसंयमोन्मुखो गृही । कानि, मद्यमांस-मधूनि, न केवलमेतानि पश्च क्षीरिफलानि च क्षीरिणां पिप्पलादीना पञ्चानां फलानि । च—शब्दान्नवनीतरात्रिभुक्त्यगालितपानीयादिकमप्युत्सृजेदित्यनुक्तः समुचितं व्रतयति । किं कर्तुं, अपासितुं त्यक्तुं । कां, हिंसां भावतो मद्यादिवि-षयरागरूपां द्रव्यतश्च तद्गतप्राणिप्राणव्यपरोपणलक्षणाम् । किं कुर्वन्, श्रद्दधत् । कां, आज्ञां । किंविशिष्टां, जैनीं जिनागममित्यर्थः । क्व, आदौ प्रथमतः । क्व, तत्र गृहिधर्मे । एतेनेदमुक्तं भवति, तादृग्जिनाज्ञाश्रद्धानेनैव मद्यादिविरतिं कुर्वन् देशव्रती स्यात् न कुलधर्मादिबुध्या ॥ २ ॥

अथ स्वमतपरमताभ्यां मूलगुणान् विभजते—

अष्टैतान् गृहिणां मूलगुणान् स्थूलवधादि वा ।
फलस्थाने स्मरेद् द्यूतं मधुस्थान इहैव वा ॥ ३ ॥

टीका—स्मरेत् स्मृतिविषयीकुर्यात् । कोऽसौ, मूलगुणस्थापनोद्यतः सूरिः । कान्, मूलगुणान् । केषां, गृहिणां । किंविशिष्टान्, एतान् उपासकाध्ययनादि-

---

१ सर्वविनाशी जीवस्त्रसहनने त्याज्यते यतो जैनैः ।
स्थावरहननानुमतिस्ततः कृता तैः कथं भवति ॥

२ मांसाशिषु दया नास्ति न सत्यं मद्यपायिषु ।
आनृशंस्यं न मर्त्येषु मधूदुम्बरसेविषु ॥

शास्त्रानुसारिभिः पूर्वमनुष्ठेयतयोपदिष्टान् । कति, अष्ट मद्यमांसमधुपञ्चोदुम्बरफलविरतिरूपान् । वा-शब्दः पक्षान्तरसूचने । स्वामिसमंतभद्रमते पुनः सूरिः स्मरेत् । किं तत्, स्थूलवधादि स्थूलहिंसानृतस्तेयमैथुनग्रन्थपञ्चकम् । क, फलस्थाने पञ्चोदुम्बरफलप्रसङ्गे तन्निवृत्तौ वा मद्यमांसमधुविरतित्रयं पञ्चाणुव्रतानि चाष्टौ मूलगुणान् स्मरेदित्यर्थः । पुनर्वाशब्दः पक्षान्तरसूचने । महापुराणमते तु-स्मरेत् किं तत्, द्यूतं । क, मधुस्थाने । कस्मिन् इहैव अस्मिन्नेव स्वाम्युक्ताष्टमूलगुणपक्षे मद्यमांसद्यूतविरतित्रयं पंचाणुव्रतानि चाष्टौ मूलगुणान् स्मरेदित्यर्थः । स्मरेदित्यनेन च सर्वत्र यमनियमादौ मुक्त्यंगे स्मरणपरेण भवितव्यमिति लक्षयति ॥

सम्प्रति मद्यस्य जन्तुभूयिष्ठतानुवादपुरस्सरमुपयोक्तॄणामुभयलोकबाधकत्वमुपदर्शयन्नवश्यत्याज्यतामभिधत्ते—

यदेकबिन्दोः प्रचरन्ति जीवाश्चेत्तत् त्रिलोकीमपि पूरयन्ति ।
यद्विक्लवाश्चेममुं च लोकं यस्यन्ति तत् कश्यमवश्यमस्येत् ॥४ ।

टीका—अस्येत् त्यजेत् । कोऽसौ, स्वहितैषी । किं तत्, कश्यं मद्यं । कथं, अवश्यं नियमेन मद्यविरतिव्रतं स्वीकुर्यादित्यर्थः । यतः पूरयन्ति भरन्ति । के ते, जीवाः । कां, त्रिलोकीमपि समस्तविष्टपमपि । कथं, तत् ततः ।

१ मद्यमांसमधुत्यागैः सहोदुम्बरपञ्चकैः ।
अष्टावेते गृहस्थानामुक्ता मूलगुणाः श्रुते ॥ (सोमदेवः)

२ मद्यमांसमधुत्यागैः सहाणुव्रतपञ्चकम् ।
अष्टौ मूलगुणानाहु—र्गृहिणां श्रमणोत्तमाः ॥ (समन्तभद्रः)

३ हिंसासत्यस्तेया—दब्रह्मपरिग्रहाच्च बादरभेदात् ।
द्यूतान्मांसान्मद्या—द्विरतिर्गृहिणोऽष्ट सन्त्यमी मूलगुणाः ॥

४ मनोमोहस्य हेतुत्वा-न्निदानत्वाच्च दुर्गतेः ।
मद्यं सद्भिः सदा त्याज्यमिहामुत्र च दोषकृत् ॥
विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा ।
मद्यात्प्रलीयते सर्वं तृण्या वन्हिकणादिव ॥

चे,-यदि । प्रचरन्ति संचरन्ति । के, जीवाः कस्मात् यदेकबिन्दोः यस्य मद्यस्यैकस्माद् बिन्दोः पृषतः सकाशात्, तज्जाः प्राणिनो यदि विचरेयुरित्यर्थः । यतश्च यस्यन्ति भ्रंशयन्ति श्रेयो,-ऽहितं कुर्वन्तीत्यर्थः के ते, यद्विक्लवाः येन मद्येन मोहितमतयः । कं, लोकं । किंविशिष्ट,-ममुं, न केवलममुं च तद्भवमुत्तरभवं च दुःखमयं कुर्वन्तीत्यर्थः ॥ ४ ॥

इदानीं मद्यपानस्य द्रव्यभावहिंसानिदानत्वमनूद्य तन्निवृत्तिप्रवृत्तिशीलानां गुणदोषौ दृष्टान्तद्वारेण स्पष्टयन्नाह—

पीते यत्र रसाङ्गजीवनिवहाः क्षिप्रं म्रियन्तेऽखिलाः
कामक्रोधभयभ्रमप्रभृतयः सावद्यमुद्यन्ति च ।
तन्मद्यं व्रतयन्न धूर्तिलपरास्कन्दीव यात्यापदं
तत्पायी पुनरेकपादिव दुराचारं चरन्मज्जति ॥ ५ ॥

टीका—न याति न प्राप्नोति । कोऽसौ, पुरुषः । कां, आपदं विपदं । किं कुर्वन्, व्रतयन् व्रतं कुर्वन् अमद्यपकुलजातोऽपि देवादिसाक्षिकं निवर्तयन्नित्यर्थः। किं तत्, तत्प्रागुक्तविनिपातप्रायं मद्यम् । क इव, धूर्तिलपरास्कन्दीव धूर्तिलनामा चोरो यथा । तत्पायी पुनर्मद्यशीलो मज्जति दुर्गतिदुःखे व्रजति । किं कुर्वन् चरन् अनुतिष्ठन् । कं, दुराचारं अगम्यगमनाभक्ष्यभक्षणापेयपानादिकं । क इव, एकपादिव एकपान्नामपरिव्राजको यथा । यत्र किं, यस्मिन्मद्ये पीते सति। म्रियन्ते विपद्यंते । के ते, रसाङ्गजीवनिवहाः रसोऽङ्गं कारणं येषां ते रसांगाः रसजा इत्यर्थः, तथा रसस्यांगानि कारणानि रसांगानि मद्ये रसजनका इत्यर्थः, रसांगाश्च ते जीवाश्च रसांगजीवास्तेषां निवहाः संघाताः । किंवि-

१ रसजानां च बहूनां जीवानां योनिरिष्यते मद्यम् ।
मद्यं भजतां तेषां हिंसा सञ्जायतेऽवश्यम् ।
समुत्पद्य विपद्येह देहिनोऽनेकशः किल ।
मद्ये भवन्ति कालेन मनोमोहाय देहिनाम् ॥

शिष्टाः, अखिलाः समस्ताः । कथं, क्षिप्रं पानानन्तरमेव । तथा उद्यन्ति उत्पद्यन्ते । के ते, कामादयः । क्व सति, यत्र पीते सति । कथं, सावद्यं पापेन निन्दया वा सह । कामो योन्यादौ रिरंसा, भ्रमो मिथ्याज्ञानं चक्रारूढस्येव शरीरभ्रमणं, कामश्च क्रोधश्च भयं च भ्रमश्च कामक्रोधभयभ्रमाः ते प्रभृतयः प्रमुखा येषामभिमानहास्यारतिशोकादीनां ते ॥ ५ ॥

अथचारविशुद्धिगर्वितानां पिशिताशनं गर्ह्यमाणः प्राह –

स्थानेऽश्नन्तु पलं हेतोः स्वतश्चाशुचिकश्मलाः ।
श्वादिलालावदप्यद्युः शुचिम्मन्याः कथं नु तत् ॥ ६ ॥

टीका- अश्नन्तु भक्षयन्तु । के ते, कश्मलाः जातिकुलाचारमलिनाः । किं तत् पलं मांसं । किंविशिष्टं, अशुचि । कस्मात्, हेतोः शुक्रशोणितलक्षणात् कारणात्, न केवलं हेतोः स्वतश्च स्वभावेन अमेध्यबीजममेध्यस्वभावं चेत्यर्थः । कथं, स्थाने युक्तं कश्मलानां तथाप्रवृत्त्युपपत्तेः । नु अहो । कथमद्युः कथं खादेयुः गर्हामहे । अन्याय्य (अनार्य) मेतत् । गर्हे सप्तम्या विधानात् । के ते, शुचिम्मन्याः आचारविशुद्धमात्मानं मन्यमानाः । तत्, पलं । किंविशिष्टं, श्वादिलालावदपि श्वादीनां कुक्कुरचित्रकश्येनादीनां लाला मुखस्रावः श्वादिलाला सा अस्मिन्नस्तीति श्वादिलालावत्, अथवा श्वादिलालया तुल्यं श्वादिलालावत् कुक्कुरादिलालायुक्तं तत्तुल्यं वा । अपि विस्मये ॥ ६ ॥

साम्प्रतं स्वयमेव पञ्चत्वं प्राप्तस्य पञ्चेन्द्रियस्य मत्स्यादेर्भक्षणमदूषणमुत्प्रेक्षमाणान् प्रत्याह—

हिंस्रः स्वयम्मृतस्यापि स्यादश्नन् वा स्पृशन्पलम् ।
पक्कापक्का हि तत्पेश्यो निगोदौघसुतः सदा ॥ ७ ॥

१ भक्षयन्ति पलमस्तचेतनाः सप्तधातुमयदेहसंभवम् ।
यद्वदन्ति च शुचित्वमात्मनः किं विडम्बनमतः परं बुधाः ॥
यतो मांसाशिनः पुंसो दमो दानं दयार्द्रता ।
सत्यशौचव्रताचारा न स्युर्विद्यादयोऽपि च ॥

टीका—स्यात् भवेत्। कोऽसौ,पुमान् किंविशिष्टः,हिंस्रः द्रव्यहिंसाशीलः। भावहिंसायास्तु मांसभक्षणे दर्पकरतरत्वेन वक्ष्यमाणत्वात्। किं कुर्वन्, अश्नन् खादन्, स्पृशन् वा हस्तादिना संयोजयन्। किं तत्, पलं मांसं। कस्य, स्वयम्मृतस्यापि भोक्तुः प्रयत्नमन्तरेणापि त्यक्तप्राणस्य मत्स्यमहिषादेः किं पुनरात्मना वधितस्येत्यपिशब्दार्थः। कुत इत्याह-हि यस्मात्। भवन्ति। का, -स्तत्पेश्यः तस्य पलस्य पेश्यः कोशाः। किंविशिष्टाः, निगोदौघसुतः निगोदानां साधारणांगजीवानामेकशरीरभोक्तृणामनन्तप्राणिनामोघाः सङ्घातास्तान् सुवन्ति जनयन्तीति निगोदौघसुतः। किं कदाचिन्नेत्याह—सदा सर्वदा। किंविशिष्टाः सत्यः,पक्वापक्वाः पक्वाश्चापक्वाश्चेति विगृह्यैकशेषेण पक्वापक्वा इत्यस्य लोपस्तेन पक्वाः आमाः पच्यमानाश्चेत्यर्थः॥ ७॥

अथ मांसस्य प्राणिहिंसातिरेकप्रभवत्वेनेन्द्रियदर्पकरतरत्वेन च भावहिंसाहेतुत्वानुवादपुरस्सरं तद्भक्षणं नरकादिगतिविवर्तननिमितत्वेनोपदिशन्नाह—

प्राणिहिंसार्पितं दर्प-मर्पयत्तरसं तराम्।
रसयित्वा नृशंसः स्वं विवर्तयति संसृतौ॥ ८॥

टीका—विवर्तयति द्रव्यक्षेत्रकालभावैः परिवर्तयति। कोऽसौ,नृशंसः क्रूरकर्मकृत्। कं, स्वं आत्मानं। क्व, संसृतौ संसारे। किं कृत्वा, रसयित्वा आस्वाद्य।

---

१ अभिमानभयजुगुप्सा-हास्यारतिकामशोककोपाद्याः।
हिंसायाः पर्यायाः सर्वेऽपि च नरकसंनिहिताः॥
न विना प्राणिविघातान्मांसस्योत्पत्तिरिष्यते यस्मात्।
मांसं भजतस्तस्मात् प्रसरत्यनिवारिता हिंसा॥

ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये। त एव घातका यन्न वद को भक्षकं विना॥
मांसास्वादनलुब्धस्य देहिनो देहिनं प्रति। हन्तुं प्रवर्तते बुद्धिः शाकिन्य इव दुर्धियः॥

२ आमां वा पक्वां वा खादति वा स्पृशति वा पिशितपेशीम्।
स निहन्ति सततनिचितं पिण्डं बहुजीवकोटीनाम्॥
आमास्वपि पक्वास्वपि विपच्यमानासु मांसपेशीषु।
सातत्येनोत्पादस्तज्जातीनां निगोतानाम्॥

किं तत्, तरसं मांसं । किंविशिष्टं प्राणिहिंसार्पितं पञ्चेन्द्रियजीववधसम्पादितं । किं कुर्वत्, अर्पयत् सम्पादयत् । कं, दर्पं मदावेशं । कथं, तरां अतिशयेनेत्यऽव्यय-मिदम् । मृष्टान्नादिभ्योऽतिशयेन प्राणिवधादुत्पन्नं तद्रद्दर्पकरं चेत्यर्थ ॥ ८ ॥

इदानीं सांकल्पिकस्यापि पलभक्षणस्य दोषं तद्विरतिनिष्ठायाश्च गुणमुदा-हरणद्वारेण दर्शयति—

भ्रमति पिशिताशनाभि-ध्यानादपि सौरसेनवत्कुगतीः ।
तद्विरतिरतः सुगतिं श्रयति नरश्चण्डवत्खदिरवद्वा ॥ ९ ॥

टीका—भ्रमति परापरविवर्ते परिवर्तयति । कोऽसौ, जीवः । काः, कुगतीः नरकादिभवग्रहणानि । कस्मात् पिशिताशनाभिध्यानादपि मांसभक्षणसङ्कल्पात्, किं पुनस्तद्भक्षणादित्यपिशब्दार्थः । किंवत्, सौरसेनवत् सौरसेनराज्ञा तुल्यं । तथा श्रयति लभते । कोऽसौ, नरः । कां, सुगतिं स्वर्गादिगतिं । किंविशिष्टः सन्, तद्विरतिरतः पिशितनिवृत्तावासक्तः । किंवत्, चण्डवत् चण्डनामोज्जयिन्यां मातङ्गो यथा । अथवा खदिरवत् खदिरसारो नाम भिल्लराजो यथा ॥ ९ ॥

अधुना मांसं सतां भक्षणीयं प्राण्यङ्गत्वान्मुद्गादिवदित्यनुमानाभिधानग्रहा-वेशान्मांसभक्षणदक्षिणान् प्रत्याह—

प्राण्यङ्गत्वे समेऽप्यन्नं भोज्यं मांसं न धार्मिकैः ।
भोग्या स्त्रीत्वाविशेषेऽपि जनैर्जायैव नाम्बिका ॥ १० ॥

टीका—भोज्यं भोक्तव्यं । किं तत्, अन्नं मुद्गादिधान्यं रसरक्तविकारजत्वा-भावात् । न तु भोज्यं । किं तत्, मांसं रसरक्तविकारजत्वात् । कैः, धार्मिकैः धर्ममहिंसारूपं चरद्भिः । क्व सति, प्राण्यङ्गत्वे जीवकायत्वे । किंविशिष्टे, समेऽपि

---

१ पञ्चेन्द्रियस्य कस्यापि वधे तन्मांसक्षणे ।
यथा हि नरकप्राप्ति-र्न तथा धान्यभोजनात् ॥
धान्यपाके प्राणिवधः परमेकोऽवशिष्यते ।
गृहिणां देशयमिनां स तु नात्यंतबाधकः ॥
मांसखादकगतिं विमृशंतः शस्यभोजनरता इह संतः ।
प्राप्नुवंति सुरसम्पदमुच्चै-र्जैनशासनजुषो गृहिणोऽपि ॥

अन्नमांसयोस्तुल्येऽपि, न च प्राणिकायत्वाद्धान्यस्यापि मांसत्वमुपकल्प्यं, यो यः प्राणिकायः स स मांसमिति व्याप्तेरभावात् । अन्यथा वृक्षत्वादशोकादीनामपि निम्बत्वकल्पनाप्रसङ्गात् । यतः भोग्या अनुभवनीया । काऽसौ, जायैव, न पुनरम्बिका माता भोग्या । कैर्जनैः लोकैः । क्व सति, स्त्रीत्वाविशेषेऽपि भार्यामात्रोः स्त्रीत्वे तुल्येऽपि ॥ १० ॥

अथ क्रमप्राप्तान्मधुदोषानाह—

मधुकृद्व्राताघातोत्थं मध्वशुच्यपि बिन्दुशः ।
खादन् बध्नात्यघं सप्त-ग्रामदाहांहसोऽधिकम् ॥ ११ ॥

टीका—बध्नाति आत्मना योजयति । कोऽसौ, पुमान् । किं तत् अघं पापं । कियत् अधिकं अतिरिक्तं । कस्मात् सप्तग्रामदाहांहसः ग्रामसप्तकदाहकपातकात् । किं कुर्वन्, खादन् भक्षयन् । किं तत्, मधु क्षौद्रं । किंमात्रमपि बिन्दुशः बिन्दुमात्रमपि । किंविशिष्टं, मधुकृतां मक्षिकाभ्रमरमशकादीनां मधुकरप्राणिनां व्रातः सङ्घस्तस्य घातो नाशस्तस्मादुत्था उत्पत्तिर्यस्य तन्मधुकृद्व्रातघातोत्थं । पुनः

१ मांसं जीवशरीरं जीवशरीरं भवेन्न वा मांसम् ।
यद्वन्निम्बो वृक्षो वृक्षस्तु भवेन्न वा निम्बः ॥

शुद्धं दुग्धं न गोमांसं वस्तुवैचित्र्यमीदृशं । विषघ्नं रत्नमाहेयं विषं च विपदे यतः ॥
हेयं पलं पयः पेयं समे सत्यपि कारणे । विषद्रोरायुषे पत्रं मूलं तु मृतये मतम् ॥

२ ग्रामसप्तकविदाहिरेफसा तुल्यता न मधुभक्षिरेफसः ।
तुल्यमञ्जलिजलेन कुत्रचि-न्निम्नगापतिजलं न जायते ॥
यश्चिखादिषति सारघं कुधी-र्मक्षिकागणविनाशनस्पृहः ।
पापकर्दमनिषेधनिम्नगा तस्य हन्त करुणा कुतस्तनी ? ॥
स्वयमेव विगलितं यद् गृहीतमथवा बलेन मिजगोलात् ।
तत्रापि भवति हिंसा तदाश्रयप्राणिनां घातात् ॥

३ अनेकजंतुसङ्घात-निघातनसमुद्भवम् ।
जगुप्सनीयं लालावत्कः स्वादयति माक्षिकम् ॥

माक्षिकागर्भसम्भूत-बालाण्डकानिपीडनात् । जातं मधु कथं संतः सेवंते कललाकृति ॥
एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः । यद्वमंति मधूच्छिष्टं तदश्नंति न धार्मिकाः

किंविशिष्टं, अशुचि प्राणिनिर्यासजन्यत्वान्मक्षिकादिवान्तत्वाच्चापवित्रं म्लेच्छ-लालादिसम्पृक्तत्वात् तुच्छं च ॥ ११ ॥

अथ क्षौद्रवन्नवनीतस्य दोषभूयिष्ठतया त्याज्यतामुपतिशति—

मधुवन्नवनीतं च मुञ्चेत्तत्रापि भूरिशः ।
द्विमुहूर्तात्परं शश्वत्संसजन्त्यंगिराशयः ॥ १२ ॥

टीका—मुञ्चेत् व्रतयेत् । कोऽसौ, धार्मिकः । किं तत्, नवनीतं च दधि-सारमपि । किंवत्, मधुवत् क्षौद्रं यथा । यतः संसजन्ति सम्मूर्छन्ति । के, अङ्गिगराशयः जीवसंघाताः । कियन्तो, भूरिशः प्रचुराः । क्व, तत्रापि न केवलं मधुनि नवनीतेऽपि । कथं, शश्वत् सदा । कथं, परम्, ऊर्ध्वं । कस्मात्, द्विमुहूर्तात् मुहूर्तद्वयात् ॥ १२ ॥

अथ पञ्चोदुम्बरभक्षणे द्रव्यभावहिंसादोषमुपपादयति—

पिप्पलोदुम्बरप्लक्ष-वटफल्गुफलान्यदन् ।
हन्त्यार्द्राणि त्रसान् शुष्का-ण्यपि स्वं रागयोगतः ॥ १३ ॥

टीका—हन्ति हिनस्ति । कोऽसौ, पुरुषः । कान्, त्रसान् स्थूलसूक्ष्मप्राणि-कुलाकुलत्वात्तेषाम् । किं कुर्वन्, अदन् भक्षयन् । कानि, पिप्पलादिफलानि ।

---

१ यन्मुहूर्तयुगतः परं सदा मूर्छति प्रचुरजीवराशिभिः ।
तद्गिलन्ति नवनीतमत्र ये ते व्रजन्ति खलु कां गतिं मृताः ॥
अंतर्मुहूर्तात्परतः सुसूक्ष्मा जंतुराशयः । यत्र मूर्छन्ति नाद्यं तन्नवनीतं विवेकिभिः ॥

२ अश्वत्थोदुम्बरप्लक्ष-न्यग्रोधादिफलेष्वपि ।
प्रत्यक्षाः प्राणिनः स्थूलाः सूक्ष्माश्चागमगोचराः ॥
ससंख्यजीवव्यपघातवृत्तिभिर्न धीवरैरस्ति समं समानता ।
अनंतजीवव्यपरोपकाणामुदुम्बराहारविलोलचेतसाम् ॥
मद्योदुम्बरपञ्चकामिषमधुत्यागाः कृपा प्राणिनां
नक्तंभुक्तिविमुक्तिराप्तविनुतिस्तोयं सुवस्त्रस्रुतम् ।
एतेऽष्टौ प्रगुणा गुणा गणधरैरागारिणां कीर्तिता
एकेनाप्यमुना विना यदि भवेद् भूतो न गेहाश्रमी ।

फल्गुरत्र काकोदुम्बरिका। किंविशिष्टानि, आर्द्राणि, न केवलमार्द्राणि तान्यदन् स्थूलसूक्ष्मप्राणिनो हन्ति, किं तर्हि, शुष्काण्यपि कालोच्छिन्नत्रसाण्यपि। तान्यदन् स्वमात्मानं हन्ति। कस्मात्, रागयोगतः प्रीतिसम्बन्धात्। अन्तर्दीपकत्वादिदं मध्वादिष्वपि योज्यम्। तत्रापि रागावतारद्वारेणात्मघातस्योक्तत्वात् ॥ १३ ॥

अथ निशाभोजनागालितजलोपयोगयोर्मद्याद्युपयोगवद्दोषमयत्वात्परिहारमाह

रागजीववधापाय-भूयस्त्वात्तद्वदुत्सृजेत् ।
रात्रिभक्तं तथा युंज्या-न्न पानीयमगालितम् ॥ १४ ॥

टीका—उत्सृजेद्वर्जयेद्धार्मिकः। किं तत्, रात्रिभक्तं रात्रावन्नप्राशनं। किंवत्, तद्वत् मद्यपानादिवत्। कस्मात् रागेत्यादि, रागश्च जीववधश्च अपायाश्च जलोदरादयस्ते भूयांसो दिनभोजनादतिशयेन बहवो यत्र तद्रागजीववधापायभूयस्तस्य भावस्तत्त्वं तस्मात् तथा न युञ्ज्यात् नोपयुञ्जीत। किं तत्, पानीयं जलं पेयत्वात्तैलघृतादि वा सर्वं द्रवद्रव्यं। किं विशिष्टं, मगालितं वस्त्रादपरिस्रुतम्।

साम्प्रतमनस्तमितभोजिनः सत्फलं किञ्चिद्दृष्टान्तेन मुग्धजनप्ररोचनार्थं प्रकटयति—

चित्रकूटेऽत्र मातंगी यामानस्तमितव्रतात् ।
स्वभर्त्रा मारिता जाता नागश्रीः सागराङ्गजा ॥ १५ ॥

टीका—जाता उत्पन्ना। काऽसा, मातङ्गी अन्तेवासिनी। किंविशिष्टा, सागराङ्गजा सागरदत्तश्रेष्ठिपुत्री। किंनाम्नी, नागश्रीः। क्व, चित्रकूटे। किंविशिष्टे, ऽत्र एतस्मिन्नेव मालवदेशस्योत्तरस्यां दिशि प्रसिद्धे। कस्मात्, यामानस्तमितव्रतात् यामं प्रहरमात्र पालितादनस्तमितभोजननियमात्। किंविशिष्टा सती मारिता। केन स्वभर्त्रा जागरिकनाम्ना ॥ १५ ॥

एवं कृतपरिकर्मणा पाक्षिकश्रावकेण स्थूलहिंसादिविरतिरपि यथात्मशक्ति भावनीयेत्युपदेशार्थमाह—

१ अर्कालोकेन विना भुंजानः परिहरेत्कथं हिंसाम् ।
अपि बोधितप्रदीपो भोज्यजुषां सूक्ष्मजीवानाम् ॥

स्थूलहिंसानृतस्तेय-मैथुनग्रन्थवर्जनम् ।
पापभीरुतयाऽभ्यस्ये-द्बलवीर्यनिगूहकः ॥ १६ ॥

टीका—अभ्यसेद्भावयेत् । कोऽसौ, श्रावकः । किं तत्, स्थूलेत्यादि, वक्ष्यमाणलक्षणं स्थूलहिंसादिविरतिरूपमणुव्रतपञ्चकं । कया, पापभीरुतया, न तु राजादिभयेन, ततस्तदभ्यासे कर्मक्षपणाऽनिष्टेः । किंविशिष्टः सन्, बलवीर्यनिगूहकः बलमाहारादिजा शक्तिः सैव नैसर्गिकं वीर्यं तयोर्निगूहकस्तदनुसारीत्यर्थः ॥ १६ ॥

एवं हि स्थूलहिंसाविरतिमभ्यस्यता वेश्यादाविव द्यूतेऽप्यासक्तिर्न कर्तव्येत्युपदिशति—

द्यूते हिंसानृतस्तेय-लोभमायामये सजन् ।
क्व स्वं क्षिपति नानर्थे वेश्याखेटान्यदारवत् ॥ १७ ॥

टीका—क्वानर्थे न क्षिपति, सर्वस्मिन्धर्मादिभ्रंशे व्यापारयतीत्यर्थः । कं, स्वं आत्मानं जातिं च । किं कुर्वन्, सजन्, गृद्धिं कुर्वन्, कौतुकमात्रेण द्यूतक्रीडनस्य पाक्षिकेण त्यक्तुमशक्यत्वादेवमुच्यते । क्व सजन्, द्यूते । किंविशिष्टे हिंसा प्राणातिपातः, अनृतमसत्यवचनं, स्तेयं चौर्यं, लोभो गार्ध्यं, माया वञ्चना ताः प्रकृताः प्राचुर्येण कृता अस्मिन्निति हिंसादिमये । किंवत्, वेश्यायामाखेटे परदारेषु च यथा । वेश्यादिष्वपि हिंसादिमयत्वादासजतः स्वस्य ज्ञातीनां च पुरुषार्थभ्रंशस्य सुप्रसिद्धत्वात् ॥ १७ ॥

---

१ सर्वानर्थप्रथनं मथनं शौचस्य सद्म मायायाः ।
दूरात्परिहर्तव्यं चौर्यासत्यास्पदं द्यूतम् ॥

२ कौपीनं वसनं कदन्नमशनं शय्या धरा पांसुला
जल्पाश्लीलगिरः कुटुम्बकजनद्रोहः सहाया विटाः ।
व्यापाराः परवञ्चनानि सुहृदश्चौरा महान्तो द्विषः
प्रायः सैष दुरोदरव्यसनिनः संसारवासक्रमः ।

अथ प्रतिपाद्यानुरोधाद्धर्माचार्याणां सूत्राविरोधेन देशनानानात्वोपलम्भाद्भग्यन्तरेणाष्टमूलगुणानुद्देष्टुमाह—

मद्यपलमधुनिशाशनपञ्चफलीविरतिपञ्चकाप्तनुती ।
जीवदया जलगालनमिति च क्वचिदष्टमूलगुणाः ॥ १८ ॥

टीका—वर्तन्ते । के, मूलगुणाः । कति, अष्टौ । क्व, क्वचित् शास्त्रे । कथं, मद्येत्यादि, पञ्चफली पञ्चानां फलानां समाहारः पिप्पलादिफलपञ्चकमित्यर्थः, तद्विरतिरेक एवात्र मूलगुणः, आप्तनुतिः त्रिकालदेववन्दना, मद्यं च पलं च मधु च निशाशनं च पञ्चफली च ताभ्यः पञ्चभ्यो विरतस्यतासां पञ्चकं, तच्चाप्तनुतिश्च ते द्वे, जीवदया अनुकम्पा, जलगालनं चेति ॥ १८ ॥

प्रकृतमुपसंहरन् सार्वकालिकसम्यक्त्वशुद्धिपूर्वकमद्यादिविरतिकृतां कृतोपनीतीनां ब्राह्मणक्षत्रियविशां जिनधर्मश्रुत्यधिकारितामाविष्कर्तुमाह—

यावज्जीवमिति त्यक्त्वा महापापानि शुद्धधीः ।
जिनधर्मश्रुतेर्योग्यः स्यात्कृतोपनयो द्विजः ॥ १९ ॥

टीका—स्याद्भवेत् । कोऽसौ, द्विजः द्विर्जातो मातृगर्भे जिनसमयज्ञानगर्भे चोत्पादात् द्विजो ब्राह्मणक्षत्रियविशामन्यतमः ‘ त्रयो वर्णा द्विजातय ’ इति वचनात् । किंविशिष्टः, कृतोपनयः कृतो यथाविष्णुपकल्पित उपनयो मौञ्जीबन्धादिलक्षणोपनीतिक्रिया यस्य स तथोक्तः । किंविशिष्टः स्यात्, योग्योऽधिकारी । कस्या, जिनधर्मश्रुतेः वीतरागसर्वज्ञोपदिष्टस्य धर्मस्य श्रुतिः श्रवणं शास्त्रं वा उपासकाध्ययनादि तस्याः । किं कृत्वा, शुद्धधीः सम्यक्त्वविशुद्धबुद्धिः सन् । त्यक्त्वा । कानि, महापापानि महद्विपुलमनन्तसंसारकारणं पापं येभ्यस्तानि मद्यपानादीनि प्राक्प्रबन्धेनोक्तानि । कथं यावज्जीवं जीविताववधि । कथं, इति अनेन प्रकारेण ॥ १९ ॥

---

१ अष्टावनिष्टदुस्तरदुरितायतनान्यमून परिवर्ज्य ।
जिनधर्मदेशनाया भवन्ति पात्राणि शुद्धाधियः ॥

सहजामहार्यां चालौकिकीं गुणसम्पदमुद्वहतो भव्यान् यथासम्भवमवगमयन्नाह—

जाता जैनकुले पुरा जिनवृषाभ्यासानुभावाद्गुणै
र्येऽयत्नोपनतैः स्फुरन्ति सुकृतामग्रेसराः केऽपि ते ।
येऽप्युत्पद्य कुदृक्कुले विधिवशाद्दीक्षोचिते स्वं गुणै-
र्विद्याशिल्पविमुक्तवृत्तिनि पुनन्त्यन्वीरते तेऽपि तान् ॥२०॥

टीका—सन्ति । के ते, केऽपि प्रविरलाः सम्प्रति बहूनामभावात् । किंविशिष्टा, अग्रेसराः सम्यक्त्वसहचारिपुण्योदयोन्मुख्याः । केषां, सुकृतां कृतपुण्यानां । ये किं, ये स्फुरन्ति लोकचित्ते चमत्कारं कुर्वन्ति । कैः, गुणैः सम्यक्त्वादिभिः । किंविशिष्टै, यत्नोपनतैः प्रयत्नमन्तरेण प्राप्तैः सहजैरित्यर्थः । किंविशिष्टाः सन्तो, जाता उत्पन्नाः । क्व, जैनकुले जिनो देवता येषां ते जैनास्तेषां कुलं पूर्वपुरुषपरम्पराप्रभवो वंशस्तत्र, जिनोक्तगर्भाधानादिनिर्वाणपर्यन्तक्रियामंत्रसंस्कारयोग्ये महान्वय इत्यर्थः । कस्मात्, पुरा पूर्वजन्मनि जिनवृषस्य सर्वज्ञोक्तधर्मस्याभ्यासः असकृत्प्रवृत्तिस्तस्यानुभावो माहात्म्यं तज्जनितपुण्योदयस्तस्मात् । तथा अन्वीरतेऽनुगच्छन्ति । के, तेऽपि । कान्, तान् पूर्वोक्तान् जैनकुलजातान्, तत्सदृशा भवन्तीत्यर्थः । ये किं, ये पुनन्ति पवित्रीकुर्वन्ति । कं, स्वमात्मानं । कैः, गुणैः वक्ष्यमाणतत्वार्थप्रतिपत्त्यादिभिः । किं कृत्वा, उत्पद्य जनित्वा । क्व, कुदृक्कुलेऽपि मिथ्यादृष्टिवंशेऽपि । अपिरत्र विस्मये भिन्नक्रमः । किंविशिष्टे, दीक्षोचिते दीक्षा व्रताविष्करणं व्रतोन्मुखस्य वृत्तिरिति यावत्, सा चात्रोपासकदीक्षा जिनमुद्रा वा उपनीत्यादिसंस्कारो वा । पुनः किंविशिष्टे, विद्याशिल्पविमुक्तवृत्तिनि विद्याऽत्राजीवनार्थं गीतादि-शास्त्रं, शिल्पं कारुकर्म, ताभ्यां विमुक्ता ततोऽन्या वृत्तिर्वार्ता कृष्यादिलक्षणो जीवनोपायो यत्र तस्मिन् । कस्मात्, विधिवशात् मिथ्यात्वसहचारिपुण्योदययोगात् ॥२०॥

इदानीं द्विजातिषु कुलक्रमायातमिथ्याधर्मपरिहारेण विधिवज्जिनोक्तमार्गमाश्रित्य स्वाध्यायध्यानबलादशुभकर्माणि निघ्नन्तं भव्यमभिष्टौति—

तत्त्वार्थं प्रतिपद्य तीर्थकथनादादाय देशव्रतं
तद्दीक्षाग्रधृतापराजितमहामन्त्रोऽस्तदुर्दैवतः ।
आङ्गं पूर्वमथार्थसंग्रहमधीत्याधीतशास्त्रान्तरः
पर्वान्ते प्रतिमासमाधिमुपयन्धन्यो निहन्त्यंहसी ॥ २१ ॥

टीका—निहन्ति नाशयति । कोऽसौ, धन्यः सुकृती । के, अंहसी द्रव्य-भावपापे इत्यर्थः । किं कुर्वन्, उपयन् अभ्यस्यन् । कं, प्रतिमासमाधिं रात्रि-प्रतिमायोगं । क्व, पर्वान्ते पर्वणां मासि मासि द्वयोरष्टम्योर्द्वयोश्चतुर्दश्योरन्ते अवसाने रात्रावित्यर्थः । किंविशिष्टः सन्, अधीतशास्त्रान्तरः अधीतानि विपठितानि शास्त्रान्तराणि सौगतादिग्रन्था व्याकरणादीनि च येनासौ । किं कृत्वा, अधीत्य पठित्वा । कम्, अर्थसंग्रहं उद्धारग्रन्थमुपश्रुत्य, सूत्रमपि किंविशिष्ट, माङ्गं आचाराङ्गादिद्वादशाङ्गश्रितं, न केवलमाङ्गं, पौर्वं च चतुर्दशपूर्वगतश्रुताश्रितम् । अथ शब्दोऽत्र चार्थे । किम्भूतो भूत्वा, अस्तदुर्दैवतः त्यक्तमिथ्यादेवतागणः । पुनः किंविशिष्टो भूत्वा, तदित्यादि, तस्य देशव्रतस्य दीक्षा अग्रं पूर्वं यस्य तत्तद्दीक्षाग्रं उपासकदीक्षापूर्वकं धृतो गुरुमुखाद्धारितोऽपराजितो नाम महान् गणधरदेवादीनां पूज्यो मन्त्रः पञ्चनमस्काराख्यो येन स तद्दीक्षाग्रधृतापराजितमहामंत्रः । किं कृत्वा, आसाद्य लब्ध्वा । किं तत् देशव्रतं तद्दीक्षामूलगुणाष्टकादिकं । किं कृत्वा, प्रतिपद्य निश्चित्य । कं, तत्वार्थं जीवादिकं । कस्मात्, तीर्थकथनात् तीर्थस्य धर्माचार्यस्य गृहस्थाचार्यस्य वा कथनाद्वाक्यप्रबन्धात् । एता अष्टौ मिथ्यादृशो दीक्षान्वयक्रियाः क्रमेण संक्षेपादत्रोक्ता विस्तरतस्तु ज्ञानप्रदीपिकायामार्षे वा द्रष्टव्याः । अत्रार्षोक्तः श्लोको यथा—

अवतारो[1] वृत्तलाभः[2] स्थानलाभो गणग्रहः ।
पूजाराध्य पुण्ययज्ञो दृढचर्योपयोगिता ॥

---

१ गुरुर्जनयिता तत्व—ज्ञानं गर्भः सुसंस्कृतः ।
तथा तत्रावतीर्णोऽसौ भव्यात्मा धर्मजन्मना ॥

२ ततोऽस्य वृत्तलाभः स्यात्तदैव गुरुपादयोः । प्रणतस्य व्रतव्रातं विधानेनोपसेदुषः ।

३ ततः कृतोपवासस्य पूजाविधिपुरस्सरम् ।
स्थानलाभो भवेदस्य तत्रायमुचितो विधिः ॥
जिनालये शुचौ रंगे पद्ममष्टदलं लिखेत् ।
विलिखेद्वा जिनास्थान-मण्डलं समवृत्तकम् ॥
श्लक्ष्णेन पिष्टचूर्णेन सलिलालोडितेन वा ।
वर्तनं मण्डलस्येष्टं चन्दनादिद्रवेण वा ॥
तस्मिन्नष्टदले पद्मे जैने वाऽऽस्थानमण्डले ।
विधिना लिखिते तज्ज्ञै-र्विष्वग्विरचितार्चने ॥
जिनार्चाभिमुखं सूरि-र्विधिनैनं निवेशयेत् ।
तवोपासकदीक्षेय-मिति मूर्ध्नि मुहुः स्पृशन् ॥
पञ्चमुष्टिविधानेन स्पृष्ट्वैनमधिमस्तकम् ।
पूतोऽसि दीक्षयेत्युक्त्वा सिद्धशेषं च लम्भयेत् ॥
ततः पञ्चनमस्कार-पदान्यस्मायुपादिशेत् ।
मन्त्रोऽयमखिलात्पापा—त्त्वां पुनीतादितीरयन् ॥
कृत्वा विधिमिमं पश्चात्पारणाय विसर्जयेत् ।
गुरोरनुग्रहात्सोऽपि सम्प्रीत स्वं गृहं व्रजेत् ॥
४ इयन्तं कालमज्ञानात्पूजिताःस्थ कृतादरम् ।
पूज्यास्त्विदानीमस्माभि—रस्मत्समयदेवताः ॥
ततोऽपमृषितेनाल-मन्यत्र स्वैरमास्यताम् ।
इति प्रकाशमेवैता नीत्वान्यत्र क्वचित्त्यजेत् ॥
गणग्रहः स एषः स्यात्प्राक्तनं देवतागणम् ।
विसृज्यार्चयतः शान्ता देवताः समयोचिताः ॥
५ पूजाराध्याख्यया ख्याता क्रियाऽस्य स्यादतः परा ।
पूजोपवाससम्पत्या शृण्वतोऽङ्गार्थसंग्रहम् ॥
६ ततोऽन्या पुण्ययज्ञाख्या क्रिया पुण्यानुबन्धिनी ।
शृण्वतः पूर्वविद्याना—मर्थं सब्रह्मचारिणः ॥
७ तदास्य दृढचर्याख्या क्रिया स्वसमयश्रुतम् ।
निष्ठाप्य शृण्वतो ग्रन्थान्बाह्यानन्यांश्च कांश्चन ॥
८ दृढव्रतस्य तस्यान्या क्रिया स्यादुपयोगिता ।
पर्वोपवासपर्यन्ते प्रतिमायोगधारणम् ॥

अथ शूद्रस्याप्याहारादिशुद्धिमतो ब्राह्मणादिवद्धर्मक्रियाकारित्वं यथोचितमनुमन्यमानः प्राह —

शूद्रोऽप्युपस्कराचारवपुःशुध्याऽस्तु तादृशः ।
जात्या हीनोऽपि कालादिलब्धौ ह्यात्माऽस्ति धर्मभाक् ॥२२॥

टीका—अस्तु भवतु । कोऽसौ, शूद्रोऽपि । किंविशिष्ट,-स्तादृशो जिनधर्मश्रुतेर्योग्यः । किंविशिष्टः सन्, उपस्करः आसनाद्युपकरणं, आचारः मद्यादि वरतिः, वपुः शरीरं, तेषां त्रयाणां शुध्या पवित्रतया विशिष्टः । कुत इत्याह—जात्येत्यादि, हि यस्मादस्ति भवति । कोऽसौ, आत्मा जीवः । किंविशिष्टो, धर्मभाक् श्रावकधर्माराधकः । कस्यां सत्यां, कालादिलब्धौ कालादीनां कालदेशादीनां लब्धौ धर्माराधनयोग्यतायां सत्यां । किंविशिष्टोऽपि हीनो रिक्तोऽल्पो वा, किं पुनरुत्कृष्टो मध्यमो वेत्यपिशब्दार्थः । कया, जात्या वर्णसम्भूत्या । वर्णलक्षणमार्षे यथा——

> जातिगोत्रादिकर्माणि शुक्लध्यानस्य हेतवः ।
> येषु ते स्युस्त्रयोवर्णाः शेषाः शूद्राः प्रकीर्तिताः ।

इत्थमानृशंस्यममृषाभाषित्वं परस्वनिवृत्तिरिच्छानियमो निषिद्धासु च स्त्रीषु ब्रह्मचर्यमिति सर्वसाधारणधर्ममभिधायेदानीमध्ययनं यजनं दानं ब्राह्मणक्षत्रियविशां समानो धर्मोऽध्यापनयाजनप्रतिग्रहाश्च ब्राह्मणानामेवेति विशेषतस्तद्व्याख्यानार्थमुत्तरप्रबन्धमुपक्रममाणो यजनादिविधानाय पाक्षिकं तावदेवं नियुंक्ते—

यजेत देवं सेवेत गुरून्पात्राणि तर्पयेत् ।
कर्म धर्म्यं यशस्यं च यथालोकं सदा चरेत् ॥ २३ ॥

टीका—यजेत पूजयेत् । कोऽसौ, श्रावकः । कं, देवं दीव्यते स्तूयते इंद्रादिभिरिति देवः परमात्मा तं । तथा सेवेत उपासीत । कोऽसौ, श्रावकः । कानि, पात्राणि संपूज्यमानमोक्षकारणगुणान् । तथा आचरेत् अनुतिष्ठेत् । कोऽसौ, श्रावकः । किं तत्, कर्म भृत्वाऽऽश्रितानित्यादिना वक्ष्यमाणं । किंविशिष्टं, धर्म्यं

दयाप्रधानत्वाद्धर्मादनपेतं, न केवलं धर्म्यं यशस्यं च धर्म्यं तावदवश्यमाचरणीयं तच्चेत्कीर्त्यर्थं स्यात्तदा सुतरां भद्रकमित्ययमर्थश्चशब्देनान्वाचीयते। अनुक्तसमुच्चये वाऽत्र चः तेनायुष्यं च कर्म ब्राह्ममुहूर्तोत्थानशरीरचिन्तादन्तधावनादिकर्मायुर्वेद-प्रसिद्धमाचरेदिति लभ्यते। कथं, यथालोकं लोकस्यानतिक्रमेण लोकानुसारेणेत्य-र्थः। यो य आलोक आप्तोपदेशप्रकाशस्तेन तेन तत्तत्कर्माचरेदिति ग्राह्यम्। कथं, सदा नित्यम् ॥ २३ ॥

इतोऽष्टादशभिः पद्यैर्जिनपूजां प्रपञ्चयति—

यथाशक्ति यजेतार्हद्देवं नित्यमहादिभिः।
सङ्कल्पतोऽपि तं यष्टा भेकवत्स्वर्महीयते ॥ २४ ॥

टीका—यजेत्। कोऽसौ श्रावकः। कं, अर्हद्देवं। कथं, यथाशक्ति या या शक्ति-स्तया। कैः,—नित्यमहादिभिः वक्ष्यमाणैः। यतो महीयते पूज्यो भवति। कोऽसौ, जीवः। किंविशिष्टो, यष्टा ताच्छील्येन साधुत्वेन वा यजमानः। कं, तं अर्हद्देवं। कस्मात्सङ्कल्पतोऽपि यजेऽहमर्हद्देवमिति चिन्तनात्, किं पुनः कायेन गंधाक्षदि-भिर्वाचाता च विचित्रस्तवनैरुपचरन्नित्यपिशब्दार्थः। क्व महीयतेऽसौ, स्वः स्वर्गे महर्द्धिकदेवैः स्वामीति मत्वा पूज्यत इत्यर्थः। किंवत्, भेकवत् राजगृहनगरे श्रेष्ठिचरो दर्दुरो यथा ॥ २४ ॥

अथ नित्यमहमाह—

प्रोक्तो नित्यमहोऽन्वहं निजगृहान्नीतेन गन्धादिना
पूजा चैत्यगृहेऽर्हतः स्वविभवाच्चैत्यादिनिर्मापणम्।

---

१ दानं पूजा जिनः शील-मुपवासश्चतुर्विधः।
श्रावकाणां मतो धर्मः संसारारण्यपावकः ॥
आराध्यन्ते जिनेन्द्रा गुरुषु च विनतिर्धार्मिके प्रीतिरुच्चैः
पात्रेभ्यो दानमापन्निहतजनकृते तच्च कारुण्यबुध्द्या।
तत्वाभ्यासः स्वकीयव्रतरतिरमलं दर्शनं यत्र पूज्यं
तद्गार्हस्थ्यं बुधानामितरदिह पुनर्दुःखदो मोहपाशः ॥

भक्त्या ग्रामगृहादिशासनविधादानं त्रिसन्ध्याश्रया
सेवा स्वेऽपि गृहेऽर्चनं च यमिनां नित्यप्रदानानुगम् ॥२५॥

टीका—प्रोक्तः प्रवचने कथितः । कोऽसौ, नित्यमहः । किं, पूजा । कस्य, अर्हत. क्व, चैत्यगृहे । केन, गन्धादिना चन्दनाक्षतपुष्पादिना । किंविशिष्टेन, नीतेन चैत्यालयं प्रापितेन । कस्मा,-न्निजगृहात् । कथ, मन्वहं दिने दिने । तथा प्रोक्तो नित्यमहः । किं तत्, चैत्यादिनिर्मापणं चैत्यचैत्यालयादिनिष्पादनं । कस्मात्, स्वविभवात् निजधनविनियोगात् । तथा प्रोक्तो नित्यमहः । किं तत्, ग्रामगृहादिशासनविधादानं ग्रामः संवसथः, गृहं वेश्म आदिशब्दात्क्षेत्रहट्टादिपरिग्रहः, ग्रामगृहादेः शासनविधया शासनविधानेन दानं । कया, भक्त्या । तथा प्रोक्तो नित्यमहः किं, सेवा आराधना । कस्य, अर्हतः । किंविशिष्टा, त्रिसन्ध्याश्रया त्रैकालिकी । क्व, गृहे । किंविशिष्टे, स्वे निजे, अपिशब्दाच्चैत्यगृहे च । न केवलमर्हत्पूजादिकं नित्यमहः प्रोक्तः, अर्चनं च पूजा । केषां, यमिनां संयतानां किंविशिष्टं, नित्यप्रदानानुगं अहरहः प्रकृष्टदानसम्बन्धि ॥ २५ ॥

अथाष्टान्हिकैन्द्रध्वजौ लक्षयति—

जिनार्चा क्रियते भव्यै-र्या नन्दीश्वरपर्वणि ।
अष्टाह्निकोऽसौ सेन्द्राद्यैः साध्या त्विन्द्रध्वजो महः ॥२६॥

टीका—प्रोक्तः सूरिभिः । कोसा,-वसौ महः । किमाख्यः, आष्टान्हिकः । या किं, या क्रियते । का,—सौ जिनार्चा अर्हत्पूजा । कै,—र्भव्यैर्भावुकलोकैः सम्भूयकरणज्ञापनार्थं बहुवचनं । क्व, नन्दीश्वरपर्वणि प्रतिवर्षमाषाढकार्तिकफाल्गुनसितपक्षेष्वष्टम्यादिदिनाष्टके । तथा प्रोक्तः । कोऽसौ, इन्द्रध्वजाख्यो महः । काऽसौ, सा जिनार्चा । किंविशिष्टा, साध्या क्रियमाणा । कै,-रिंद्राद्यैः इन्द्रप्रतीन्द्रसामानिकादिभिः । तुर्विशेषे ॥ २६ ॥

अथ महामहं निर्दिशति—

भक्त्या मकुटबद्धैर्या जिनपूजा विधीयते ।
तदाख्याःसर्वतोभद्र-चतुर्मुखमहामहाः ॥ २७ ॥

टीका—भवन्ति । का,-स्तादाख्याः तस्या जिनपूजाया आख्या नामानि किं किं, सर्वतोभद्र इति, चतुर्मुख इति, महामह इति च तिस्रोऽन्वर्थाः तत्र सर्वत्र प्राणिवृन्दे कल्याणकरणात्सर्वतोभद्रः, चतुर्मुखमण्डपे विधीयमानत्वाच्चतुर्मुखः, अष्टान्हिकापेक्षया गुरुत्वान्महामहः । या किं, जिनपूजा विधीयते । कैः,—मकुटबद्धैर्मकुटानि बद्धानि सामान्तादिभिर्येषां ते मकुटबद्धा मण्डलेश्वरास्तैः । कया, भक्त्या, न तु चक्रवर्त्यादिभयादिना । एषोऽपि कल्पवृक्षवत् केवलमत्र प्रतिनियतजनपदविषयं दानादिकम् ॥ २७ ॥

अथ कल्पवृक्षमहमाह—

किमिच्छकेन दानेन जगदाशाः प्रपूर्य यः ।
चक्रिभिः क्रियते सोऽर्हद्यज्ञः कल्पद्रुमो मतः ॥ २८ ॥

टीका—मतः पूर्वाचार्यैः सम्मतः । कोऽसौ, सोऽर्हद्यज्ञः । किमाख्यः, कल्पद्रुमः कल्पवृक्षनामा । यः किं, यः क्रियते । कैः,—श्चक्रिभिः सम्राड्भिः । किं कृत्वा, प्रपूर्य प्रकर्षेण पूरयित्वा । काः, जगदाशाः लोकानां मनोरथान् । केन, दानेन त्यागेन । किंविशिष्टेन, किमिच्छकेन किमिच्छसीति प्रश्नपूर्वकं याचकेच्छानुरूपं क्रियमाणेन ॥ २८ ॥

सम्प्रति बलिस्नपनादिजिनपूजाविशेषाणां नित्यमहादिष्वेवान्तर्भावमाह—

बलिस्नपननाट्यादि नित्यं नैमित्तिकं च यत् ।
भक्ताः कुर्वन्ति तेष्वेव तद्यथास्वं विकल्पयेत् ॥ २९ ॥

टीका—विकल्पयेत् नित्यमहादीनामेव भेदमाचक्षीत विद्वान् । किं, तत् तत् । केषु, तेष्वेव नित्यमहादिषु । कथं, यथास्वं यथायोग्यं । यत्किं, यत्कुर्वन्ति निर्वर्तयन्ति । के ते, भक्ता भक्तिमन्तः । किं तत्, बलिस्नपननाट्यादि, बलिरुपहारः, स्नपनमभिषेकः, नाट्यं गीतनृत्यवाद्यं, आदिशब्दात्प्रतिष्ठारथयात्रादि । किंविशिष्टं, नित्यं प्रत्यहविधेयं । तथा नैमित्तिकं पर्वकर्तव्यम् ॥ २९ ॥

इदानीं जलादिपूजानां प्रत्येकं फलमालपति—

वार्धारा रजसः शमाय पदयोः सम्यक्प्रयुक्तार्हतः ।
सद्गन्धस्तनुसौरभाय विभवाच्छेदाय सन्त्यक्षताः ।

यष्टुः स्रग्दिविजस्रजे चरुरुमास्वाम्याय दीपस्त्विषे
धूपो विश्वदृगुत्सवाय फलमिष्टार्थाय चार्घाय सः ३० ॥

टीका- भवति। काऽसौ, वार्धारा वारो जलस्य धारा स्रुतिः। कस्मै, शमाय अनुद्रेकाय। कस्य, रजसः पापस्य ज्ञानदृगावरणकर्मणोर्वा। कस्य, यष्टुरात्मनः पूजयितुः। किंविशिष्टा सती, प्रयुक्ता सम्पादिता। कयोः, पदयोश्चरणयोः। कस्य, अर्हतो जिनेन्द्रस्य। कथं, सम्यक् यथोक्तविधानेन। तथा भवति। कोऽसौ, सद्गन्धः श्रीचन्दनद्रवः। कस्मै, तनुसौभाय शरीरसौगन्ध्यनिमित्तम्। कस्य, यष्टुः। किंविशिष्टः सन्, अर्हतः पदयोः सम्यक् प्रयुक्तः। तथा सन्ति भवन्ति। के, अक्षताः अखण्डतण्डुलाः। कस्मै, विभवाच्छेदाय विभवस्याणिमादिविभूतेर्द्रविणस्य वाऽच्छेदो निरन्तरः वृत्तिस्तदर्थं। शेषं पूर्ववत्। तथा भवति कासौ स्रक् पुष्पमाला। कस्यै दिविजस्रजे स्वर्गजन्ममन्दारमालार्थं। तथा भवति। कोऽसौ, चरुः नैवद्यं। कस्मै, उमास्वाम्याय लक्ष्मीपतित्वार्थं। तथा भवति। कोऽसौ, दीपः आरातिंकं। कस्यै, त्विषे दीप्त्यर्थं। तथा भवति। कोऽसौ, धूपः। किंविशिष्टः, अर्हतः पदयोः सम्यक्प्रयुक्तः। कस्मै, विश्वदृगुत्सवाय यष्टुः परमसौभाग्यार्थं। तथा भवति। किं तत्, फलं बीजपूरादि। कस्मै, इष्टार्थायाभिमतवस्तुप्राप्त्यर्थं। तथा भवति। कोऽसौ, सः श्रुतत्वादर्घः पुष्पाञ्जलिरित्यर्थः। कस्मै भवत्यर्घाय पूजाविशेषार्थं। अथवा स इत्यनेन पूर्वोक्त इष्टार्थ एव परामृश्यते तेनायमर्थः कथ्यते। यद्यद्यष्टुरात्मनोऽभिमतं वस्तु गीतादिकं तेन जिने सम्यक्प्रयुक्ते तत्तद्विशिष्टगीतादिवस्तुनोऽर्घाय मूल्याय स्यात्तत्सम्पादयतीत्यर्थः॥ ३०॥

अथ जिनेज्यायाः सम्यक्प्रयोगविध्युपदेशपुरस्सरं लोकोत्तरं फलविशेषमाविष्करोति——

चैत्यादौ न्यस्य शुद्धे निरुपरमनिरौपम्यतत्तद्गुणौघ-
श्रद्धानात्सोऽयमर्हन्निति जिनमनघैस्तद्विधोपाधिसिद्धैः।
नीराद्यैश्चारुकाव्यस्फुरदनणुगुणग्रामरज्यन्मनोभि-
र्भव्योऽर्चन् दृग्विशुद्धिं प्रबलयतु यया कल्पते तत्पदाय ॥३१॥

टीका—प्रबलयतु प्रबलां प्रकृष्टस्वफलदानसमर्थां करोतु। कोऽसौ, भव्यो भाक्तिकः। कां, दृग्विशुद्धिं शङ्कादिदोषरहिततत्त्वश्रद्धानं। किं कुर्वं, अर्चन् पूजयन्। कं, जिनं कैः,-नीराद्यैः जलगन्धाक्षतादिभिः। किंविशिष्टैः, रनघैः हठहृतत्वाहृद्यत्वस्वान्यभुक्तशेषत्वादिपापहेतुदोषमुक्तैः। पुनः किंविशिष्टैः-तद्विधोपाधिसिद्धैः निष्पापसाधननिष्पन्नैः। पुनरपि किंविशिष्टैः, चार्वित्यादि-चारूणि दोषनिरासाद्गुणालङ्कारस्वीकाराच्च सहृदयहृदयावर्जकानि. काव्यानि लोकोत्तरवर्णनारमणीयगद्यपद्यवाङ्मयानि, अनणुगुणग्रामा अनणूनां महतां गुरूणां गुणानां निसर्गनिर्मलत्वसौरभ्यातिशयादीनां ग्रामाः सङ्घाताः, चारु-काव्यैः स्फुरन्तो भावुकलोकचित्तेषु चमत्कुर्वन्तोऽनणुगुणग्रामास्तै रज्यन्ति प्रियमाणानि मनांसि येषु तानि तैः। किं कृत्वा अर्चन्, न्यस्य सोऽयमर्हन्निति उत्सर्पणतृतीयचतुर्थकालयोर्यश्चतुस्त्रिंशदतिशयसमेतः समवसृ-तावष्टमहाप्रातिहार्यविराजितस्तत्त्वोपदेशेन भव्यलोकं पुनीतवान् सोऽर्हन्न-वायमिति नामस्थापनाद्रव्यभावैः स्थापयित्वा। कं, जिनं। क, चैत्यादौ चैत्ये प्रतिमायां, आदिशब्देन तदलाभे जिनाकाररहितेऽप्यक्षतादौ। किंविशिष्टे, शुद्धे निर्दोषे रुद्राकाररहिते इत्यर्थः। कस्मा,—त्निरित्यादि, निरुपरमा अविन-श्वरा निरौपम्या असाधारणास्तद्गुणा व्यवहारेण दर्शनविशुध्द्यादिभावना-प्रमुखकल्याणपञ्चकलक्षणा निश्चयेन चिदचिद्ज्ञेयद्रव्याकारविशेषस्वरूपास्ते षामोघे समूहे श्रद्धानं रुचिरतरोऽनुरागस्तस्मात्। इत्थं तां दृग्विशुद्धिं प्रबलयतु भव्यो यया दृग्विशुध्द्या प्रबलीकृतया कल्प्यते सम्पद्यते भव्यः। कस्मै, तत्पदाय तीर्थकरत्वाय। एकस्या अपि दृग्विशुद्धेरुत्कर्षस्य तीर्थकरत्वा ख्यपुण्यविशेषबन्धहेतुत्वप्रसिद्धेः॥ ३१॥

अधुना व्रतभूषितस्य जिनयष्टुरिष्टफलविशेषमभिधत्ते——

दृक्पूतमपि यष्टार-मर्हतोऽभ्युदयश्रियः।
श्रयन्त्यहम्पूर्विकया किं पुनर्व्रतभूषितम्॥ ३२॥

टीका—श्रयन्ति आश्रयन्ति। का, अभ्युदयश्रियः पूजार्थाज्ञैश्वर्यविशि-ष्टबलपरिजनकामभोगसम्पदः। कं, यष्टारं पूजकं। कस्य, अर्हतः। किंविशिष्टं, दृक्पूतमपि सम्यक्त्वविशुद्धं। अपिर्विस्मये। कया, अहम्पूर्विकया अहं

पूर्वमह पूर्वमित्यहम्पूर्विका तया अहंप्रथमिकया । किंपुन,—विशेषात् श्रयन्ति । का, अभ्युदयश्रियः । कं अर्हतो यष्टारं । किंविशिष्टं, व्रतैर्दैशतो हिंसादिविरतिलक्षणैर्भूषितमलकृतम् ।। ३२ ।।

जिनपूजान्तरायपरिहारोपायविधिमाह—

यथास्वं दानमानाद्यैः सुखीकृत्य विधर्मणः ।
सधर्मणः स्वसात्कृत्य सिध्यर्थी यजतां जिनम् ।। ३३ ।।

टीका—यजतां पूजयतु । कोऽसौ, सिद्ध्यर्थी जिनपूजासम्पूर्णतां स्वात्मोपलब्धिं वा अभीप्सुः । कं, जिनं । किं कृत्वा, स्वसात्कृत्य स्वाधीनान् कृत्वा । कान्, सधर्मणः जिनधर्मभावितान् । किं कृत्वा, सुखीकृत्य अनुकूलान् कृत्वा कान्, विधर्मणः शिवादिधर्मरतान् सर्वधर्मबाह्यान् वा । कैः यथास्वं यथायोग्यं । दानमानाद्यैः अर्थविनियोगसत्काराभ्युत्थानासनप्रदानादिभिरावर्जनोपायैः ।। ३३ ।।

स्नानापास्तदोषस्यैव गृहस्थस्य स्वयं जिनयजनेऽधिकारित्वमन्यस्य पुनस्तथाविधेनैवान्येन तद्यजनं इत्युपदेशार्थमाह—

स्न्यारम्भसेवासंक्लिष्टः स्नात्वाऽऽकण्ठमथाशिरः ।
स्वयं यजेतार्हत्पादा-नस्नातोऽन्येन याजयेत् ।। ३४ ।।

टीका—यजेत । कोऽसौ, भाक्तिको गृही कानऽ,-र्हत्पादान् जिनचरणान्। केन, स्वयमात्मना । किं कृत्वा, स्नात्वा शौचं कृत्वा । कथ,-माकण्ठं

१ नित्यं स्नानं गृहस्थस्य देवार्चनपरिग्रहे ।
यतेस्तु दुर्जनस्पर्शात्स्नानमन्यद्विगर्हितम् ।।
वातातपादिसंस्पृष्टे भूरितोये जलाशये ।
अवगाह्याचरेत्स्नान-मतोऽन्यद्गालितं भजेत् ।।
पादजानुकटिग्रीवा शिरःपर्यन्तसंश्रयम् ।
स्नानं पञ्चविधं ज्ञेयं यथादोषं शरीरिणाम् ।।
ब्रह्मचर्योपपन्नस्य निवृत्तारम्भकर्मणः । यद्वा तद्वा भवेत्स्नान-मन्त्यमन्यस्य तु द्वयम् ।।
सर्वारम्भविजृम्भस्य ब्रह्मजिह्मस्य देहिनः ।
अविधाय बहिःशुद्धिं नासोपास्त्यधिकारिता ।।

कण्ठावधि । अथ अथवा । आशिरः मस्तकावधि, यथादोषं जलेन शुचीभूयेत्यर्थः । किंविशिष्टः सन्, स्त्र्यादीति, स्त्रीसेवया कृष्यादिकर्मसेवया च संक्लिष्टः समन्तात्काये मनसि चोपतप्तः, प्रस्वेदतन्द्रालस्यदौर्मनस्यादिदोषदूषितकायमनस्क इत्यर्थः । सोऽस्नातः किं कुर्यादित्याह—याजयेत्पूजया संयोजयेत् । कोऽसौ, अस्नातस्तथाविधो गृही । कान्, ईत्यादान् । केन,-कर्त्रान्येन स्नातेन सब्रह्मचारिसतीर्थ्यसधर्मकादिना ॥ ३४ ॥

चैत्यादिनिर्माणस्य फलविशेषसमर्थनया विधेयतामभिधत्ते—

निर्माप्यं जिनचैत्यतद्गृहमठस्वाध्यायशालादिकं
श्रद्धाशक्त्यनुरूपमस्ति महते धर्मानुबन्धाय यत् ।
हिंसारम्भविवर्तिनां हि गृहिणां तत्तादृगालम्बन-
प्रागल्भीलसदाभिमानिकरसं स्यात्पुण्यचिन्मानसम् ॥ ३५ ॥

टीका—निर्माप्यं कारापणीयं। किं तत् तज्जिनचैत्यादि । कैः, पाक्षिकश्रावकैः । किंविशिष्टं, श्रद्धाशक्त्यनुरूपं रुच्या सामर्थ्येन च सदृशं । यत्किं, यदस्ति भवति । कस्मै, धर्मानुबन्धाय धर्मस्यानुबन्धोऽलब्धलाभो लब्धपरिरक्षणं रक्षितवर्धनमित्येवमात्मकस्तस्मै । किंविशिष्टाय, महते विपुलाय । एतेन चैत्यालयादिनिर्मापणे सावद्यदोषशङ्कानिरस्ता । यदाह तत्पापमपि न पापं यत्र महान धर्मसम्बन्ध इति । हि यस्मात् । स्यात् भवेत् । किं तत् मानसं मनः । किंविशिष्टं, पुण्यचित् पुण्यं सुकृतं चिनोति वर्धयति, अथवा पुण्या पवित्रा निर्मला चित् संवित्तिर्यस्य तत्पुण्यचित् । केषां, गृहिणां गृहस्थानां

आप्लुतः सम्प्लुतश्चान्तः शुचिवासोविभूषितः ।
मौनसयमसम्पन्नः कुर्याद्देवार्चनाविधिम् ॥
दन्तधावनशुद्धास्यो मुखवासोवृताननः । असञ्जातान्यसंसर्गः सुधीर्देवानुपाचरेत् ।

१ यद्यप्यारम्भतो हिंसा हिंसायाः पापसम्भवः
तथाऽप्यत्र कृतारम्भो महत्पुण्यं समश्नुते ॥
निरालम्बनधर्मस्य स्थितिर्यस्मात्ततः सताम् ।
मुक्तिप्रासादसोपानमाप्तैरुक्तो जिनालयः ॥

किंविशिष्टानां, हिंसारम्भविवर्तिनां हिंसाप्रायः आरंभः कृष्यादिः तत्र विवर्तन्ते विविधं परिणमन्तेऽभीक्ष्णमिति तद्विवर्तिनस्तेषां। किंविशिष्टं तत्, तदित्यादि, तज्जिनचैत्यचैत्यालयादि तादृक्तीर्थयात्रादि, आलम्बनं दृग्विशुद्ध्यङ्गं, प्रागल्भी प्रौढिः, आभिमानिकरसः अहङ्कारानुरक्तो हर्षः, तच्च तादृक्च तत्तादृक् तच्च तदालम्बनं च तस्य प्रागल्भी तया लसन् द्योतमानः स्वसंवित्तिविषयीभवन् आभिमानिकरसो यस्मिन् तत् तथोक्तम् ॥ ३५ ॥

शास्त्रविदामपि प्रायः प्रतिमादर्शनेनैव देवादिसेवापरां मतिं कुर्वाणं कलिकालमपवदते—

धिग्दुष्षमाकालरात्रिं यत्र शास्त्रदृशामपि ।
चैत्यालोकादृते न स्यात् प्रायो देवविशा मतिः ॥ ३६ ॥

टीका—धिक् निन्दामीत्यर्थः। कां, दुःषमाकालरात्रिं दुःषमा पञ्चमकालः कालरात्रिर्मरणनिशेव दुर्निवारमोहावहत्वात् । यत्र किं, यस्यां न स्यात् । काऽसौ, मतिरन्तःकरणप्रवृत्तिः । किंविशिष्टा, देवविशा देवं परमात्मानं विशत्यनन्यशरणीभूय श्रयतीति क्विबन्तादजाद्यतष्टाप् । केषां, शास्त्रदृशामपि श्रुतचक्षुषामपि । कथं, ऋते विना । कस्मात्, चैत्यालोकात् प्रतिमादर्शनात्। कथं, प्रायो बाहुल्येन । केषाञ्चित् ज्ञानवैराग्यपराणां चैत्यदर्शनमन्तरेणापि मनः परमात्मानं संश्रयतीति भावः

कलौ धर्मस्थितिः सम्यक्चैत्यालयमूलैवेत्यनुशास्ति—

प्रतिष्ठायात्रादिव्यतिकरशुभस्वैरचरण—
स्फुरद्धर्मोद्धर्षप्रसररसपूरास्तरजसः ।
कथं स्युः सागाराः श्रमणगणधर्माश्रमपदं
न यत्रार्हद्गेहं दलितकलिलीलाविलसितम् ॥ ३७ ॥

टीका—तत्र नगरादौ कथं स्युः, कथमपि न भवेयुरित्यर्थः। के ते सागारा गृहस्थाः। किंविशिष्टाः, प्रतिष्ठेत्यादि, आदिशब्दः पूजाभिषेकजागरणाद्यर्थः। व्यतिकरः प्रघट्टकः, स्वैरं स्वच्छन्दं, उद्धर्ष उत्सवः, प्रसरश्चिरावस्थायित्वं, रसः हर्षो जलं वा, रजः पापं रेणुश्च, प्रतिष्ठायात्रादीनां व्यतिकरे शुभं प्रशस्तं

पुण्यास्रवणकारणं स्वैरं चरणं मनोवाक्कायव्यापारस्तेन स्फुरंश्चासौ धर्मोद्धर्ष स्तस्य प्रसरः स एव रसपूरो जलप्रवाहस्तेनास्तं स्फाटितं रजो येषा ते तथा । कथं स्युस्तत्र । यत्र किं. यत्र न भवति । किं, तत्, अर्हद्गेहं जिनचैत्यालयः । किंविशिष्ट, दलितं छिन्नं खण्डितं कलिलीलाविलसितं मठपत्यादिदुर्णयो निरंकुशविजृम्भमाणसंक्लेशपरिणामो वा यत्र तद्दलितकलिलीलाविलसितं । पुनः किंविशिष्टं, श्रमणगणधर्माश्रमपदं श्रमणस्य यतिसङ्घस्य धर्मार्थमाश्रम-पदं निवासस्थानम् ॥ ३७ ॥

कलौ वसतिविशेषं विना सतामप्यनवस्थितचित्तत्वं दर्शयति—

मनो मठकठेराणां वात्ययेवानवस्थया ।
चेक्षिप्यमाणं नाद्यत्वे क्रमते धर्मकर्मसु ॥ ३८ ॥

टीका—न क्रमते नोत्सहते । किं त,—न्मनः । केषां, मठकठेराणां वसति-दरिद्राणामरण्यादिवासिनां यतीनामित्यर्थः । क, धर्मकर्मसु धर्मार्थासु क्रियासु आवश्यकादिषु । कदा, अद्यत्वे अस्मिन् काले । किं क्रियमाणं, चेक्षिप्यमाणं भृशं पुनःपुनर्वा चाल्यमानं । कया, अनवस्थया परापररागादिविवर्तनपरिणत्या । कयेव, वात्ययेव वातमण्डल्या तूलादिर्यथा ॥ ३८ ॥

विमर्शस्थानं विना महोपाध्यायादीनामपि शास्त्रान्तस्तत्वज्ञानदौःस्थित्यं प्रथयति—

विनेयवद्विनेतृणा-मपि स्वाध्यायशालया ।
विना विमर्शशून्या धीर्दृष्टेऽप्यन्धायतेऽध्वनि ॥ ३९ ॥

टीका- अन्धायते अन्धमिवात्मानमाचरति तत्त्वं न पश्यतीत्यर्थः । काऽसौ, धीर्बुद्धिः । केषां, विनेतृणामपि । केषामिव, विनेयवत् उपाध्यायानाम् शिष्याणां यथा । क, अध्वनि मार्गे अर्थाच्छास्त्रे निःश्रेयसि वा । किंविशिष्टे ऽपि, दृष्टेऽपि । अभ्यस्तेऽपि । किंविशिष्टा सती, विमर्शशून्या अन्तस्तत्वक्षोद-विधुरा । कथं, विना । कया, स्वाध्यायशालया पाठस्थानेन । ततश्चैत्यादि-चतुष्टयं श्रेयोऽर्थं नियमेन कारयेदिति प्रतिपत्तव्यम् ॥ ३९ ॥

सत्रातुरोपचारस्थानयोरनुकम्प्यप्राण्यनुग्रहबुद्ध्या विधापनं बह्वारम्भरतानां गृहस्थानां जिनपूजार्थं पुष्पवाटिकादिनिर्मापणे दोषाभावं च प्रकाशयन्नाह—

सत्रमप्यनुकम्प्यानां सृजेदनुजिघृक्षया ।
चिकित्साशालवद्दुष्ये-न्नैज्यायै वाटिकाद्यपि ॥ ४० ॥

टीका—सृजेन्निर्मापयेत्पाक्षिकः । किं तत्, सत्रमन्नप्रदानस्थानं अपिशब्दा त्प्रपां च किंवत्, चिकित्साशालवत् व्याधिप्रतीकारस्थानं यथा । कया, अनुजिघृक्षया उपकर्तुमिच्छया । केषा,-मनुकम्प्यानां कृपाविषयानां क्षुत्तृष्णार्तानां व्याधितानां च । तथा न दुष्येन्न दुष्टं भवेत् । किं तत्, वाटिकादि आदिशब्दाद्वापीपुष्करिण्यादि । किमर्थं,-मिज्यायै पूजार्थं । अपिशब्देनानादरार्थेन विषयसुखार्थं कृप्यादिकं कुर्वतां यद्यपि धर्मबुध्या वाटिकादिविधाने लोके व्यवहारानुरोधाद्दोषो न भवति, तथापि तदकुर्वतामेव क्रयक्रीतेन पुष्पादिना तेषामपि जिनं पूजयतां महान् गुणो भवतीति ज्ञाप्यते ॥ ४० ॥

निर्व्याजभक्त्या येन केनापि प्रकारेण जिनं सेवमानानां समस्तदुखोच्छेद मितस्ततः समस्तमीहितार्थसम्पत्तिं चोपदिशति—

यथाकथञ्चिद्भजतां जिनं निर्व्याजचेतसाम् ।
नश्यन्ति सर्वदुःखानि दिशः कामान्दुहन्ति च ॥ ४१ ॥

टीका—नश्यन्ति निवर्तन्ते । कानि, सर्वदुःखानि शरीरमनस्तापाः । केषां निर्व्याजचेतसां निर्मायमनसां भाक्तिकानामित्यर्थः । किं कुर्वतां, भजतां सेवमानानां । कं, जिनं । यथाकथंचित् येनकेनापि स्नपनपूजास्तवनादिप्रकारेण । तथा दुहन्ति प्रपूरयन्ति । का, दिशः ककुभः । कान्, कामान् मनोरथान् । यद्यत्कामयन्ते जिनयष्टारस्तत्तत्सर्वत्र लभन्ते इत्यर्थः ॥ ४१ ॥

एवं जिनपूजां विधेयतयोपदिश्य तद्वत्सिद्धादिपूजामपि विधेयतयोपदेष्टुमाह—

जिनानिव यजन्सिद्धान्साधून्धर्मं च नन्दति ।
तेऽपि लोकोत्तमास्तद्वच्छरणं मङ्गलं च यत् ॥ ४२ ॥

टीका—नन्दति अन्तरङ्गबहिरङ्गविभूत्या संवर्धते । कोऽसौ, जीवः । किं कुर्वन्, यजन् पूजयन् । कान्, सिद्धान् मुक्तात्मनः, तथा साधून् सिद्धिं साधयन्तीत्यन्वर्थनामानुसरणादाचार्योपाध्याययतीन्, न केवलं तान्, धर्मं च व्यव-

द्वारनिश्चयरूपं रत्नत्रयं । कानिव, जिनानिव अर्हतो यथा । कुत इत्याह—यद्य स्मात् । वर्तन्ते । के ते, अपि सिद्धसाधुधर्माः किंविशिष्टाः, लोकोत्तमाः लोकेषूत्कृष्टाः, तथा शरणमार्तिहरणमपायपरिरक्षणोपाया इत्यर्थः । तथा मङ्गलं पापापहाः पुण्यप्रदाश्च । किंवत्, तद्वत् जिनवत् ॥ ४२ ॥

सकलपूज्यपूजाविधिप्रकाशनेनानुग्राहिकायाः सम्यक्श्रुतदेवतायाः पूजायां सज्जयन्नाह —

यत्प्रसादान्न जातु स्यात् पूज्यपूजाव्यतिक्रमः ।
तां पूजयेज्जगत्पूज्यां स्यात्कारोड्डमरां गिरम् ॥ ४३ ॥

टीका—पूजयेच्छ्रेयोऽर्थी यजेत । कां, तां गिरं श्रुतदेवतां । किंविशिष्टां, स्यात्कारोड्डमरां स्यात्पदप्रयोगेण सर्वथैकान्तवादिभिरजय्यां । पुनः किंविशिष्टां जगत्पूज्यां विश्वलोकानामभ्यर्च्यां यत्प्रसादात् यस्या अनुग्रहात् न स्यात् न भवेत् । कोऽसौ, पूज्यपूजाव्यतिक्रमः पूज्यानां अर्हत्सिद्धसाधुधर्माणां पूजायां व्यतिक्रमो यथोक्तविधिलंघनं । कथं, जातु कदाचिदपि ॥ ४३ ॥

श्रुतपूजकाः परमार्थतो जिनपूजका एवेत्युपदिशति—

ये यजन्ते श्रुतं भक्त्या ते यजन्तेऽञ्जसा जिनम् ।
न किञ्चिदन्तरं प्राहुराप्ता हि श्रुतदेवयोः ॥ ४४ ॥

टीका—यजन्ते पूजयन्ति । के ते, पुमांसः । कं, जिनं । केन, अञ्जसा परमार्थेन । ये किं, ये यजन्ते । किं तत्, श्रुतं । कया, भक्त्या । हि यस्मात् । न प्राहुः न ब्रुवन्ति । के ते, आप्ताः गुरवः । किं तत्, अन्तरं भेदं । कयोः, श्रुतदेवयोः प्रवचनपरमात्मनोः । कीदृशं, किञ्चित् यदेव श्रुतं स एव देवो य एव च देवस्तदेव श्रुतमित्यर्थः ॥ ४४ ॥

एवं देवपूजाविधिं संक्षेपेणोपदिश्य साक्षादुपकारकत्वेन गुरूणामुपासने नित्यं नियुङ्क्ते—

उपास्या गुरवो नित्यमप्रमत्तैः शिवार्थिभिः ।
तत्पक्षतार्क्ष्यपक्षान्तश्चरा विघ्नोरगोत्तराः ॥ ४५ ॥

टीका—उपास्याः सेव्याः । के ते, गुरवः धर्माराधनायां प्रयोक्तारः । कैः, शिवार्थिभिः परमकल्याणकामैः । किंविशिष्टैः, सद्भिरप्रमत्तैः प्रमादरहितैः ।

कथं, नित्यं शश्वत् । यतो भवन्ति । के ते, तत्रक्षताक्ष्यपक्षान्तश्चराः तेषां गुरूणां पक्षस्तदायत्ततया वृत्तिः स एव तार्क्ष्यपक्षो गरुडपतत्रं तत्रान्तर्मध्ये चरन्ति तदन्तश्चराः । किंविशिष्टा भवन्ति, विघ्नोरगोत्तराः विघ्नाः प्रक्रमाद्धर्मानुष्ठानविषये अन्तरायास्त एवोरगाः सर्पाः अपकारकत्वात् तेभ्य उत्तराः परे तद्दूरचारिणः, धर्मानुष्ठानप्रत्यूहसर्पैर्नाभिभूयन्त इत्यर्थः ॥ ४५ ॥

गुरूपास्तिविधिमाह—

निर्व्याजया मनोवृत्त्या सानुवृत्त्या गुरोर्मनः ।
प्रविश्य राजवच्छश्वद्विनयेनानुरञ्जयेत् ॥ ४६ ॥

टीका—अनुरञ्जयेदात्मनि रक्तं कुर्यात्। कोऽसौ, श्रेयोर्थी। किं त, न्मनश्चित्त। कस्य, गुरोराराध्यस्य। केन, विनयेन अभ्युत्थानादिना कायिकेन, हितमितप्रतिपादनेन वाचनिकेन शुभचिंतनादिना चित्तेन च। कथं शश्वत् नित्यं। किं कृत्वा, प्रविश्यान्तश्चरित्वा। किं तत्, गुरोर्मनः। कया, मनोवृत्त्या चित्तप्रवृत्त्या। किंविशिष्टया, निर्व्याजया निर्दम्भया। पुनः किंविशिष्टया, सानुवृत्त्या छन्दानुवृत्तिसहितया। कस्यव, राजवत्, राज्ञो यथा सेवकवर्गः ॥ ४६ ॥

विनयेनानुरञ्जयेदित्येतदर्थं व्यनक्ति—

पार्श्वे गुरूणां नृपवत्प्रकृत्यभ्यधिकाः क्रियाः ।
अनिष्टाश्च त्यजेत्सर्वा मनो जातु न दूषयेत् ॥ ४७ ॥

टीका—त्यजेत् वर्जयेत् उपासकः। काः, क्रियाश्चेष्टाः। सर्वाः। किंविशिष्टाः, प्रकृत्यभ्यधिकाः स्वभावादतिरिक्ताः वैकारिकीः कोपहास्यविवादादिकाः। न केवलं ताः अनिष्टाश्च शास्त्रनिषिद्धाश्च पर्यस्तिकोपाश्रयादिकाः। क्व, पार्श्वे समीपे। केषां, गुरूणां। केषामिव, नृपवत् राज्ञां यथा। तथा न दूषयेत् न विकारयेत्। किं तत्, राज्ञामिव गुरूणां मनः। कथं, जातु कदाचिदपि आर्तावस्थायामपीत्यर्थः ॥ ४७ ॥

---

१ निष्ठीवनमवष्टम्भं जृम्भणं गात्रभञ्जनम् ।
असत्यभाषणं नर्म हास्यं पादप्रसारणम् ॥
अभ्याख्यानं करस्फोटं करेण करताडनम् । विकारमंगसंस्कारं वर्जयेद्यतिसन्निधौ ॥

साम्प्रतं पात्राणि तर्पयेदित्यादि पूर्वोद्दिष्टदानादिविधिप्रपञ्चार्थमाह —

पात्रागमविधिद्रव्य—देशकालानतिक्रमात् ।
दानं देयं गृहस्थेन तपश्चर्यं च शक्तितः ॥ ४८ ॥

टीका—देयं दातव्यं । किं तत्, दानं रत्नत्रयानुग्राहकं वस्तु । केन, गृहस्थेन । कस्मात्, पात्राद्यनतिक्रमात् यथापात्रं यथाऽऽगमं यथाविधि यथाद्रव्यं यथादेशं यथाकालं चेत्यर्थः । तथा चर्यमनुष्ठेयं गृहस्थेन । किं तत, तपोऽनशनादि । कस्मात्, शक्तितः निजसामर्थ्यानुसारेण दानतपसी कुर्यादित्यर्थः ।४८।

सम्यग्दृशो नित्यमवश्यतया विधीयमानयोर्दानतपसोरवश्यम्भाविन फलविशेषमाह—

नियमेनान्वहं किञ्चिद्यच्छतो वा तपस्यतः ।
सन्त्यवश्यं महीयांसः परे लोका जिनश्रितः ॥ ४९ ॥

टीका—अवश्यं निश्चितं । सन्ति भवन्ति । के ते, लोकाः । किंविशिष्टाः, परे जन्मान्तराणीत्यर्थः । किंविशिष्टाः सन्ति, महीयांसः इंद्रादिपदलक्षणाः । कस्य, जिनश्रितः परमात्मानं सेवमानस्य भव्यस्य । किं कुर्वतो, यच्छतो ददतः तपस्यतो वा तपश्चरतः । किं, किञ्चित् यद्वा तद्वा शास्त्रविहितं । केन, नियमेन अवश्यतया । कथ,-मन्वहं दिने दिने ॥ ४९ ॥

यदर्थं यद्दानं कर्तव्यं तत्तदर्थमाह—

धर्मपात्राण्यनुग्राह्या—ण्यमुत्र स्वार्थसिद्धये ।
कार्यपात्राणि चात्रैव कीर्त्यै त्वौचित्यमाचरेत् ॥ ५० ॥

टीका—अनुग्राह्याणि उपकार्याणि श्रेयोऽर्थिना । कानि, धर्मपात्राणि रत्नत्रयसाधनपराः नराः । किमर्थं, स्वार्थसिद्धये । क, अमुत्र परलोके स्वर्गादिसुखसम्पत्यर्थमित्यर्थः । तथा अनुग्राह्याणि । कानि, कार्यपात्राणि त्रिवर्गसाधनसहायाः । कस्यै, अत्रैव जन्मनि स्वार्थसिद्धये पुरुषार्थसम्प्राप्तये । तथा आचरेदनुतिष्ठेत् गृही । किं तत्, औचित्यं दानप्रियवचनाभ्यामन्यस्य सन्तोषोत्पादनं । कस्यै कीर्त्यै यशोऽर्थम् ॥ ५० ॥

---

१ वर्यमध्यजघन्यानां पात्राणामुपकारकम् ।
दानं यथायथं देयं वैयावृत्यविधायिना ॥

धर्मपात्राणां यथागुणं सन्तर्पणीयत्वमाह—

समयिकसाधकसमयद्योतकनैष्ठिकगणाधिपान्धिनुयात् । मन्त्र-
दानादिना यथोत्तरगुणरागात्सद्गृही नित्यम् ॥ ५१ ॥ वकः,

टीका—समयिको गृही यतिर्वा जिनसमयश्रितः, साधको ज्योतिषमन्त्रगृह-वादादिलोकोपकारकशास्त्रज्ञः, समयद्योतको वादित्वादिना मार्गप्रभावक-नैष्ठिको मूलोत्तरगुणश्लाघ्यतपोऽनुष्ठाननिष्ठः, गणाधिपः धर्माचार्यस्तादृग्गृहस्थाचार्यो वा एतान् पञ्च धिनुयात् प्रीणयेत् । कोऽसौ, सद्गृही पाक्षिकस्य श्रावकस्त्रैवर्णिको वा गृहस्थः । केन, दानादिना दानमानासनसम्भाषणादिना । तं कस्मात्, यथोत्तरगुणरागात् यो य उत्तर उत्कृष्टः समयिकादीनां मध्ये इहमुत्र तस्य गुणेषु प्रीतितः, अथवा यो यो यस्योत्कृष्टो गुणस्तत्र तत्र प्रीत्या सम्मान धिनुयादिति योज्यम् । अत्र श्रमणोपासकेषु मुमुक्षुषु रत्नत्रयानुग्रहबुध्द्या सन्तर्पणं पात्रदत्तिः, बुभुक्षुषु च गृहस्थेषु वात्सल्येन यथार्हमनुग्रहः समानदत्तिरिति विभागः ॥ ५१ ॥

समदत्तिविधानोपदेशार्थमाह—

स्फुरत्येकोऽपि जैनत्व-गुणो यत्र सतां मतः ।
तत्राप्यजैनैः सत्पात्रै-र्द्योत्यं खद्योतवद्रवौ ॥ ५२ ॥

---

१ गृहस्थो वा यतिर्वाऽपि जैनं समयमास्थितः ।
यथाकालमनुप्राप्तः पूजनीयः सुदृष्टिभिः ॥

२ ज्योतिर्मन्त्रनिमित्तज्ञः सुप्रज्ञः कार्यकर्मसु ।
मान्यः समयिभिः सम्यक्परोक्षार्थसमर्थधीः ॥

३ दीक्षायात्राप्रतिष्ठाद्याः क्रियास्तद्विरहे कुतः ।
तदर्थं परपृच्छायां कथं च समयोन्नतिः ॥

४ मूलोत्तरगुणश्लाघ्यैस्तपोभिर्निष्ठितस्थितिः ।
साधुः साधु भवेत्पूज्यः पुण्योपार्जनपण्डितैः ॥

५ ज्ञानकाण्डे क्रियाकाण्डे चातुर्वर्ण्यपुरस्सरः ॥
सूरिर्देव इवाराध्यः संसाराब्धितरण्डकः ॥

टीका—द्योत्यं प्रकाश्यं प्रभाव्यं । कैः, सत्पात्रैः ज्ञानतपोऽधिकैः । किंविशिष्टे,—स्वजैनैः शिवादिभक्तिग्रहाविष्टैः । क, तत्रापि तपोज्ञानरहितेऽपि जने । किंवत्, खद्योतवत् खद्योतैरिव । कस्मिन्, रवौ रविसन्निधाने ज्योतिरिङ्गणा यथा निष्प्रभा भवन्ति तथा स्फुरज्जैनत्वगुणपुंसः समीपे मिथ्यादृष्टिधार्मिका इत्यर्थः । यत्र किं, यत्र स्फुरति प्रतपति । कोऽसौ, जैनत्वगुणः जिन एव देवो मे भवार्णवोत्तारकत्वादित्यभिनिवेशधर्मः । किंविशिष्टोऽपि, ज्ञानतपोरहितः, किं पुनस्तत्सहित इत्यपिशब्दार्थः । किंविशिष्टः, सतां मतः साधूनामिष्टः ॥ ५२ ॥

श्रेयोऽर्थिनां जैनानुग्रहानुभावमाह—

वरमेकोऽप्युपकृतो जैनो नान्ये सहस्रशः ।
दलादिसिद्धान् कोऽन्वेति रससिद्धे प्रसेदुषि ॥ ५३ ॥

टीका—वरं भवतु । कोऽसौ, जैनः । किंविशिष्टः, उपकृतोऽनुगृहीतः । किंविशिष्टोऽपि, एकोऽपि । न वरं । के-ऽन्ये अजैनाः । किंविशिष्टाः,उपकृताः। कियन्तः, सहस्रशः सहस्रसंख्याः । अत्र दृष्टान्तमाह-को, न कश्चित् । अन्वेति अनुवर्तते । कान, दलादिसिद्धान्, दलं बीजरहितकृत्रिमसुवर्णादिद्रव्यं आदिशब्दाद्वर्णोत्कर्षादि तत्र तेन वा सिद्धान् प्रसिद्धान् । क सति, रससिद्धे पारदेन दारिद्र्यव्याधिजरादिनिराकरणशक्त्या प्रतीते पुंसि । किंविशिष्टे, प्रसेदुषि प्रसन्ने अनुग्रहोद्यते ॥ ५३ ॥

नामादिनिक्षेपविभक्तानां चतुर्णां जैनानां पात्रत्वं यथोत्तरं विशिनष्टि—

नामतः स्थापनातोऽपि जैनः पात्रायते तराम् ।
स लभ्यो द्रव्यतो धन्यैर्भावतस्तु महात्मभिः ॥ ५४ ॥

टीकाः—पात्रायते तरां अजैनपात्रेभ्योऽतिशयेन संयुज्यमाननिर्वाणकारणगुणलक्षणपात्रवदाचरति, सम्यक्त्वसहचारिपुण्यास्रवकारणत्वात् । । कोऽसौ, जैनः । केन, नामतः सञ्ज्ञामात्रेण, न परं नाम्ना स्थापनातोऽपि सोऽयं जैन इति कल्पनामात्रेणापि। लभ्यः प्राप्यः । कोऽसौ, स जैनः । केन, द्रव्यतो द्रव्येण आगामिजैनत्वगुणयोग्यत्वेन विशिष्टः । कैः, धन्यैः पुण्यवद्भिः । स एव तु भावतो भावेन जैनत्वगुणयोगेन लभ्यः । कैः, महात्मभिः महाभागैः ॥ ५४ ॥

भावजैनं प्रति निरुपाधिप्रीतिमतोऽभ्युदयनिःश्रेयससम्पदं फलमाह—

प्रतीतजैनत्वगुणेऽनुरज्यन्निर्व्याजमासंसृति तद्गुणानाम् ।
धुरि स्फुरन्नभ्युदयैरदृप्तस्तृप्तस्त्रिलोकीतिलकत्वमेति ॥ ५५ ॥

टीका—एति गच्छति । कोऽसौ, गृही । किं कुर्वन्, अनुरज्यन् स्वयमेवानुरागं कुर्वन् । कथं, निर्व्याजं निश्छद्म । क, प्रतीतः प्रसिद्धो जैनत्वगुणो यस्य तस्मिन् प्रतीतजैनत्वगुणे । कि-, मेति त्रिलोकीतिलकत्वं परमपदं । किंभूतो भूत्वा, तृप्तः वितृष्णीभूत इत्यर्थः । कैः, अभ्युदयैराज्ञैश्वर्यादिभिः । किंविशिष्टः सन्, अदृप्तोऽकृतमदः सम्यक्त्वसहचारिपुण्योदययोगात् । किं कुर्वन्, स्फुरन् दीप्यन् । क, धुरि अग्रे । केषां सद्गुणानां प्रतीतजैनत्वगुणानां । कथम् आसंसृति संसारं यावत्, भवे भवे जैनानामग्रणीर्भवन्नित्यर्थः ॥ ५५ ॥

गृहस्थाचार्याय तदभावे मध्यमपात्राय वा कन्यादिदानं पाक्षिकश्रावकस्य कर्तव्यतयोपदिशति—

निस्तारकोत्तमायाथ मध्यमाय सधर्मणे ।
कन्याभूहेमहस्त्यश्व—रथरत्नादि निर्वपेत् ॥ ५६ ॥

टीका—निर्वपेत् दद्यात् गृही । किं तत्, कन्या कुमारी, भूर्भूमिः, हेम काञ्चनं, हस्ती गजः, अश्वो वाजी, रथः स्यन्दनः, रत्नं वज्रादि, आदिशब्देन वस्त्रगृहनगराद्येवंजातीयकमन्यदपि त्रिवर्गसाधनाश्रयं वितरेत् । कस्मै, सधर्मणे समान आत्मना समो धर्मः क्रियामन्त्रव्रतादिलक्षणो गुणो यस्य तस्मै । किंविशिष्टाय, निस्तारकोत्तमाय संसारार्णवोत्तारकाणां गृहिणां मध्ये प्रधानाय, न केवलं तस्य तदलाभे च मध्यमाय अनुत्तमाधमाय । अथशब्दोऽत्र पक्षान्तरसूचनेऽधिकारे वा । अत्र जघन्यविषयां समदत्तिं व्याख्याय मध्यमविषयाऽसावधिक्रियते इत्यर्थः । यत्यपेक्षया गृहस्थस्य गुणाधिकस्यापि मध्यमपात्रत्वात् ॥ ५६ ॥

सधर्मभ्यः कन्यादिदाने हेतुमाह—

आधानादिक्रियामन्त्र—व्रताद्युच्छेदवाञ्छया ।
प्रदेयानि सधर्मभ्यः कन्यादीनि यथोचितम् ॥ ५७ ॥

टीका—प्रदेयानि प्रकृष्टं कृत्वा दातव्यानि गृहिणा । कानि, कन्यादीनि ।

केभ्यः, सधर्मभ्यः साधर्मिकेभ्यः। कथं, यथोचितं यो यो यद्दानस्य योग्यस्तस्मै तस्मै तद्दातव्यमित्यर्थः। कया, आधानादीत्यादि--आधानं गर्भाधानविधानमादिर्यासां प्रीतिसुप्रीत्यादीनामार्षोक्तानां क्रियाणां ता आधानादयस्ताश्च ताः क्रियाश्च कर्माणि गृहस्थानामवश्यकार्याणि, मन्त्राः प्रत्यासत्तेराधानादिक्रियासम्बन्धिन एवार्षोक्ताः अपराजितमन्त्रा वा, व्रतानि मद्यविरत्यादीनि आदिशब्दाद्देवपूजापात्रदानादिधर्मकर्माणि तेषामच्छेदः सातत्येन प्रवृत्तिस्तत्र वाञ्छा आकांक्षा तया ॥ ५७ ॥

सम्यक्कन्यादानविधिं तत्फलं चाह—

निर्दोषां सुनिमित्तसूचितशिवां कन्यां वरार्हैर्गुणैः
स्फूर्जन्तं परिणाय्य धर्म्यविधिना यः सत्करोत्यञ्जसा।
दम्पत्योः स तयोस्त्रिवर्गघटनात्त्रैवर्गिकेष्वग्रणी—
भूत्वा सत्समयास्तमोहमहिमा कार्ये परेऽप्यूर्जति ॥ ५८ ॥

टीका—यो गृही। अञ्जसा श्रद्धापरत्वेन। साधर्मिकं सत्करोति सम्मानयति यथोचितवस्त्रादिदानेनोपचरति। किं कृत्वा, परिणाय्य युक्तितो वरणविधानमग्निदेवद्विजसाक्षिकं च पाणिग्रहणं विवाहस्तं कारयित्वा। केन, धर्म्यविधिना धर्म्या धर्मादनपेता ब्राह्मप्राजापत्यार्षदैवाश्चत्वारो विवाहास्तेषां यथार्हं प्रयो-

१ धर्म्यविवाहविधिरार्षे यथा—

ततोऽस्य गुर्वनुज्ञाना—दिष्टा वैवाहिकी क्रिया।
वैवाहिके कुले कन्या—मुचितां परिणेष्यतः॥
सिद्धार्चनविधिं सम्य—ग्निर्वर्त्य द्विजसत्तमाः।
कृताग्नित्रयसम्पूजाः कुर्युस्तत्साक्षिकां क्रियाम्॥
पुण्याश्रमे क्वचित्सिद्ध—प्रतिमाभिमुखं तयोः।
दम्पत्योः परया भूत्या कार्यः पाणिग्रहोत्सवः॥
वेद्यां प्रणीतमग्नीनां त्रयं द्वयमथैककम्।
ततः प्रदक्षिणीकृत्य प्रसज्य विनिवेशनम्॥
पाणिग्रहणदीक्षायां नियुक्तं तद्वधूवरम्।
आसप्ताहं चरेद्ब्रह्म—व्रतं देवाग्निसाक्षिकम्॥ (शेषस्त्वग्रपृष्ठे)

गेण। किं कुर्वन्त, [?] स्फुरन्तं। कै,—गुणैः। किंविशिष्टैः, वराहैर्वरयितुर्योग्यैः कुलशीलसानाथ्यविद्यावित्तसौरूप्ययोग्यवयोर्थित्वैः। कां परिणाय्य, कन्यां। किंविशिष्टां, निर्दोषां सामुद्रिकशास्त्रोक्तदोषरहितां। पुनः किंविशिष्टां, सुनिमित्तसूचितशिवां सुनिमित्तैः सामुद्रिकदूतज्योतिषादिभविष्यच्छुभाशुभज्ञानोपायैः सूचितं प्रकाशितं शिवं स्वस्य वरस्य च कल्याणं यस्यास्तां। स किमित्याह—उर्जेति समर्थो भवति। कोऽसौ, स यथाविधिकन्यादाता। क, कार्ये ऽवश्यकृत्ये। किंविशिष्टे, परेऽपि पारलौकिके न केवलं लौकिके इत्यपिशब्दार्थः। किंविशिष्टः सन्, सदित्यादि—सत्समयः जिनप्रवचनमार्थसङ्गतिर्वा तेनास्तो निराकृतो मोहस्य चारित्रावरणकर्मणो महिमा गुरुत्वं येन स तथोक्तः। किं कृत्वा, भूत्वा। किम्भूतो,—ऽग्रणीः प्रधानं। केषु मध्ये, त्रैवर्गिकेषु धर्मार्थकामानाचरत्सु। कस्मात्, त्रिवर्गघटनात् धर्मार्थकामसम्पादनात्। कयो,—स्तयोः स्वकन्यातद्वरलक्षणयोर्दम्पत्योर्जायापत्योः॥ ५८॥

सत्कन्याप्रदातुः साधर्मिकोपकारकरणद्वारेण महान्तं सुकृतलाभमवभासयन्नाह—

क्रान्त्वा स्वस्योचितां भूमिं तीर्थभूमौर्विहृत्य च।स्वगृहं प्रविशेद् भूत्या परया तद्वधूवरम्।
विमुक्तकङ्कणं पश्चात्स्वगृहे शयनीयकम्। अधिशय्य यथाकालं भोगाङ्गैरुपलालितम्।

सन्तानार्थमृतावेव कामसेवां मिथो भजेत्।
शक्तिकालव्यपेक्षोऽयं क्रमोऽशक्तेष्वतोऽन्यथा॥

१–२ द्वौ हि धर्मौ गृहस्थानां लौकिकः पारलौकिकः।
लोकाश्रयो भवेदाद्यः परः स्यादागमाश्रयः॥
सर्व एव हि जैनानां प्रमाणं लौकिको विधिः।
यत्र सम्यक्त्वहानिर्न यत्र न व्रतदूषणम्॥
स्वजात्यैव विशुद्धानां वर्णानामिह रत्नवत्।
तत्क्रियाविनियोगाय जैनागमविधिः परम्॥
यद्भवभ्रान्तिनिर्मुक्ति-हेतुधीस्तत्र दुर्लभा।
संसारव्यवहारे तु स्वतः सिद्धे वृथाऽऽगमः।

सत्कन्यां ददता दत्तः सत्रिवर्गो गृहाश्रमः।
गृहं हि गृहिणीमाहु-र्न कुड्यकटसंहतिम् ॥ ५९ ॥

टीका--दत्तो वितीर्णः सद्गृहिणा साधर्मिकाय। कोऽसौ, गृहाश्रमः गृहे आश्रमो धर्मानुष्ठानं गृहमेव वाऽश्रमस्तपःस्थानं। किं कुर्वता, ददता। कां, सत्कन्यां सती प्रशस्ता कौलीन्यादिगुणोपेता सामुद्रिकोक्तदोषरहिता च कन्या कुमारी सत्कन्या तां। किंविशिष्टो गृहाश्रमो दत्तः, सत्रिवर्गो धर्मार्थकामानां सद्गृहिणीमूलत्वात्। तथाहि--धर्मः स्वदारसन्तोषाद्यात्मकसंयमलक्षणो देवादिपरिचरणस्वरूपः सत्पात्रदानादिस्वभावश्च, अर्थो वेश्यादिव्यसनव्यावर्तनेन निष्प्रत्यूहमर्थस्योपार्जनादुपार्जितस्य च रक्षणाद्रक्षितस्य च वर्द्धनाद्यथाभाग्यं ग्रामसुवर्णादिसम्पत्तिः, 'संकल्परमणीयस्य प्रीतिसम्भोगशोभिनो रुचिरस्याभिलाषस्य नाम काम' इति स्मृतिरिति वचनात् कामश्च यथेष्टमाभिमानिकरसानुविद्धसर्वेन्द्रियप्रीतिहेतुः कुलाङ्गनासङ्गिनां सुप्रतीतः। हि यस्मात्। आहुः ब्रुवन्ति विद्वांसः। किं, गृहं। कां, गृहिणीं कुलपत्नीं। न आहुः। किं तत्, गृहं। कुड्यकटसंहतिं भित्तिवंशादिच्छादनसङ्घातम् ॥ ५९ ॥

कुलस्त्रीपरिग्रहं लोकद्वयाभिमतफलसम्पादकत्वात् त्रैवर्गिकस्य विधेयतयोपदिशति--

धर्मसन्ततिमक्लिष्टां रतिं वृत्तकुलोन्नतिम्।
देवादिसत्कृतिं चेच्छन्सत्कन्यां यत्नतो वहेत् ॥६०॥

टीका--वहेत् परिणयेत। कोऽसौ, श्रावकः। कां सत्कन्यां सती प्रशस्ता सतश्च सज्जनस्य कन्या सत्कन्या तां। कस्मात्, यत्नतः प्रयत्नेन तत्परतया। किं कुर्वन्, आकांक्षन्। किं किं, धर्मसन्ततिं धर्मार्थी सन्ततिरपत्यानि अथवा धर्मस्य सन्ततिरविच्छेदो धर्मसन्ततिस्तां, तथा अक्लिष्टामनुपहतां रतिं संम्भोगं, तथा वृत्तकुलोन्नतिं वृत्तस्याचारस्य कुलस्य च वंशस्य गृहस्य वा उन्नतिरुद्धतिस्तां, तथा देवादिसत्कृतिं देवद्विजातिथिबान्धवसत्कारम् ॥६०॥

दुष्कलत्रस्याकलत्रस्य वा पात्रस्य भूम्यादिदानान्न कश्चिदुपकारः स्यादित्यमुमर्थमवश्यं तत्कन्याविनियोगेन सधर्माणमनुगृह्णीयादिति विधिव्यवस्थापनार्थमर्थान्तरन्यासेन समर्थयते--

सुकलत्रं विना पात्रे भूहेमादिव्ययो वृथा ।
कीटैर्दन्दश्यमानेऽन्तः कोऽम्बुसेकाद्द्रुमे गुणः ॥ ६१ ॥

टीका—भवति । कोऽसौ, भूहेमादिव्ययः भूमिसुवर्णादिदानं । कथम्भूतो, वृथा व्यर्थः । क्व, पात्रे संयुज्यमानमोक्षकारणगुणे गृहिणि । कथं, विना । किं तत्, सुकलत्रं सत्पत्नीं । अत्र दृष्टान्तमाह—को भवति, न कश्चित् । कोऽसौ, गुण उपकारः । कस्मात्, अम्बुसेकात् जलसेचनात् । क्व, द्रुमे वृक्षे । किं क्रियमाणे, दन्दश्यमाने गर्हितं भक्ष्यमाणे । कैः, कीटैः घुणैः । क्व, अन्तर्मध्ये ।

विषयसुखोपभोगेनैव चारित्रमोहोदयोद्रेकस्य शक्यप्रतीकारत्वात्तद्वारेणैव तस्मादपवर्त्यात्मानमिव साधर्मिकमपि विषयेभ्यो व्युपरमयेदित्युपदेशार्थमाह—

विषयेषु सुखभ्रांतिं कर्माभिमुखपाकजाम् ।
छित्वा तदुपभोगेन त्याजयेत्तान्स्ववत्परम् ॥ ६२ ॥

टीका— त्याजयेद्विमोचयेत् । कोऽसौ, सद्गृही । कं, परं कन्यादिदानेन विषयीक्रियमाणं साधर्मिकं । कान् तान्, सुकलत्रादिविषयान् । किंवत्, स्ववत् आत्मानं यथा । कृत्वा, छित्वा प्रशमय्य । कां, सुखभ्रान्तिं सुखयन्तीति सुखाः सुखहेतव इमे सुखं वेति विपर्यासमतिं । केषु, विषयेषु । किंविशिष्टां, कर्माभिमुखपाकजां कर्मणश्चारित्रमोहस्याभिमुखो निजफलदानोद्यतः पाको रसः कर्माभिमुखपाकस्तस्मात् जातां । छित्वा प्रशमय्य । कां, सुखभ्रांतिं । केन, तदुपभोगेन विषयानुभवनेन ॥ ६२ ॥

दुष्षमाकालवशात्प्रायेण पुरुषाणामाचारविप्लवदर्शनाद्विचिकित्साकुलितचित्तस्य दातुः सौचित्यविधानार्थं चतुरः श्लोकानाह—

दैवाल्लब्धं धनं प्राणैः सहावश्यंविनाशि च ।
बहुधा विनियुञ्जानः सुधीः समयिकान्क्षिपेत् ॥ ६३ ॥

टीका—क्षिपेत् धिगिमान् सम्भाषणमात्रस्याप्ययोग्यानित्याद्यवर्णवादेन तिरस्कुर्यादिति काका न क्षिपेदिति प्रतिषेधे पर्यवस्यति । कोऽसौ, सुधीः

श्रेयोऽर्थी गृही । कान्, समयिकान् समयाश्रितान् गृहस्थान् यतीन् वा । किं कुर्वाणो, विनियुञ्जानो व्ययमानः । किं तत्, धनं । कतिधा, बहुधा बहुभिः प्रकारैः लज्जाभयपक्षपातादिभिः । किंविशिष्टं धनं, लब्धं प्राप्तं । कस्मात्, दैवात्पुण्योदयान्न पुरुषकारात्, तस्य संसारे गौणत्वात् । किंविशिष्ट,-मवश्यं-विनाशि नियमेन गत्वरं । कथं, सह । कैः, प्राणैः ॥ ६३ ॥

एव किं तर्हि कुर्यादित्याह --

विन्यस्यैदंयुगीनेषु प्रतिमासु जिनानिव ।
भक्त्या पूर्वमुनीनर्चेत्कुतः श्रेयोऽतिचर्चिनाम् ॥ ६४ ॥

टीका—अर्चेत् पूजयेत् । कोऽसौ, सद्गृही । कान्, पूर्वमुनीन् प्राक्तनसाधून् । कया, भक्त्या । किं कृत्वा, विन्यस्य नामादिविधिना निक्षिप्य । केषु, ऐदंयुगीनेषु अस्मिन् युगे साधुषु । कास्विव कान्, प्रतिमासु जिनानिव प्रतिबिम्बेष्वर्हतो यथा यतः कुतो भवति, न कुतश्चित् । किं तत्, श्रेयः पुण्यं । केषाम्, अतिचर्चिनाम् अतिमात्रं क्षोदकारिणाम् ॥ ६४ ॥

पुनस्तदर्थसमर्थनार्थमाह—

---

१ भुक्तिमात्रप्रदाने तु का परीक्षा तपस्विनाम् ।
ते सन्तः सन्त्वसन्तो वा गृही दानेन शुध्यति ॥
सर्वारम्भप्रवृत्तानां गृहस्थानां धनव्ययः ।
बहुधाऽस्ति ततोऽत्यर्थं न कर्तव्या विचारणा ॥
यथा यथा विशिष्यन्ते तपोज्ञानादिभिर्गुणैः ।
तथा तथाऽधिकं पूज्या मुनयो गृहमेधिभिः ॥

दैवाल्लब्धं धनं धन्यर्वप्तव्यं समयाश्रिते । एको मुनिर्भवेल्लभ्यो न लभ्यो वा यथागमं । उच्चावचजनप्रायः समयोऽयं जिनेशिनाम् । नैकस्मिन्पुरुषे तिष्ठेदेकस्तम्भ इवालयः । ते नामस्थापनाद्रव्य-भावन्यासैश्चतुर्विधाः । भवन्ति मुनयः सर्वे दानमानादिकर्मसु । उत्तरोत्तरभावेन विधिस्तेषु विशिष्यते । पुण्यार्जने गृहस्थानां जिनप्रतिकृतिष्विव ॥ काले कलौ चले चित्ते देहे चान्नादिकीटके । एतच्चित्रं यदद्यापि जिनरूपधरा नराः ।

यथा पूज्यं जिनेन्द्राणां रूपं लेपादिनिर्मितम् ।
तथा पूर्वमुनिच्छायाः पूज्याः सम्प्रति संयताः ॥

भावो हि पुण्याय मतः शुभः पापाय चाशुभः ।
तद्दुष्यन्तमतो रक्षेद्धीरः समयभक्तितः ॥ ६५ ॥

टीका—हि यस्मात् । पुनरिष्टः । कोऽसौ, भावः परिणामः । कस्मै, पुण्याय सुकृतनिमित्तं । किंविशिष्टः शुभः प्रशस्तः । तथा मतः। कोऽसौ भावः । किंविशिष्टो,-ऽशुभोऽप्रशस्तः । कस्मै, पापाय पातकनिमित्तं । यत एव-मतः एतस्मात्कारणात् । रक्षेन्निवारयेत् । कोऽसौ, धीरोऽविकारप्रकृतिः । कं तं भावं । किं कुर्वन्तं, दुष्यन्तं विकुर्वाणं । कस्मात्, समयभक्तितः जिनशासनं कलौ धारयन्तोऽमी अतो जिनवन्मान्या इत्यनुरागबुध्द्या ॥ ६५ ॥

ज्ञानतपसोः पृथक् समुदितयोश्च तद्वतां च पूज्यत्वे युक्तिमाह—

ज्ञानमर्च्यं तपोऽङ्गत्वा—त्तपोऽर्च्यं तत्परत्वतः ।
द्वयमर्च्यं शिवाङ्गत्वा—त्तद्वन्तोऽर्च्या यथागुणम् ॥ ६६ ॥

टीका—अर्च्यं पूज्यं गृहिणां। किं तत्, ज्ञानं साधकस्थं दीक्षायात्राप्रतिष्ठाद्युपयोगि। कुत,-स्तपोऽङ्गत्वादनशनादितपोनिमितत्त्वात् । तथा अर्च्यं। किं तत्, तपो नैष्ठिकस्थं। कस्मात्त, त्परत्वतः ज्ञानातिशयहेतुत्वात् ज्ञानं परमुत्कृष्टं यस्मादिति व्युत्पत्त्याश्रयणात् । तथा अर्च्यं किं तत, द्वयं ज्ञानतपोयुगलं गणाधिपस्थं। कस्मात्, शिवाङ्गत्वान्मोक्षकारणत्वात् । तथा अर्च्याः के ते, तद्वन्तो ज्ञानिनस्तपस्विनो ज्ञानतपोयुक्ताश्च । कथं, यथागुणं यो यो गुणो यस्याधिकस्तेन तेन तं तं विशेषेण पूजयेदित्यर्थः ॥ ६६ ॥

अथ मिथ्यादृष्टेश्च सुपात्रेष्वेवान्नदानादुत्पन्नस्य पुण्यस्य फलविशेषमपात्रे चार्थविनियोगस्य वैयर्थ्यं प्रतिपादयितुमाह—

न्यङ्मध्योत्तमकुत्स्यभोगजगतीभुक्तावशेषाद्वृषा-
त्तादृक्पात्रवितीर्णभुक्तिरसुदृग्देवो यथास्वं भवेत् ।
सद्दृष्टिस्तु सुपात्रदानसुकृतोद्रेकात्सुभुक्तोत्तम-
स्वर्भूमर्त्यपदोऽश्नुते शिवपदं व्यर्थस्त्वपात्रे व्ययः ॥६७॥

टीका—भवेत् जायेत । कोऽसौ, असुदृङ्मिथ्यादृष्टिर्जीवः । किं भवेत्,

देवः सुरः । कथं, यथास्वं यद्यत्स्वमात्मीयं दानं तत्तदनतिक्रमेणेत्यर्थः । किंविशिष्टः सन्, तादृक्पात्रवितीर्णभुक्तिः तादृग्भ्यो न्यग्मध्योत्तमकुत्सितेभ्यः पात्रेभ्यो वितीर्णा दत्ता भुक्तिराहारो येन स तथोक्तः । कस्माद्भवेत्, वृषात् पुण्यविशेषात्, । किंविशिष्टात्, न्यगित्यादि,—न्यक् जघन्य एकपल्योपमभोग्यत्वात्, उत्तमस्त्रिपल्योपमभोग्यत्वात् कुत्स्य सुस्वादुमृत्पुष्पफलाशनवृत्तित्वदेकोरुकादिदेहयोगाच्च । न्यक्च मध्यमश्च उत्तमश्च कुत्स्यश्च न्यग्मग्मध्योत्तम-कुत्स्यास्ते च ते भोगाश्च न्यग्मध्योत्तमकुत्स्यभोगास्तैरुपलक्षिता जगत्यो भूतयो जघन्यभोगभूमिर्मध्यमभोगमूमिरुत्तमभोगभूमिः कुभोगभूमिश्चेति चतस्रस्तासु भुक्ताः कल्पवृक्षादिसम्पादितेष्टविषयोपभोगमुखेन निर्जीर्णश्चासावशेषश्चोद्भूतो यो वृषस्तस्मात् । तत्र मिथ्यादृष्टिर्जघन्यपात्राय सुदृष्टिलक्षणायाहारदानं दत्वा जघन्यभोगभूमौ, मध्यमपात्राय सम्यक्त्वाणुव्रतपवित्राय मध्यभोगभूमौ, उत्तमपात्राय सम्यग्दर्शनमहाव्रतभूषिताय चोत्तमभोगभूमौ, निरातङ्कभोगान् भुक्त्वा स्वायुःक्षये यथायोग्यं गच्छेत् । तत्तत्पात्रसन्निधानात्तथाविधशुभपरिणामविशेषोत्पत्त्या तादृक्पुण्यप्रचयानुभावात् । स एव च कुपात्राय सम्यक्त्वरहितव्रततपोयुक्तायाहारं दत्वा कुभोगभूमौ निर्भूषाविवस्त्र-गुहावृक्षमूलनिवास्येकोरुकादिशरीरो भूत्वा स्वसमानपत्न्या सह यथास्वं निराबाधतया भोगं भुक्त्वा पल्योपममात्रस्वायुःक्षये मृत्वा स्वर्गे वाहनदेवो ज्योतिष्को वा व्यन्तरो वा भवनवासी वा भूत्वा दीर्घं दुर्गतिदुःखानि भुञ्जन् संसरति । किं च ये भोगभूमिषु ये च मानुषोत्तरपर्वताद्बहिः प्राक्च स्वयम्प्रभ पर्वतात्तिर्यञ्चो ये च म्लेच्छराजगजतुरगादयो वेश्यादयो वा नीचात्मानो

पात्रापात्रलक्षणं यथा—

१–२ उत्कृष्टपात्रमनगारमणुव्रताढ्यं मध्यं व्रतेन रहितं सुदृशं जघन्यम् ।
निर्दर्शनं व्रतनिकाययुतं कुपात्रं युग्मोज्झितं नरमपात्रमिदं हि विद्धि ॥
उत्तमपत्तं साहू मज्झिमपत्तं च सावया भणिया ।
अविरदसम्माइट्ठी जहण्णपत्तं मुणेयव्वम् ॥

भोगभाजो दृश्यन्ते ते सर्वे कुपात्रदानतो यथापरिणाममुत्पन्नेन मिथ्यात्वसहचारिणा पुण्येन तथा स्युरिति निर्णयः। अश्नुते प्राप्नोति कोऽसौ, सद्दृष्टिः सम्यक्त्वविशुद्धो जीवः। तुर्विशेषे। किं, शिवपदं। किंभूतो भूत्वा, सुष्ठु यथेष्टं भुक्तानि उत्तमानि महर्द्धिकानि स्वर्भुवां कल्पोपपन्नदेवानां मर्त्यानां च चक्रवर्त्यादीनां पदानि येन स सुभुक्तोत्तमस्वर्भमर्त्यपदः। कस्मात्, सुपात्रदानसुकृतोद्रेकात् सुपात्राय महातपोधनाय त्रिविधपात्राय वा दानमनुग्रहार्थं स्वस्यातिसर्गस्तस्माज्जातं सुकृतं पुण्यं तस्योद्रेकादुदयात्। भवेत्। कोऽसौ, व्ययः अर्थविनियोगः। क्व, अपात्रे[1] सम्यक्त्वव्रतरहितप्राणिनि। किंविशिष्टो, व्यर्थो विपरीतफलो निष्फलो वा ॥ ६७ ॥

इदानीं पात्रदानपुण्योदयफलभाजां भोगभूमिजानां जन्मप्रभृति सप्ताहसप्तकभाविनीरवस्था निर्देष्टुमाह—

सप्तोत्तानशया लिहन्ति दिवसान्स्वांगुष्ठामार्यास्ततः

मिथ्यात्वग्रस्तचित्तेषु चारित्राभासभागिषु ।
दोषायैव भवेद्दानं पयःपानमिवाहिषु ॥
कारुण्यादथवौचित्यात्तेषां किञ्चिद्दिशन्नपि ।
दिशेदुद्धृतमेवान्नं गृहे भुक्तिं न कारयेत् ॥
सत्कारादिविधावेषां दर्शनं दूषितं भवेत् ।
यथा विशुद्धमप्यम्बु विषभाजनसंगमात् ॥
पात्राय विधिना दत्वा दानं मृत्वा समाधिना ।
अच्युतान्तेषु कल्पेषु जायन्ते शुद्धदृष्टयः ॥
ज्ञात्वा धर्मप्रसादेन तत्र प्रभवमात्मनः ।
पूजयन्ति जिनार्चास्ते भक्त्या धर्मस्य वृद्धये ॥

१—अपात्रदानतः किञ्चिन्न फलं पापतः परम् ।
लभ्येत हि फलं खेदो वालुकापुञ्जपेषणे ॥
अपात्राय धनं दत्ते यो हित्वा पात्रमुत्तमम् ।
साधुं विहाय चौराय तदर्पयति स स्फुटम् ॥

कौ रिङ्गन्ति ततः पदैः कलगिरो यान्ति स्खलद्भिस्ततः ।
स्थेयोभिश्च ततः कलागुणभृतस्तारुण्यभोगोद्गताः
सप्ताहेन ततो भवन्ति सुदृगादानेऽपि योग्यास्ततः ॥ ६८ ॥

टीका—लिहन्ति आस्वादयन्ति । के, आर्याः भोगभूमिजमनुजाः कं, स्वांगुष्ठं । कान्, दिवसान् । कति, सप्त जन्मानन्तरं सप्ताहमित्यर्थः । किंविशिष्टाः सन्तः, उत्तानशया उत्तानमनधोमुखं शेरते । ततः प्रथमसप्ताहानन्तरं रिङ्गन्ति पद्भ्यां सर्पन्ति । के, आर्याः । कस्यां, कौ भूमौ । कान्, सप्तदिवसान् । ततो द्वितीयसप्ताहानन्तरं यान्ति सञ्चरन्ति । के आर्याः । कस्यां, कौ । कैः, पदैः पादन्यासैः । किं कुर्वद्भिः, स्खलद्भिर्यत्रतत्र पतद्भिः । किंविशिष्टाः सन्तः, कलगिरो मनोहरवाचः । ततस्तृतीयसप्ताहानन्तरमार्याः सप्ताहेन सप्तभिर्दिनैः स्थेयोभिः स्थिरतरैः पदैः यान्ति गच्छन्ति । कस्यां, कौ पृथिव्यां । ततश्चतुर्थसप्ताहानन्तरमार्याः सप्ताहेन सप्तभिर्दिनैः कलगीतादिगुणाँश्च लावण्यादीन् बिभ्रतो भवन्ति । ततः पञ्चमसप्ताहानन्तरं सप्ताहेनार्याः तारुण्यभोगोद्गता उदितोदितयौवना अविच्छिन्नमद्यादीष्टविषयाश्च भवन्ति । ततः षष्ठसप्ताहानन्तरं सप्ताहेनार्याः योग्या भवन्ति । क, सुदृगादाने सम्यक्त्वग्रहणे । अपिर्विस्मये ॥ ६८ ॥

अथ मुनिदेयनिर्णयार्थमाह—

तपःश्रुतोपयोगीनि निरवद्यानि भक्तितः ।
मुनिभ्योऽन्नौषधावास–पुस्तकादीनि कल्पयेत् ॥ ६९ ॥

टीका—कल्पयेदुपकारयेत् । सद्गृही । कानि, अन्नौषधावासपुस्तकादीनि । आदिशब्देन पिच्छिकाकमण्डल्वादीनि । केभ्यो, मुनिभ्यः संयतेभ्यः । कस्मात्, भक्तितः । किंविशिष्टानि, तपःश्रुतोपयोगीनि तपसः श्रुतज्ञानस्य चोपकारकाणि । पुनः किंविशिष्टानि, निरवद्यानि पिण्डशुध्युक्तोद्गमोत्पादनादिदोषरहितानि ॥ ६९ ॥

अन्नादिदानफलानां क्रमेण निदर्शनान्याह—

भोगित्वाद्यन्तशान्तिप्रभुपदमुदयं संयतेऽन्नप्रदाना-
च्छ्रीषेणो रुग्निषेधाद्धनपतितनया प्राप सर्वौषधर्द्धिम् ।
प्राक्तज्जन्मर्षिवासावनशुभकरणात्सूकरः स्वर्गमग्र्यं
कौण्डेशः पुस्तकार्चावितरणविधिनाऽप्यागमाम्भोधिपारम् ॥७०॥

टीका--प्राप लब्धवान् । कोऽसौ, श्रीषेणो नाम राजा । कम्, उदयमभ्युदयं । किंविशिष्टं, भोगित्वाद्यन्तशान्तिप्रभुपदं भोगित्वमुत्तमभोगभूमिजत्वमादावन्ते च शान्तिप्रभोः शान्तिनाथतीर्थङ्करस्य पदं यस्य तं । कस्मात्,—न्नप्रदानात् विधिवदाहारवितरणात् । क, संयते संयमभाजि आदित्यगत्याख्यारिञ्जयसंज्ञचारणर्षियुगले । बीजत्वमात्रविवक्षाऽत्र । तथाविधाभ्युदयस्योत्तरपुण्यविशेषोदयसम्पाद्यत्वात् । तथा प्राप । काऽसौ, धनपतितनया वृषभसेनाभिधाना पूर्वभवे राज्ञो देवकुलस्य सम्मार्जिका । कां प्राप, सर्वौषधर्द्धिं सर्वेषां ज्वरातिसारादिव्याधीनामौषधं चिकित्सितं तस्य ऋद्धिरव्याहतसिद्धिस्तां । कस्मात्, रुग्निषेधात् व्याधिप्रतिकारादौषधादेः दोषनिषेधात् । क, संयते तपोधने । तथा प्राप । कोऽसौ, शूकरो वराहः । कं, स्वर्गं । किंविशिष्टं, अग्र्यं सौधर्मे महर्द्धिकदेवत्वमित्यर्थः । कस्मात्, प्रागित्यादि—प्राक्च पूर्वं तच्च तात्कालिकं च प्राक्त,प्राक्ते च ते जन्मनी च प्राक्तज्जन्मनी तयोः ऋषेर्वासावने निवासरक्षणे तयोः शुभकरणः शुभाभिसन्धिपरिणामस्तस्मात् । पूर्वभवे मुनेरावासदानाभिप्रायेण तद्भवे च रक्षणाभिप्रायेणेत्यर्थः । तथा कौण्डेशोऽपि गोविन्दाख्यगोपालचरो ग्रामकूटपुत्रः सन् कौण्डेशो नाम मुनिश्च प्राप । कम्, आगमाम्भोधिपारं द्वादशाङ्गश्रुतसारपर्यन्तं । केन पुस्तकस्य अर्चायाः पूजायाः वितरणस्य च दानस्य विधिना करणेन ॥ ७० ॥

जिनधर्मानुबन्धार्थमसतां मुनीनामुत्पादने सतां च गुणातिशयसम्पादने प्रयत्नविधानार्थमाह——

जिनधर्मं जगद्बन्धु-मनुबध्दुमपत्यवत् ।
यतीञ्जनयितुं यस्येत्तथोत्कर्षयितुं गुणैः ॥ ७१ ॥

टीका—यस्येत् प्रयतेत । सद्गृही । किं कर्तुं, जनयितुम् अपूर्वानुत्पादयितुं । कान् साधून । किंवत्, अपत्यवत् पुत्रान्यथा । किं कर्तुम्, अनुबध्दुं सन्तत्या प्रवर्तयितुं । कं, जिनधर्मं । किंविशिष्टं, जगद्बन्धु लोकानामुपकारकं । तथा यस्येत् । किं कर्तुम्, उत्कर्षयितुम् उत्कृष्टान् कर्तुं । कान् वर्तमानान् यतीन्। कै,-र्गुणैः श्रुज्ञानादिभिः । जिनधर्ममित्यादि पूर्ववदत्रापि योज्यम् ॥७१॥

सम्प्रति पुरुषाणां दुष्कर्मगुणत्वाद्गुणातिशयासिद्धेर्दर्शनात्तदुत्पादने निष्फलः प्रयत्न इति गृहिणां मनोभङ्गनिषेधार्थमाह—

श्रेयो यत्नवतोऽस्त्येव कलिदोषाद्गुणद्युतौ ।
असिद्धावपि तत्सिद्धौ स्वपरानुग्रहो महान् ॥ ७२ ॥

टीका—अस्त्येव नियमेन भवति । किं तत्, श्रेय पुण्यं । कस्य, यत्नवतः प्रयतमानस्य गृहस्थस्य कस्मिन्विषये, गुणद्युतौ गुणातिशयशालिनां विषये । कस्यां सत्याम्,असिद्धावपि आवृत्या गुणद्युतावनिष्पत्तावपि । कस्मात्, कलेः पञ्चमकालस्य पापकर्मणो वा दोषादपराधात् प्रातिलोम्यादित्यर्थः।तत्सिद्धौ महालाभमाह । भवति । कोऽसौ, स्वपरानुग्रहः स्वस्य वैय्यावृत्यकरस्य परस्य च साधर्मिकस्य सामान्यजनस्य च अनुग्रह उपकारः । किंविशिष्टो, महान् विपुलः । कस्यां सत्यां, तत्सिद्धौ तेषां गुणद्युतां निष्पत्तौ । कस्मात्, कलिदोषाद्दुष्कर्मप्रतिघातात् दैवदुर्योगादित्यर्थः ॥ ७२ ॥

महाव्रतमणुव्रतं वा बिभ्रत्यः स्त्रियोऽपि धर्मपात्रतयाऽनुग्राह्या इति समर्थयितुमाह——

आर्यिकाः श्राविकाश्चापि सत्कुर्याद्गुणभूषणाः ।
चतुर्विधेऽपि सङ्घे यत्फलत्युप्तमनल्पशः ॥ ७३ ॥

टीका—सत्कुर्याद्यथोक्तविनयप्रतिपत्त्यादिना आवर्जयेत् सद्गृही । काः, आर्यिका उपचरितमहाव्रतधराः स्त्रीः, न केवलं ताः श्रविकाश्च यथाशक्तिमूलोत्तरगुणभृतः तदुपासिकाश्च । अपिशब्दान्न केवलं व्रतिन्योऽव्रतिनीरपि सन्मानयेदित्यर्थः। किंविशिष्टाः, गुणभूषणाः गुणाः श्रुततपःशीलादयो भूषणान्यलङ्करणानि यासां ताः । यद्यस्मात् । फलति इष्टं सम्पादयति । किं तत्, उप्तं

विधिवत्प्रयुक्तं भक्तवसत्यादि। क, सङ्घे गुणसङ्घाते प्राणिगणे। किंविशिष्टे, चतुर्विधे यत्यार्यिकाश्रावकश्राविकाप्रकारे। न केवलमर्हच्चैत्यचैत्यालयश्रुतेषु विधिवत्प्रयुक्तमात्मीयं धनमल्पशः प्रभूतं भूत्वा फलति, किं तर्हि, सङ्घेऽपीत्यपिशब्दार्थः। एतेन सप्त गृहिणो धनव्ययस्थानानीत्युपदिष्टं वेदितव्यम् ॥७३॥

एवं धर्मपात्रानुग्रहं गृहस्थस्यावश्यकार्यतयोपदिश्य सम्प्रति कार्यपात्रानुग्रहविध्युपदेशार्थमाह—

धर्मार्थकामसध्रीचो यथौचित्यमुपाचरन् ।
सुधीस्त्रिवर्गसम्पत्त्या प्रेत्य चेह च मोदते ॥ ७४ ॥

टीका—मोदते प्रह्लादते। कोऽसौ, सुधीः सद्बुद्धिः। कया, त्रिवर्गसम्पत्त्या धर्मार्थकामसम्पदा। क प्रेत्य जन्मान्तरे। इहास्मिञ्जन्मनि। द्वौ चशब्दौ जन्मद्वयेऽपि तुल्यकक्षतां सूचयतः। किं कुर्वन्नुपाचरन् उपकुर्वन्, ऋणीकमन्यान् कुर्वन्। कान्, धर्मार्थकामसध्रीचः त्रिवर्गसहकारिणः पुरुषान्। कथं, यथौचित्यं यद्यद्यस्य यस्य योग्यं दानमानादिकं तत्तत्तस्य तस्य कुर्वन्नित्यर्थः ॥ ७४ ॥

एवं समदत्तिं पात्रदत्तिं च प्रबन्धेनाभिधायेदानीं दयादत्तिं विधेयतमत्वेनोपदिशन्नाह—

सर्वेषां देहिनां दुःखाद्बिभ्यतामभयप्रदः ।
दयार्द्रो दातृधौरेयो निर्भीः सौरूप्यमश्नुते ॥ ७५ ॥

टीका—अश्नुते प्राप्नोति। कोऽसौ, अभयप्रदः प्राणादिभयापसारकः।

---

१ तेनाधीतं श्रुतं सर्वं तेन तप्तं परं तपः ।
तेन कृत्स्नं कृतं दानं यः स्यादभयदानवान् ॥
धर्मार्थकाममोक्षाणां जीवितं मूलमिष्यते ।
तद्रक्षता न किं दत्तं हरता तन्न किं हृतम् ॥
दानमन्यद्भवेन्मा वा नरश्चेदभयप्रदः । सर्वेषामेव दानानां यतस्तद्दानमुत्तमम् ॥
यो भूतेष्वभयं दद्यात् भूतेभ्यस्तस्य नो भयम् ।

केषां देहिनां प्राणिनां। किं कुर्वतां, बिभ्यतां । त्रस्यतां। कस्मात्, दुःखात् देहमनस्तापात् । कियतां सर्वेषां । किम्, अश्नुते, सौरूप्यं रूपातिशयं। उपलक्षणात्स्थैर्यं गाम्भीर्यं तेजस्वित्वमादेयत्वं सौभाग्यं सौम्यत्वं त्यागित्वं भोगित्वं यशस्वित्वं निरामयत्वं चिरंजीवित्वमित्यादिलोकोत्तरगुणग्रामं । किंविशिष्टः सन्, निर्भीः सर्वतो भयरहितः। किंविशिष्टोऽसौ, दयार्द्रः करुणामृदुहृदयः। पुनः किंविशिष्टः, दातृधौरेयः अन्नादिदातृणमग्रणीः । धर्मार्थकाममोक्षाणां जीवितमूलत्वाज्जीवितप्रदः किमभिमतं न ददातीति भावः ॥ ७५ ॥

अथ कर्मधर्म्येमित्यादि प्राक् सूचितं प्रपञ्चयन् श्रिताभरणकृपादानपुरस्सरं दिवाभोजनमुपदिशन्नीरादीनां रात्रावप्यप्रत्याख्येयतामाख्याति —

भृत्वाऽऽश्रितानवृत्त्याऽऽर्तान्कृपयाऽनाश्रितानपि ।
भुञ्जीतान्ह्यम्बुभैषज्य-ताम्बूलैलादि निश्यपि ॥ ७६ ॥

टीका—भुञ्जीत ओदनादिकमुपयुञ्जीत गृही । क्व, अन्हि दिने। किं कृत्वा, भृत्वा पोषयित्वा । कान्, आश्रितान् अनन्यस्वामिकान् मानुषान् तिरश्चश्च । किंविशिष्टान्, अवृत्त्या जीवनाभावेनार्ता अनवस्थितचित्तास्तान् न केवलमाश्रिताननाश्रितानपि भृत्वा । कया, कृपया करुणया, न केवलं तथा कृत्वा दिवा भक्तादिकं भुञ्जीत। निश्यपि रात्रावपि भुंजीत। किं तत् अम्ब्वादि अम्बु जलं, भैषज्यमोषधं ताम्बूलं क्रमुक, एला प्रसिद्धा। आदिशब्देन जातीफलकर्पूरादिमुखवासनप्रायद्रव्यपरिग्रहः ॥ ७६ ॥

यादृग्वितीर्यते दानं तादृगाध्यास्यते फलम् ॥
सौरूप्यमभयादाहुराहाराद्भोगवान्भवेत् ।
आरोग्यमौषधाज्ज्ञेयं श्रुतात्स्यात् श्रुतकेवली ॥
मनोभूरिव कान्ताङ्गः सुवर्णाद्रिरिव स्थिरः ।
सरस्वानिव गम्भीरो विवस्वानिव भासुरः ॥
आदेयः सुभगः सौम्यस्त्यागी भोगी यशोनिधिः ।
भवत्यभयदानेन चिरजीवी निरामयः ॥

१ ताम्बूलमौषधं तोयं मुक्त्वाऽऽहारादिकां क्रियाम् ।
प्रत्याख्यानं प्रदीयेत यावत्प्रातर्दिनं भवेत् ॥

सेव्यानामप्यर्थानां सेवायामसम्भवत्त्यां कालपरिस्थित्या प्रत्याख्येयतामुपदिश्य तत्प्रत्याख्यानं फलवत्तया समर्थयते—

यावन्न सेव्या विषयास्तावत्तानाप्रवृत्तितः।
व्रतयेत्सव्रतो दैवान्मृतोऽमुत्र सुखायते॥ ७७॥

टीका—आप्रवृत्तितो व्रतयेत् आप्रवृत्तेर्निवृत्तिर्मेऽस्य ताम्बूलादेरिति नियमेद्गृही। कान, तान् ताम्बूलकामिन्यादिविषयान्। कथं, तावत् तावन्तं कालं। यावत्किं, यावन्तं कालं। न सेव्या न सेवितुं सम्भाव्याः। के ते, विषयाः। एवं कृते किं फलं स्यादित्याह—सुखायते सुखमनुभवति। कोऽसौ, स तथा कृतनियमः। क्व, अमुत्र परलोके। किंविशिष्टो, मृतः। कस्मात्, दैवात् कर्मवशात्। किंविशिष्टः सन्, सव्रतस्तथाव्रतभावितः।।७७॥

तपश्चर्यं च शक्तित इत्युक्तं तद्विशेषविधिमभिधत्ते—

पञ्चम्यादिविधिं कृत्वा शिवान्ताभ्युदयप्रदम्।
उद्द्योतयेद्यथासम्पन्निमित्ते प्रोत्सहेन्मनः॥ ७८॥

टीका—उद्द्योतयेत उद्यापयेत्। कं, पञ्चम्यादिविधिं पञ्चम्यां पुष्पाञ्जलिमुक्तावलिरत्नत्रयादिविधानं किंविशिष्टं, शिवान्ताभ्युदयप्रदं निःश्रेयसावसानशक्रचक्रधरादिपदसम्पादकं किं, कृत्वा यथाम्नायं परिसमाप्य। कथम् उद्द्योतयेत, यथासम्पद्यथाविभवं। ननु नित्यानुष्ठाने सत्यपि किमिदमनुष्ठीयते इत्याह—प्रोत्सहेत् नित्यानुष्ठानापेक्षया प्रकर्षेणोत्साहं गच्छेत् मनश्चित्तं। क्व, निमित्ते नैमित्तिकानुष्ठाने॥ ७८॥

अथ व्रतग्रहणरक्षणच्छेदोपस्थापनविधीनुपदिशति—

समीक्ष्य व्रतमादेयमात्तं पाल्यं प्रयत्नतः।
छिन्नं दर्पात्प्रमादाद्वा प्रत्यवस्थाप्यमञ्जसा॥ ७९॥

टीका—आदेयं ग्राह्यं श्रेयोऽर्थिना। किं तत्, व्रतं। किं कृत्वा, समीक्ष्य आत्मानं देशकालस्थानसहायादींश्च सम्यगालोच्य। तथा पाल्यं रक्षणीयं व्रतं। किंविशिष्टम्, आत्तं तथा गृहीतं। कस्मात्, प्रयत्नतः प्रकृष्टयतनया। तथा प्रत्यवस्थाप्यं प्रायश्चित्तविधिना पुनरनुसन्धेयं व्रतं। कथम्, अञ्जसा

मद्य एव । किंविशिष्टं तत्, छिन्नम् अतिचरितं । कस्मात्, दर्पात् मदावेशात् प्रमादाद्वाऽनवधानात् ॥ ७९ ॥

किं व्रतमित्याह—

सङ्कल्पपूर्वकः सेव्ये नियमोऽशुभकर्मणः ।
निवृत्तिर्वा व्रतं स्याद्वा प्रवृत्तिः शुभकर्मणि ॥ ८० ॥

टीका—स्याद्भवेत् । किं तत्, व्रतं । किं, नियमः प्रत्याख्यानं । क, सेव्ये स्वदारताम्बूलादौ । किंविशिष्टः, संकल्पपूर्वकः, इदमियदेतावन्तं कालं न सेविष्येऽहमिति मनसाऽध्यवसायं कृत्वा इत्यर्थः । अथवा अहमिदमियदेतावन्तं कालं सेविष्याम्येवेति सङ्कल्पेन नियमः प्रतिज्ञा व्रतं स्यात् । अथवा व्रतं स्यात् । किं, निवृत्तिः विरतिः । कस्मात्, अशुभकर्मणो हिंसादेः । किंविशिष्टा, सङ्कल्पपूर्विकेति लिङ्गपरिणामेन सम्बन्धः । अथवा व्रतं स्यात् । किं, प्रवृत्तिराचरणं । क, शुभकर्मणि पात्रदानादौ । सङ्कल्पपूर्विकेत्यत्रापि योज्यम् ॥ ८० ॥

विशिष्टागमप्रत्ययावष्टम्भात्प्राणिरक्षाविधिमनुशास्ति —

न हिंस्यात्सर्वभूतानीत्यार्षं धर्मे प्रमाणयन् ।
सागसोऽपि सदा रक्षेच्छक्त्या किं नु निरागसः ॥ ८१ ॥

टीका—रक्षेत् पालयेत् । कोऽसौ, धर्मी धार्मिकः । कान्, सागसोऽपि सापराधानपि जीवान् । कया, शक्त्या यथाशक्ति । किं निमित्तं, धर्मे धर्मनिमित्तं । क, सदा सर्वस्मिन् काले किं नु निरागसो निरपराधान् विशेषतो रक्षेदित्यर्थः । किं कुर्वन्, प्रमाणयन् अविसंवादयन् इदमेवमित्थमेवेति प्रतिपद्यमानः । किं तत्, आर्षं ऋषिभिः प्रोक्तं शास्त्रं । किंरूपमित्याह—इति एवं रूपं । न हिंस्यात् न हन्यात् । कोऽसौ, श्रेयोऽर्थी । कानि, सर्वभूतानि सर्वान् त्रसस्थावरजीवान् ॥ ८१ ॥

साङ्कल्पिकहिंसापरित्यागमुपदिश्यार्थान्तरन्यासेन समर्थयते—

आरम्भेऽपि सदा हिंसां सुधीः साङ्कल्पिकीं त्यजेत् ।
घ्नतोऽपि कर्षकादुच्चैःपापोऽघ्नन्नपि धीवरः ॥ ८२ ॥

टीका—त्यजेत् परिहरेत्। कोऽसौ, सुधीः शास्त्रबलेन हिंसायाः फलमेतदिति निश्चितमतिः। कां, हिंसा प्राणातिपातं। किंविशिष्टां, साङ्कल्पिकीं अमुं जंतुं मांसाद्यार्थित्वेन हन्मीति सङ्कल्पपूर्विकां। आरम्भजा तु हिंसाऽशक्यप्रत्याख्यानेति तत्र यतनामेव कुर्यादिति भावः। क्व सति, आरम्भेऽपि कृष्यादिकर्मण्यपि प्रवर्तमानः। कथं, सदा नित्यं। हि यस्मात् भवति। कोऽसौ, धीवरो मात्स्यिकः किंविशिष्टः उच्चः पापः उत्कृष्टपातकी। किं कुर्वन्नपि, बहून्मत्स्यान् हनिष्यमीत्यभिध्यानेन प्रवृत्तोऽमारयन्नपि। कस्मात्, कर्षकात् कर्षणप्रवृत्तात् किं कुर्वतो, घ्नतोऽपि देवब्राह्मणकुटुम्बाद्यर्थं धान्यमुत्पादयिष्यामीति अभिध्यानविशेषेण प्रवत्ताद्बहूनपि मारयतः॥ ८२॥

परैर्विधेयतया व्यवस्थाप्यमानं हिंस्रादिप्राणिनां वधं प्रतिविधातुमाह——

हिंस्रदुःखिसुखिप्राणि-घातं कुर्यान्न जातुचित्।
अतिप्रसङ्गश्वभ्रार्ति-सुखोच्छेदसमीक्षणात्॥ ८३॥

टीका—न कुर्यात् श्रेयोऽर्थी कं, हिंस्रदुःखिसुखिप्राणिघातं। कथं, जातुचित् कदाचिदपि। कुतः, अतीत्यादि—हिंस्रा व्याघ्रादयः। अत्र केचिदाहुः, हिंस्रजीवा हन्तव्याः। हिंस्रे ह्येकस्मिन्हते भूयसां रक्षा कृता भवति। ततश्च धर्माधिगमः पापोपरमश्च स्यात्। तदयुक्तमतिप्रसङ्गात्। सर्वेषां प्राणिनां हिंस्रतया हन्तव्यतानुषङ्गात्। तथा च लाभमिच्छतां तथावादिनां मूलोच्छेदः स्यात्। न च बहुरक्षणाभिप्रायेणापि हिंस्रं हिंसतो धर्मः पापोच्छेदो वा युज्येत। दयामूलत्वात्तयोः। यच्च संसारमोचकाः प्रचक्षते दुःखिनो जीवा हन्तव्यास्तेषां विनाशे दुःखविनाशसम्भवादिति; तदप्ययुक्त। तेषां स्वल्पदुःखानां निहतानां नरकेऽनन्तदुःखे संयोजनाया दुर्निवारत्वात्। अन्ये त्वाहुः—सुखिनो हन्तव्याः यतः संसारे सुखं दुर्लभं। सुखिनश्च हताः सुखिन एव भवन्तीति तदप्यसङ्गतं। सुखिनां हन्यमानानां दुःखावेशेन सुखोच्छेदस्यावश्यम्भावात्। दुःखमृत्युना च दुर्ध्यानानुसन्धानाद्दुरन्तदुर्गतिदुःखावर्तनिर्वर्तनात्। तदल—

मतिप्रसङ्गेन । स्वगता परगता वा यथाकथञ्चित्क्रियमाणा हिंसा न धर्माय स्यात् । किं तर्हि, पातकसम्भवायैवेति प्रतिसंयमानैर्यथाशक्ति तत्परित्यागे धर्मार्थिभिः सन्ततं यतितव्यमिति आप्तसूक्तोपनिषत् ॥ ८३ ॥

अथ पाक्षिकस्य दृग्विशुद्ध्यर्थां लोकानुवृत्त्यर्थाश्च क्रियाः कृत्यतयोपदिशति

स्थूललक्षः क्रियास्तीर्थ यात्राद्या दृग्विशुद्धये ।
कुर्यात्तथेष्टभोज्याद्याः प्रीत्या लोकानुवृत्तये ॥ ८४ ॥

टीका—कुर्यात् । कोऽसौ स्थूललक्षः स्थूलं व्यवहारं लक्षयत्यालोचयतीति स्थूललक्षो व्यवहारप्रधानो बहुप्रदश्च गृही । काः, क्रियाः । किंविशिष्टाः तीर्थयात्राद्याः तीर्थान्यूर्जयन्तादीनि पुण्यपुरुषाध्युषितस्थानानि तेषु यात्रा आद्या यासु ताः । किमर्थं, दृग्विशुद्धये सम्यक्त्वनिर्मलीकरणार्थं । तथा स्थूललक्षः क्रियाः कुर्यात् । किंविशिष्टाः, इष्टभोज्याद्याः इष्टाः सधर्माणः स्वजना मित्रादयो भोज्यन्ते स्वगृहे भोजनं कार्यन्ते यस्यां सा इष्टभोज्या क्रिया, सा आद्या आसु अतिथिपूजनभूतबल्यादिक्रियासु ताः । कया, प्रीत्या हर्षेण नोद्वेगेन । किमर्थं, लोकानुवृत्त्यै लोकचित्तानुवर्जनार्थम् ॥ ८४ ॥

श्रेयोऽर्थिनः कीर्तेरप्यर्जनीयत्वमाह—

अकीर्त्या तप्यते चेतश्चेतस्तापोऽशुभास्रवः ।
तत्तत्प्रसादाय सदा श्रेयसे कीर्तिमर्जयेत् ॥ ८५ ॥

टीका—तप्यते संक्लिश्यते । किं तत् चेतश्चित्तं । कया, अकीर्त्या अयशसा । भवति च । कोऽसौ, चेतस्तापो मनःकालुष्यं । किंविशिष्टो, ऽशुभास्रवः पापहेतुः । यत एवं तत्तस्मात्कारणात् । अर्जयेत् उपार्जयेत् । गृही । कां, कीर्तिं । कथं, सदा । कस्मै, तत्प्रसादाय चेतःप्रसत्त्यर्थम् । कस्मै तत्प्रसादः, श्रेयसे । अथवा श्रेयसे । पुण्यकारणाय तत्प्रसादायेति व्याख्येयम् । ८५

कीर्त्युपार्जनोपायमाह—

परासाधारणान्गुण्यप्रगण्यानघमर्षणान् ।
गुणान् विस्तारयेन्नित्यं कीर्तिविस्तारणोद्यतः ॥ ८६ ॥

टीका—विस्तारयेद्विपुलीकुर्यात्। कोऽसौ, कीर्तिविस्तारणोद्यतो यशःप्रसारणतत्परः। कान्, गुणान् दानसत्यशौचशीलादीन्। किंविशिष्टान्, परासाधारणान् अनन्यसदृशान्। पुनः किंविशिष्टान्, गुण्यप्रगण्यान् गुणवद्भिः प्रकर्षेण माननीयान्। पुनरपि किंविशिष्टान् अघमर्षणान् पापविध्वंसिनः ॥८६॥

एवंविधाचारपरस्य श्रावकस्योत्तरोत्तरभूमिकाश्रयणेन सकलविरतिपदाधिरोहणविधिमुपदिशति—

> सैषः प्राथमकल्पिको जिनवचोऽभ्यासामृतेनासकृ-
> न्निर्वेदद्रुममावपन् शमरसोद्गारोद्धुरं बिभ्रति।
> पाकं कालिकमुत्तरोत्तरमहान्त्येतस्य चर्याफला
> न्यास्वाद्योद्यतशक्तिरुद्धचरितप्रासादमारोहतु ॥ ८७ ॥

टीका—आरोहतु चटतु। कोऽसौ, सैष स एवेत्यर्थः पादपूरणेऽत्र सेर्लोपः। कोऽसौ, प्राथमकल्पिकः प्रारब्धदेशसंयमः। कमारोहतु, उद्धचरितप्रासादं सल्लेखनान्तयतिधर्मसौधं। किंविशिष्टः सन्, उद्यतशक्तिरुद्धूनसामर्थ्यः। किं कृत्वा, आस्वाद्यानुभूय कानि, चर्याफलानि दर्शनिकादिप्रतिमाफलानि कस्य, एतस्य निर्वेदद्रुमस्य। किंविशिष्टानि, उत्तरोत्तरमहान्ति यथोत्तरं पृथूनि। किं कुर्वन्ति, बिभ्रति धारयन्ति। किं, पाकमात्मीयपरिणतिं परिपाकं च। किंविशिष्टं, कालिकं कालकृतं। पुनः किंविशिष्टं, शमरसोद्गारोद्धुरं शमः प्रशमसुखं स एव रसो रसनेन्द्रियग्राह्यो गुणस्तस्योद्गारोऽभिव्यक्तिस्तेनोद्धुरं उत्कटं स एव वा उद्धुरो यत्र। किं कुर्वन्, आवपन् सिञ्चन् पोषयन्। कं, निर्वेदद्रुमं संसारशरीरभोगवैराग्यवृक्षं। केन, जिनवचोऽभ्यासामृतेन जिनागमभावनापीयूषेण। कथम्, असकृदभीक्ष्णमिति भद्रम् ॥ ८७ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां भव्यकुमुदचन्द्रिकासंज्ञायामादित एकादशः प्रक्रमाच्च द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

तृतीयोऽध्यायः ।

नैष्ठिकलक्षणमाह—

देशयमघ्नकषायक्षयोपशमतारतम्यवशतः स्यात् ।
दर्शनिकाद्येकादशदशावशो नैष्ठिकः सुलेश्यतरः ॥ १ ॥

टीका—स्याद्भवेत् । कोऽसौ, नैष्ठिकः । श्रावकः । किंविशिष्टो, दर्शनिकाद्येकादशदशावशः, दर्शनं निर्मलमद्यादिविरत्याहितातिशयं सम्यक्त्वमस्यास्तीति 'अतिशायने ठावत' इति ठः । एवं व्रतिकादित्रयो व्युत्पाद्याः । दर्शनिक आदिर्यासां व्रतिकादीनां ता दर्शनिकादय एकादशदशाः श्रावकसंयमस्थानानि, तासां वशः पारतंत्र्यं यस्य स घटमानदेशसंयम इत्यर्थः । कस्मात्, देशेत्यादि—देशयमघ्ना अप्रत्याख्यानावरणाख्याः कषायाः क्रोधादयस्तेषां क्षयेनोदयाभावेन प्रत्याख्यानावरणकषायोदयविशिष्टेन युक्त उपशमः सदवस्था तत्क्षयोपशमस्तस्य तारतम्यं यथोत्तरमुत्कर्षस्तद्वशतस्तत्पारतन्त्र्यात् । पुनः किंविशिष्टः स्यात्, सुलेश्यतरः । लिंपति स्वीकरोति पुण्यपापे स्वयं जीवो यया सा लेश्या, अथवा लिशत्यल्पीकरोत्यात्मानमित्ति लेश्या कषायोदयः

---

१ लिम्पत्यात्मीकरात्योत्मा पुण्यपापे यया स्वयम् ।
सा लेश्येत्युच्यते सद्भिर्द्विविधा द्रव्यभावतः ॥
प्रवृत्तिर्यौगिकी लेश्या कषायोदयरञ्जिता ।
भावतो द्रव्यतो देहच्छविः षोढोभयी मता ॥
कृष्णा नीलाऽथ कापोती पीता पद्मा सिता स्मृता ।
लेश्या षड्भिः सदा ताभिर्गृह्यते कर्म जन्मिभिः ॥
योगाविरतिमिथ्यात्वकषायजनितोऽङ्गिनाम् ।
संस्कारो भावलेश्याऽस्ति कल्मषास्रवकारणम् ॥
कापोती कथिता तीव्रो नीला तीव्रतरो जिनैः ।
कृष्णा तीव्रतमो लेश्या परिणामः शरीरिणाम् ॥
पीता निवेदिता मन्दः पद्मा मन्दतरो बुधैः ।
शुक्ला मन्दतमस्तासां वृद्धिः षट्स्थानयायिनी ॥

रञ्जिता योगप्रवृत्तिः सैषा भावतः, द्रव्यतस्तु शरीरच्छविर्लेश्या । सा च द्वितय्यपि कृष्णादिभेदेन षोढा, कृष्णा नीला कापोती पीता पद्मा शुक्ला चेति । प्रशस्ता लेश्या यस्यासौ सुलेश्यः प्रकृष्टः पाक्षिकापेक्षया सुलेश्यः । सुलेश्यतरः अथवा सर्वेऽपि यथोत्तरं विशुद्धतरलेश्याः स्युः ॥ १ ॥

दर्शनिकादीनुद्दिशंस्तेषां गृहित्वब्रह्मचारित्वभिक्षुकत्वानि जघन्यमध्यमोत्तमत्वाच्च विभक्तुमार्याद्वयमाह——

निर्मूलस्कन्धयोश्छेत्तुं भावाः शाखोपशाखयोः ।
उच्चित्य पतितादाने भावलेश्या फलार्थिनाम् ॥
षट्षट् चतुषु विज्ञेयास्तिस्रास्तिस्रः शुभास्त्रिषु ।
शुक्ला गुणेषु षट्स्वेका लेश्या निर्लेश्यमन्तिमम ॥

रागद्वेषग्रहाविष्टो दुर्ग्रहो दुष्टमानसः । क्रोधमानादिभिस्तीव्रग्रस्तोऽनन्तानुबन्धिभिः॥
निर्दयो निरनुक्रोशो मद्यमांसादिलम्पटः। सर्वदा कदनासक्तः कृष्णलेश्यान्वितो जनः

कोपी मानी मायी लोभी । रागी द्वेषी मोही शोकी ।
हिंस्रः क्रूरश्चण्डश्चौरो । मूर्खः स्तब्धः स्पर्द्धाकारी ॥
निद्रालुः कामुको मन्दः कृत्याकृत्याविचारकः ।
महामूर्च्छो महारम्भो नीललेश्यो निगद्यते ॥

शोकभीमत्सरासूयापरनिन्दापरायणः । प्रशंसति सदाऽऽत्मानं स्तूयमानः प्रहृष्यति ॥

वृद्धिहानी न जानाति न मूढः स्वपरान्तरम् ।
अहङ्कारग्रहग्रस्तः समस्तां कुरुते क्रियाम ॥

श्लाघितो नितरां दत्ते रणे मर्त्तुमपीहते । परकीययशोध्वंसी युक्तः कापोतलेश्यया ॥
समदृष्टिरविद्वेषो हिताहितविवेचकः । वदान्यः सदयो दक्षः पीतलेश्यो महामनाः ॥

शुचिर्दानरतो भद्रो विनातात्मा प्रियंवदः ।
साधुपूजाद्यतः साधुः पद्मलेश्यो नयक्रियः ॥
निर्निदानोऽनहंकारः पक्षपातोज्झितोऽशठः ।
रागद्वेषपराचीनः शुक्ललेश्यः स्थिराशयः ।
तेजः पद्मा तथा शुक्ला लेश्यास्तिस्रः प्रशस्तिकाः।
संवेगमुत्तमं प्राप्तः क्रमेण प्रतिपद्यते ॥

दर्शनिकोऽथ व्रतिकः सामयिकी प्रोषधोपवासी च ।
सचित्तदिवामैथुन–विरतो गृहिणोऽणुयमिषु हीनाः षट् ॥२॥
अब्रह्मारम्भपरि–ग्रहविरता वर्णिनस्त्रयो मध्याः ।
अनुमतिविरतोद्दिष्टवि–रतावुभौ भिक्षुकौ प्रकृष्टौ च ।३॥ युग्मं ।

टीका–अथशब्दोऽत्रानन्तर्यार्थः प्रत्येकं योज्यः। भवन्ति। के, श्रावकाः। कति, षट्। किंविशिष्टा भवन्ति, हीना जघन्याः। केषु मध्ये, अणुयमिषु। श्रावकेषु न केवलं हीनाः गृहिणश्च। कः कः, दर्शनिकोऽथानन्तरं व्रतिकस्ततः सामयिकी तदनु प्रोषधोपवासी तदनन्तरं सचित्तविरतोऽपि दिवामैथुनविरतश्च। भवन्ति। के ते, त्रय। किंविशिष्ट, मध्याः अणुयमिषु मध्ये मध्यमाः। पुनः किंविशिष्ट, वर्णिनो ब्रह्मचारिणः। कति, त्रयः। किमाख्या, अब्रह्मारम्भपरिग्रहविरता अब्रह्मविरतः, आरम्भविरतः परिग्रहविरतश्च। तदनन्तर भवतः। कौ, उभौ। किंविशिष्टौ, प्रकृष्टौ अणुयमिषु मध्ये उत्कृष्टौ। पुनः किंविशिष्टौ, भिक्षुकौ। अल्पा भिक्षा यत्यपेक्षया ययोस्तौ। किमाख्यौ, अनुमतिविरतोद्दिष्टविरतौ ॥ २।३ ॥

नैष्ठिकोऽपि यादृशः सन् पाक्षिकव्यपदेशमेव लभते तादृशं दर्शयति–

दुर्लेश्याभिभवाज्जातु विषये क्वचिदुत्सुकः ।
स्खलन्नपि क्वापि गुणे पाक्षिकः स्यान्न नैष्ठिकः ॥ ४ ॥

टीका–स्याद्भवेत् गृही। किंविशिष्टः, पाक्षिको न नैष्ठिकः। किंविशिष्टः सन्, उत्सुकः सोत्कण्ठाभिलाषः क्व, विषये इन्द्रियार्थे। किंविशिष्टे, क्वचित् कामिन्यादीनामन्यतमे न सर्वत्र। कदा, जातु कदाचिन्न सर्वदा। कस्मात्,

१ षडत्र गृहिणो ज्ञेयास्त्रय स्युर्ब्रह्मचारिणः ।
भिक्षुकौ द्वौ तु निर्दिष्टौ ततः स्यात्सर्वतो यतिः ॥
आद्यास्तु षड् जघन्या स्युर्मध्यमास्तदनु त्रयः ।
शेषौ द्वावुत्तमावुक्तौ जैनेषु जिनशासने ॥

दुर्लेश्याभिभवात् दुर्लेश्या कृष्णनीलकापोतीनामन्यतमया अभिभवः कुतश्चिन्निमित्ताच्चेतनशक्तेस्तत्कर्मकारोद्बोधस्तस्माद्धेतोः तं वाऽऽश्रित्य। न केवलं तथा भवन्। स्खलन्नपि अतिचारं गच्छंश्च अनभ्यस्तपूर्वत्वसंयमस्य दुर्धरत्वाद्वा मनसः। क्व, गुणे। किंविशिष्टे, क्वापि मद्यविरत्यादीनामन्यतमे न सर्वत्र ॥ ४ ॥

दर्शनिकादीनामात्मस्वानुष्ठानादार्ढ्याद्भ्र्यत एव दर्शनिकादिव्यपदेशः स्याद्भावतस्तु पूर्वपूर्वोऽसावेवेति बोधयन्नाह—

तद्वद्दर्शनिकादिश्च स्थैर्यं स्वे स्वे व्रतेऽव्रजन्।
लभते पूर्वमेवार्थाद्व्यपदेशं न तूत्तरम् ॥ ५ ॥

टीका—लभते। कोऽसौ, दर्शनिकादिश्च दर्शनिकव्रतिकादिरपि श्रावकविकल्पः। कं, व्यपदेशं सञ्ज्ञां। किंविशिष्टं, पूर्वमेव प्राक्तनमेव। न तु न पुनः। उत्तरं परापेक्षया परं। कस्मात्, अर्थात् परमार्थतो व्यवहारादुत्तमपि लभते। किंवत्, तद्वत् नैष्ठिकमात्रवत्। किं कुर्वन्, अव्रजन् अगच्छन्। किं तत्, स्थैर्यं स्थिरतां कदाचित्कथंचिदचलनम्। क्व, स्वे स्वे व्रते निरतिचाराष्टमूलगुणादिलक्षणे ॥ ५ ॥

एतदेव समर्थयितुमाह—

प्रारब्धो घटमानो निष्पन्नश्चार्हतस्य देशयमः।
योग इव भवति यस्य त्रिधा स योगीव देशयमी ॥ ६ ॥

टीका- भवति। कोऽसौ, स देशयमी श्रावकः। कतिधा, त्रिधा त्रिप्रकारः। क इव, योगीव यथा प्रारब्धयोगो घटमानयोगो निष्पन्नयोगश्चेति नैगमादिनयापेक्षया त्रिविधो योगी तथा प्रारब्धदेशसंयमो घटमानदेशसंयमो निष्पन्नदेशसंयमश्चेति त्रिविधः श्रावकोऽपि स्यादित्यर्थः। यस्य किं, यस्यार्हतस्य जिनैकशरणस्य सतो भवति। कोऽसौ, देशयमो देशसंयमः। किंविशिष्टः, प्रारब्ध उपक्रान्तः, तथा घटमानः सम्पद्यमानः, तथा निष्पन्नः पर्यन्तं प्राप्तः, क इव, योग इव समाधिर्यथा ॥ ६ ॥

एवं स्थलशुद्धिं विधायाधुना दर्शनिकस्वरूपनिरूपणार्थं श्लोकद्वयमाह—

पाक्षिकाचारसंस्कार—दृढीकृतविशुद्धदृक् ।
भवाङ्गभोगनिर्विण्णः परमेष्ठिपदैकधीः ॥ ७ ॥
निर्मूलयन्मलान्मूल—गुणेष्वग्रगुणोत्सुकः ।
न्याय्यां वृत्तिं तनुस्थित्यै तन्वन्दर्शनिको मतः ॥ ८ ॥ युग्मं ।

टीका—मतः एवम्भूतनयादिष्टः सूरिभिः । एतेन नैगमनयादेशात्पाक्षिकस्यापि दर्शनिकत्वमनुज्ञातं भवति । ततो न 'श्रावकपदानि देवैरेकादश देशितानी' त्यनेन विरोधः, पाक्षिकस्य द्रव्यतो दर्शनिकत्वात् । कोऽसौ मतः दर्शनिकः । किंलक्षणः, पाक्षिकाचारस्य पूर्वाध्याये प्रपञ्चेनोक्तस्य संस्कार उत्कर्षस्तेन दृढीकृता निश्चलत्वं नीता विशुद्धा निर्दोषा दृक दर्शनं येन स पाक्षिकाचारसंस्कारदृढीकृतविशुद्धदृक्, तथा भवाङ्गभोगनिर्विण्णः भवाङ्गभोगाः संसारशरीरेष्टविषयाः, अथवा भवाङ्गं संसारकारणं यो भोगो गृद्धिपूर्वकं कामिन्यादिविषयसेवनं ततो निर्विण्णो विरक्तः प्रत्याख्यानावरणाख्यचारित्रमोहकर्मविपाकवशात् कामिन्यादिविषयान् भजन्नपि तत्राकृतसेवानिर्बन्ध इत्यर्थः, तथा परमेष्ठिपदैकधीः परमेष्ठिपदेषु अर्हदादिपञ्चगुरुचरणेषु एका धीरन्तर्दृष्टिर्यस्य स तथोक्तः । आपदाकुलितोऽपि दर्शनिकस्तन्निवृत्त्यर्थं शासनदेवतादीन् कदाचिदपि न भजते । पाक्षिकस्तु भजत्यपीत्येवमर्थमेकग्रहणम् । तथा निर्मूलयन् मूलादपि निरस्यन् । कान्, मलान् अतिचारान् । केषु, मूलगुणेषु तथा अग्रगुणोत्सुकः अग्रगुणे व्रतिकपदे उत्सुकोऽनुष्ठातुमुत्कण्ठितः । तथा तन्वन्ननुबध्नन् । कां, वृत्तिं कृष्यादिवार्तां । किंविशिष्टां, न्याय्यां

१ आदावेते स्फुटमिह गुणा निर्मला धारणीयाः
पापध्वंसि व्रतमपमलं कुर्वता श्रावकीयम् ।
कर्तुं शक्यं स्थिरमुरुभरं मन्दिरं गर्तपूरं
न स्थेयोभिर्दृढतममृतैर्निर्मितं ग्रावजालैः ॥

२ कृषिं वणिज्यां गोरक्ष्यमुपायैर्गुणिनं नृपम् ।
लोकद्वयाविरुद्धां च धनार्थी संश्रयेत् क्रियाम् ॥

स्ववर्णकुलव्रतानुरूपां । किमर्थं, तनुस्थित्यै शरीरवर्तनार्थं न विषयोपसेवनार्थं एवंविधलक्षणो दर्शनिको नाम श्रावको मन्यते ॥ ७।८ ॥

अथ मद्यादिव्रतोद्योतनार्थं तद्विक्रयादिप्रतिषेधार्थमाह—

मद्यादिविक्रयादीनि नार्यः कुर्यान्न कारयेत् ।
न चानुमन्येत मनो—वाक्कायैस्तद्व्रतद्युते ॥ ९ ॥

टीका—न कुर्यात् । कोऽसौ, आर्यो दर्शनिकः । मद्यादिविक्रयादीनि मद्यादीनां मद्यमांसमधुनवनीतप्रभृतीनां विक्रयादीनि आदिशब्दात्सन्धानकसंस्कारोपदेशाद्युपादानं । तथा न कारयेत् । न चानुमन्येत नाप्यनुमतिं दद्यात् । कैः, मनोवाक्कायैः मनसा वाचा कायेन च । किमर्थं तद्व्रतद्युते मद्यविरत्याद्यष्टमूलगुणनिर्मलीकरणार्थम् ॥ ९ ॥

यच्छीलनान्मद्यादिव्रतक्षतिः स्यात्तदुपदेशार्थमाह—

भजन्मद्यादिभाजस्स्त्री-स्तादृशैःसह संसृजन् ।
भुक्त्याऽऽदौ चति साकीर्तिं मद्यादिविरतिक्षतिम् ॥ १० ॥

टीका—एति गच्छति । कोऽसौ, व्रती पुमान् । कां, मद्यादिविरतिक्षतिम् अष्टमूलगुणहानिं । किंविशिष्टां, साकीर्तिं वाच्यतासहितां । किं कुर्वन्, भजन् सेवमानः । काः, स्त्रीः । किंविशिष्टाः, मद्यादिभाजो मद्यमांसादिसेविनीः । न केवलं ता भजन् संसृजंश्च संसर्गं कुर्वन् । कैः सह, तादृशैर्मद्यादिभाग्भिः पुम्भिः । क्व, भुक्त्यादौ भोजनभाजनासनादौ ॥ १० ॥

एवं सामान्यतो मूलव्रतातिचारनिवृत्तिमभिधाय मद्यादिव्रतातिचारनिवृत्त्यर्थमाह—

सन्धानकं त्यजेत्सर्वं दधि तक्रं द्व्यहोषितम् ।
काञ्जिकं पुष्पितमपि मद्यव्रतमलोऽन्यथा ॥ ११ ॥

टीका त्यजेत् । कोऽसौ, दर्शनिकः । किं तत् , संधानकं । किंविशिष्टं, सर्वं । एतेन काञ्जिकवटकादेरपि हेयत्वं दर्शयति । उक्तं च—

१ मद्यादिस्वादिगेहेषु पानमन्नं च नाचरेत् । तदामत्रादिसम्पर्कं न कुर्वीत कदाचन ॥

जायन्तेऽनन्तशो यत्र प्राणिनो रसकायिकाः ।
सन्धानानि न वल्भ्यन्ते तानि सर्वाणि भाक्तिकाः ॥

तथा त्यजेत् । किं तत्, दधितक्रं दधि च मथितं च । किंविशिष्टं, पुष्पितं द्व्यहोषितं अहोरात्रिद्वयमतिक्रान्तं । तथा त्यजेत् कांजिकं, धान्याम्लं, सपुष्पमिव जातं । अपिशब्दाद्द्व्यहोषितं च अन्यथा उक्तविपर्यये । भवति । कोऽसौ, मद्यव्रतमलः मद्यविरत्यतिचारः ॥ ११ ॥

मांसविरत्यतिचारानाह—

चर्मस्थमम्भः स्नेहश्च हिंग्वसंहृतचर्म च ।
सर्वं च भोज्यं व्यापन्नं दोषः स्यादामिषव्रते ॥ १२ ॥

टीका—स्यात् भवेत् । किं तत्, चर्मस्थमम्भःप्रमुखमुपयुज्यमानं । किं स्यात्, दोषोऽतिचारः । क्व, आमिषव्रते मांसविरतौ प्रतिपन्नायां । किं किं तदित्याह-अम्भो जलं, स्नेहश्च घृतादिकं दोषः स्यात् । किंविशिष्टं, चर्मस्थं दृत्यादिस्थं जलं कुतुपादिस्थं च घृतादिकमुपयुज्यमानं । एतेन खट्टिकादिस्थव-चटिकादिस्थचूतफलादीनां चर्मोपनद्धचालनीशूर्पटिकाद्युपस्कृतकणिकादीनां च त्याज्यतामुपलक्षयति । तथा हिंगु रामठं दोषः स्यात् । किंविशिष्टम्, असंहृतचर्म असंहृतं स्वस्वभावेनापरिणामितं चर्म येन तत् ' असंवृतचर्मे ' ति वा पाठः । तत्र चर्मणा छादितं चर्मणि बद्धं प्रसारितं वा रामठं न गृह्णीयादिति भावः । उपलक्षणमेतत् । तेन तथाभूतं लवणाद्यपि । तथा भोज्यं भक्तघृतादि सर्वं । किंविशिष्टं, व्यापन्नं कुथितं स्वादचलितमिति यावत् ॥ १२ ॥

मधुव्रतातिचारनिवृत्त्यर्थमाह—

प्रायः पुष्पाणि नाश्नीयान्मधुव्रतविशुद्धये ।
वस्त्यादिष्वपि मध्वादि-प्रयोगं नार्हति व्रती ॥ १३ ॥

टीका—नाश्नीयात् न भक्षयेत् मधुविरतः । कानि, पुष्पाणि । किमर्थं मधुव्रतविशुद्धये क्षौद्रविरत्यतिचारनिवृत्त्यर्थं । कथं, प्रायः तेन मधूकभल्लातक-पुष्पाणां शक्यशोधनत्वान्नात्यंतनिषेधः । शुष्कत्वान्नागकेसरादीनामपीति लक्ष-

यति । तथा नार्हति न कर्तुं योग्यो भवति । कोऽसौ, व्रती मधुमांसमद्येभ्यो-तिशयेन निवृत्तः । कं, मध्वादिप्रयोगं माक्षिकमांसमद्योपयोगं केषु, बस्त्या-दिषु बस्तिकर्मपिण्डप्रदाननेत्राञ्जनसेचनलताग्रासादिषु, किं पुनः स्वास्थ्यानु-वृत्तिवाजीकरणादिविधिष्वित्यपिशब्दार्थः ॥ १३ ॥

पञ्चोदुम्बरविरत्यतिचारपरिहारार्थमाह—

सर्वं फलमविज्ञातं वार्ताकादि त्वदारितम् ।
तद्वद्भल्लादिसिम्बीश्च खादेन्नोदुम्बरव्रती ॥ १४ ॥

टीका–न खादेन्न भक्षयेत् । कोऽसौ, उदुम्बरव्रती पिप्पलादिफलनिवृत्तः किंतत्, फलं सर्वं । किंविशिष्टम्, अविज्ञातमज्ञातनाम । तथा न खादेत् । किं तत्, वार्ताकादि । आदिशब्देन कच्चरबदरपूगफलादि । किंविशिष्टम्, अदा-रितमभिन्नं अशोधितमध्यमित्यर्थः । तथा भल्लादिसिम्बीः भल्लराजमाषप्रमुख-फलिका न खादेत् । किंवत्, तद्वत् अदारिता इत्यर्थः ॥ १४ ॥

अनस्तमितभोजनातिचारमाह—

मुहूर्तेऽन्त्ये तथाऽऽद्येऽह्नो वल्भाऽनस्तमिताशिनः ।
गदच्छिदेऽप्याम्रघृताद्युपयोगश्च दुष्यति ॥ १५ ॥

टीका–दुष्यति दोषा भवति । कोऽसौ, वल्भा भोजनं । क्व, मुहूर्ते घटिका द्वये । कस्य अह्नो दिनस्य । किंविशिष्टे, अन्त्ये पर्यन्तवर्तिनि । तथा आद्ये प्रथमे । कस्य, अनस्तमिताशिनः अनस्तमते सूर्येऽश्नातीत्येवंव्रतस्य । तथा दुष्यति । कोऽसौ, आम्रघृताद्युपयोगः चूतचारचोचमोचादिफलानां घृतक्षीरे-क्षुरसादीनां च सेवनं । कस्यै, गदच्छिदे रोगनिवृत्त्यर्थं, किं पुनः स्वास्थ्यानु-वृत्त्याद्यर्थमित्यपिशब्दार्थः ॥ १५ ॥

जलगालनव्रतातिचारनिवृत्त्यर्थमाह—

मुहूर्तयुग्मोर्ध्वमगालनं वा दुर्वाससा गालनमम्बुनो वा ।
अन्यत्र वा गालितशेषितस्य न्यासो निपानेऽस्य न तद्व्रतेऽर्च्यः ॥१६॥

टीका–अर्च्यं इति लिङ्गविपरिणामेन सम्बन्धः । न अर्च्यं निन्द्यमित्यर्थः ।

किं तत्, अगालनमस्रावणं। कस्य, अम्बुनो जलस्य। कथं, मुहूर्तयुग्मोर्ध्वं घटिकाचतुष्टयादुपरि। क, तद्व्रते गालितजलपाननिष्ठायां। वाशब्दास्त्रयोऽपि परस्परसमुच्चये। तथा नार्च्यं। किं तत्, अम्बुनो गालनं। केन, दुर्वाससा अल्पसच्छिद्रजर्जरादिवस्त्रेण। तथा नार्च्यः। कोऽसौ, न्यासः स्थापनं। कस्य, अम्बुनः। किंविशिष्टस्य, गालितशोषितस्य गलस्रावितादुद्धरितस्य क, निपाने जलाशये। किंविशिष्टे, अन्यत्र स्वाधारजलाशयादन्यस्मिन्। अथ——

" पंचुंबरसहियाइं सत्तवि वसणाइ जो विवज्जेइ।
सम्मत्तविसुद्धमई सो दसणसावओ भणिओ॥ "

इति वसुनन्दिसैद्धान्तिमते॥ १६॥

दर्शनिकस्य द्यूतादिव्यसननिवृत्तिमुपदेष्टुं तेषामिहामुत्र चापायावद्यपायत्वमुदाहरणद्वारेण व्याहरन्नाह——

द्यूताद्धर्मतुजो बकस्य पिशितान्मद्याद्यदूनां विप-
च्चारोःकामुकया शिवस्य चुरया यद्ब्रह्मदत्तस्य च।
पापर्द्ध्या परदारतो दशमुखस्योच्चैरनुश्रूयते
द्यूतादिव्यसनानि घोरदुरितान्युज्झेत्तदार्यस्त्रिधा॥ १७॥

टीका—उज्झेत् त्यजेत्। कोऽसौ, आर्यः सद्व्रतो गृही। कथं, त्रिधा मनोवाक्कायकृतकारितानुमतैः। कानि, द्यूतादीनि व्यसनानि। द्यूतमांसमद्यवेश्याचौर्यपापर्द्धिपरदारोपसेवनानि। किंविशिष्टानि, घोरदुरितानि घोराणि दुर्गतिदुःखकारणानि दुरितानि पापानि येभ्यस्तानि। कथं, तत्तस्मात्। यद्यस्मादनुश्रूयते वृद्धपरम्परया आकर्ण्यते कासौ, विपत्। कथम्भूता। उच्चैः प्रकृष्टा। कस्मात्, द्यूतात् द्यूतक्रीडनात्। कस्य, धर्मतुजो धर्मपुत्रस्य युधिष्ठिरस्य। तथोच्चैर्विपदनुश्रूयते। कस्य, बकस्य बकनाम्नो राज्ञः। कस्मात्, पिशितात्। मांसभक्षणात्। तथोच्चैर्विपदनुश्रूयते। केषां, यदूनां यदोरपत्यानां यादवानां। कस्मात्, मद्यात्। मद्यपानात्। तथा उच्चैर्विपदनुश्रूयते। कस्य, चारोः चारुदत्तनाम्नः श्रेष्ठिनः। कया, कामुकया वेश्योपसेवनया। तथा उच्चैर्विपदनुश्रूयते। कया, चुरया चौरिकया। कस्य, शिवभूतिनाम्नो द्विजस्य। तथा उच्चैर्विपदनुश्रूयते। कस्य, ब्रह्मदत्तनाम्नोऽन्त्यचक्रवर्तिनः। कया, पापर्द्ध्या आखेटकेन। तथा

उच्चैर्विपदनुश्रूयते । कस्य, दशमुखस्य रावणस्य । कुतः, परदारतः परस्त्रीगमनाभिलाषनिर्बन्धेन ॥ १७ ॥

व्यसनशब्दनिरुक्तिद्वारेण द्यूतादेर्घोरदुरितश्रेयःप्रत्यावर्तनहेतुत्वं समर्थ्य तद्विरतस्य तत्समानफलत्वाद्धातुवादाद्युपव्यसनानामपि दूरपरिहरणीयतामुपदिशति

जाग्रत्तीव्रकषायकर्कशमनस्कारार्पितैर्दुष्कृतै–
श्चैतन्यं तिरयत्तमस्तरदपि द्यूतादि यच्छ्रेयसः ।
पुंसो व्यस्यति तद्विदो व्यसनमित्याख्यान्त्यतस्तद्व्रतः
कुर्वीतापि रसादिसिद्धिपरतां तत्सोदरीं दूरगाम् ॥ १८ ॥

टीका–आख्यान्ति व्यपदिशन्ति । के ते, विदो विद्वांसः किं तत् द्यूतादिसप्तकं । किमाख्यान्ति, व्यसनं व्यसनमितिशब्देन व्यवहरन्तीत्यर्थः । कथं, तत् तस्मात् । यद्यस्मात्, व्यस्यति प्रत्यावर्तयति । किं तत्, द्यूतादि । कान्, पुंसः पुरुषान् । कस्मात्, श्रेयसः अकल्याणं प्रापयतीत्यर्थः । किं कुर्वत्, तिरयत् छादयत् । किं तत्, चैतन्यमन्तस्तत्त्वं । कैः, दुष्कृतैः पापैः । किंविशिष्टैः, जाग्रदित्यादि, जाग्रद्भिर्नित्योदितैस्तीव्रैर्दुर्निवारैः कषायैः क्रोधादिभिः कर्कशदृढकर्मबन्धसम्पादनोद्यतो मनस्कारश्चित्तप्रणिधानं तेनार्पितैरात्मना संयोजितैः। किं कुर्वदपि, तरदपि अतिक्रामत् । किं तत्, तमो मिथ्यात्वं । किं पुनर्मिथ्यात्वे विवर्तमानमित्यपिशब्दार्थः । यत एव तत एतस्मात् कारणात् कुर्वीत विदधीत । कोऽसौ, तद्व्रतः द्यूतादिविरतिं प्रतिपन्नः । कां रसादिसिद्धिपरतामपि, न परं द्यूतादिपरतामित्यपिशब्दार्थः । किंविशिष्टां, दूरगां दूरवर्तिनीं । किंविशिष्टां, यतस्तत्सोदरीं द्यूतादिव्यसनसदृशीं, दुरन्तदुष्कृतबन्धश्रेयःप्रत्यावर्तनहेतुत्वाविशेषात् । रसादीत्यादिशब्देनाञ्जनगुटिकापादुकाविवरप्रवेशादि गृह्यते ॥ १८ ॥

द्यूतनिवृत्त्यतिचारमाह–

दोषो होढाद्यपि मनो–विनोदार्थं पणोज्झिनः ।
हर्षामर्षोदयाङ्गत्वात् कषायो ह्यंहसेऽञ्जसा ॥ १९ ॥

टीका–भवति । किं तत्, होढादि । होढा परस्परस्पर्धया धावनादि

आदिशब्देन द्यूनदर्शनादि । किं भवति, दोषोऽतिचारः । कस्य, पणोज्झिनः पणं द्यूतमुज्झतीत्येवंव्रतस्य । किमर्थं, मनोविनोदार्थमपि मनोऽपि रमयितुं प्रयुज्यमानं दोषः, किं पुनर्धनाद्यर्थं । कुतो, हर्षामर्षोदयाङ्गत्वात् प्रमोदक्रोधोद्भवहेतुत्वात् । एतदपि समर्थयितुमाह—ह यस्माद्भवति । कोऽसौ, कषायो रागद्वेषपरिणामः । कस्मै अंहसे पापनिमित्तं । केन अञ्जसा परमार्थेन ॥१९॥

वेश्याव्यसनव्रतातिचारनिवृत्त्यर्थमाह—

त्यजेत्तौर्यत्रिकासक्तिं वृथाट्यां षिड्गसङ्गतिम् ।
नित्यं पण्याङ्गनात्यागी तद्गेहगमनादि च ॥ २० ॥

टीका—त्यजेत् । कोऽसौ, पण्याङ्गनात्यागी वेश्यानिवृत्तिव्रतः । किं किं तौर्यत्रिकासक्तिं गीतनृत्यवाद्येषु सेवानिबन्धं । आसक्तिग्रहणाच्चैत्यालयादौ धर्मार्थं गीतश्रवणं न दोष इति लक्षयति । तथा वृथाट्यां प्रयोजनं विना विचरणां त्यजेत् । तथा षिड्गसङ्गतिं विटैः सह साङ्गत्यं त्यजेत् । षिड्ग इति षिट् 'सिट्' अनादरे सिटनं सिट् अनादरः । सिटा अनादरेण गायति गच्छति वा । "अन्यतोऽपि चेति" डः पृषोदरादित्वात्सस्य च षत्वं । तथा तद्गेहगमनादि वेश्यागृहगमनसम्भाषणसत्कारादि त्यजेत् नित्यमित्यनेन सर्वदा । व्रते यत्नं कुर्यात् दुर्निवारत्वादित्युपदिशति ॥ २० ॥

चौर्यव्यसनमलोपदेशार्थमाह—

दायादाज्जीवतो राज—वर्चसाद्गृह्णतो धनम् ।
दायं वाऽपह्नुवानस्य क्वाचौर्यव्यसनं शुचि ॥ २१ ॥

टीका—क्व, कस्मिन्देशे काले च । अचौर्यव्यसनं चौरिकापरिहारव्रतं । शुचि निरतिचारं भवति न क्वापीत्यर्थः । कस्य, पुसः किं कुर्वतो, गृह्णतः । स्वीकुर्वतः । किं तत्, धनं ग्रामसुवर्णादिद्रव्यं । कस्मात्, दायादात् दायं कुलसाधारणं द्रव्यमादत्ते इति दायादो भ्रात्रादिस्तस्मात् । किं कुर्वतो जीवत । मृतस्य तु यथान्यायं स्वीकुर्वतो नास्ति दोषः । कस्माद्गृह्णतो, राजवर्चसात् नृपतेजसः न जातिकुलदेशकालाद्यनुरोधात् । तथा अपह्नुवानस्य भ्रात्रादिभ्यः अपलपतः । कं, दायम् ॥ २१ ॥

वस्त्रनाणकपुस्तादि-न्यस्तजीवच्छिदादिकम् ।
न कुर्यात्त्यक्तपापर्द्धि-स्तद्धि लोकेऽपि गर्हितम् ॥ २२ ॥

टीका—न कुर्यात्। कोऽसौ, त्यक्तपापर्द्धिः। किं तत्, वस्त्रेत्यादि, वस्त्राणि पट्टकूलपटादीनि, नाणकानि सीतारामटङ्कादीनि, पुस्तादीनि च लेप्यचित्र-काष्ठाश्मदन्तधात्वादिशिल्पानि, वस्त्राणि च नाणकानि च पुस्तादीनि च वस्त्रनाणकपुस्तादीनि तेषु न्यस्तो नामोच्चारणपूर्वकः सोऽयमिति स्थापितो जीवः प्राणी गजतुरगादिस्तस्य छिदादिकं खण्डनावर्तनभञ्जनादि । हि यस्मात् भवति । किं तत्, वस्त्रादिन्यस्तजीवच्छिदादिकं । किंविशिष्टं, गर्हितं निन्दितं । क्व, लोकेऽपि व्यवहर्तृजनमध्येऽपि, न परं शास्त्रे ॥२२॥

परदारव्यसनदोषनिषेधार्थमाह—

कन्यादूषणगान्धर्व-विवाहादि विवर्जयेत् ।
परस्त्रीव्यसनत्यागव्रतशुद्धिविधित्सया ॥ २३ ॥

टीका—विवर्जयेत् । कोऽसौ, परदारवर्जी । किं तत्, कन्येत्यादि । कन्यादूषणं कुमार्या अभिगमनं स्वविवाहनार्थं दोषोद्भावनं वा, गान्धर्व-विवाहो यो मातुः पितुर्बन्धूनां चाप्रामाण्यात्परस्परानुरागेण मिथः समवाया-द्वधूवराभ्यां क्रियते, आदिशब्देन हरविवाहो हरणादि । कया, परस्य स्त्री परस्त्री तत्र तदेव वा व्यसनं तस्य त्यागः स एव व्रतं तस्य शुद्धिर्निर्दोषता तत्र विधित्सा कर्तुमिच्छा तया ॥ २३ ॥

मद्यमांसव्यसननिवृत्त्योस्त्वतीचाराः प्रागेवोक्ताः । इदानीं यतो लोकद्वय-विरुद्धबुद्ध्या आत्मना विरतिः क्रियते परस्मिन्नपि तत्प्रयोगं तद्व्रतविशुद्ध्यर्थं न विदध्यादित्यनुशास्ति—

व्रत्यते यदिहामुत्रा-प्यपायावद्यकृत्स्वयम् ।
तत्परेऽपि प्रयोक्तव्यं नैव तद् व्रतशुद्धये ॥ २४ ॥

---

१ पंचुंबरसहियाइ सत्तइ वसणाइ जो विवज्जेइ ।
सम्मत्तविसुद्धमइ सो दंसणसावयो भणियो ॥

टीका- व्रत्यते संकल्पपूर्वं प्रत्याख्यायते । किं तत्, यत् वस्तु । किंविशिष्टं, अपायावद्यकृत् अपायोऽभ्युदयनिःश्रेयसभ्रंशनोपायः, अवद्यं गर्ह्यं, अपायश्चावद्यं चापायावद्ये ते करोति तत् । क, इहास्मिञ्जन्मनि । तथाऽमुत्र परजन्मनि केन । व्रत्यते, स्वयं आत्मना । किं तत्, व्रतविषयीकृतं वस्तु । नैव प्रयोक्तव्यं प्रयोज्यं । क, परेऽपि आत्मनीव पुरुषान्तरेऽपि । कस्यै, व्रतशुद्धये प्रकृतव्रतनिर्मलीकरणार्थम् ॥ २४ ॥

एवं प्रतिपन्नदर्शनप्रतिमस्य श्रावकस्य स्वप्रतिज्ञानिर्वाहार्थमुत्तरेण प्रबन्धेन शिक्षां प्रयच्छन्नाह—

अनारम्भवधं मुञ्चेच्चरेन्नारम्भमुद्धुरम् ।
स्वाचाराप्रतिलोम्येन लोकाचारं प्रमाणयेत् ॥ २५ ॥

टीका—मुञ्चेत् त्यजेत् । दर्शनिकः । कम्, अनारम्भवधं तपःसंयमादि-साधनतनुस्थित्यर्थायाः कृष्यादिक्रियाया अन्यत्र प्राणिहिंसां । एतेन यदुक्तं स्वामिसमन्तभद्रदेवैः—'दर्शनिकस्तत्त्वपथगृह्य' इति दर्शनप्रतिमालक्षणं तदपि संगृहीतं तथाविधहिंसाविरतिविध्युपदेशेन पञ्चाणुव्रतानुसरणविधानोपदेशात् । तथा न चरेत् न कुर्यात् । कम्, आरम्भं कृष्यादिकं । किंविशिष्टम्, उद्धुरम् आत्मनिर्वाह्यभरं । परेण हि कृष्यादिक्रियां कारयतो द्वन्द्वलाघवान्न तादृशी प्रतिज्ञातधर्मकर्मानुष्ठाने गृहिणो विहस्तता भवति यादृशी तामात्मना कुर्वतः सा स्यात् द्वन्द्वावर्तविवर्तनात् । तथा प्रमाणयेत् प्रमाणं कुर्यात् न विसंवाद-येदित्यर्थः । कं, लोकाचारं स्वामिसेवाक्रयविक्रयादिकं । केन, स्वाचाराप्रति-लोम्येन आत्मप्रतिपन्नव्रतानुष्ठानानुपघातेन ॥ २५ ॥

धर्मे पत्न्याः सुतरां व्युत्पादनविधिमुपदिशति—

व्युत्पादयेत्तरां धर्मे पत्नीं प्रेम परं नयन् ।
सा हि मुग्धा विरुद्धा वा धर्माद् भ्रंशयते तराम् ॥ २६ ॥

टीका—व्युत्पादयेत् तरां । अर्थादिव्युत्पाद्यात् धर्मेऽतिशयेन व्युत्पन्नां कुर्यात् अथवा धर्मविषये सर्वमपि परिवारं च पत्नीं च व्युत्पादयन् पत्नीं ततोऽतिश-येन तत्र व्युत्पादयेदिति व्याख्येयं । कोऽसौ, दर्शनिकः । कां, पत्नीं भार्यां ।

क, धर्मे । किं कुर्वन्, नयन् प्रापयन् । कां, पत्नीं । किं तत्, प्रेम स्वस्मिन् धर्मे च स्नेहं । किंविशिष्टं, परमुत्कृष्टं । हि यस्मात् भ्रंशयते तरां परिवारा- (दा) दतिशयेन प्रच्यावयति । काऽसौ, सा पत्नी । कं, पुरुषं । कस्मात्, धर्मात् । किंविशिष्टा सती, मुग्धा धर्मे मूढा धर्ममजानतीत्यर्थः । तथा विरुद्धा पुंसि धर्मे वा द्वेषिणीत्यर्थः । इदमत्र तात्पर्यं धर्ममजानानो विरक्तश्च परिजनो नरं धर्मात्प्रच्यावयति। ततोऽप्यतिशयेन तादृग्विधा गृहिणी तदधीनत्वाद्गृहिणो धर्मकार्याणाम ॥ २६ ॥

प्रेम परं नयन्नित्यस्य समर्थनार्थमाह—

स्त्रीणां पत्युरुपेक्षैव परं वैरस्य कारणम् ।
तन्नोपेक्षेत जातु स्त्रीं वाञ्छल्लोकद्वये हितम् ॥ २७ ॥

टीका—भवति। किं तत्, वैरस्य कारणं वैरस्य विरागताया हेतुः । अथवा वैरस्य विरोधस्य कारणं। किंविशिष्टं, परमुत्कृष्टं, । कासां, स्त्रीणां । किं तत्, उपेक्षैव अनादर एव, न तु वैरूप्यनिर्धनत्वादि । कस्य,पत्युर्भर्तुः। यत एवं तत्तस्मात् नोपेक्षेत, नोपेक्षणीयत्वेन पश्येत्। कोऽसौ, पुमान्। कां, स्त्रीं स्त्रियं कदा, जातु कदाचिदपि धर्माद्यनुष्ठानकाले । किं कुर्वन्, वांछन् अभिलषन्। किं तत् हितं सुखं सुखकारणं च। क, लोकद्वयेऽपि इहलोके परलोके च ॥२७॥

कुलस्त्रियाऽपि धर्मादिकमिच्छन्त्या भर्तृच्छन्दानुवृत्तिरेव कर्तव्येति प्रासङ्गिकीं स्त्रियाः शिक्षां प्रयच्छन्नाह—

नित्यं भर्तृमनीभूय वर्तितव्यं कुलस्त्रिया ।
धर्मश्रीशर्मकीर्त्येककेतनं हि पतिव्रताः ॥ २८ ॥

टीका—वर्तितव्यं मनोवाक्कायकर्मभिराचरितव्यं। कया, कुलस्त्रिया कुलीननार्या । किं कृत्वा, भर्तृमनीभूय अभर्तृमना भर्तृमना भूत्वा पतिचित्तानुवर्तनेनैव चिन्त्यं वाच्यं चेष्टितव्यं च। कथं, नित्यं सर्वदा। हि यस्मात्। भवन्ति। काः, पतिव्रताः पतिसेवैव व्रतं प्रतिज्ञा शुभकर्मप्रवृत्तिर्वा यासां ता इत्यर्थः । किं भवति, धर्मेत्यादि—धर्मस्य पुण्यस्य, श्रियो विभूतेर्भारत्याश्च, शर्मण

आनन्दस्य, कीर्तेर्यशसः एकमुत्कृष्टमव्यभिचारि केतनं गृहं ध्वजो वा यास्ताः धर्मश्रीशर्मकीर्त्येककेतनं । नित्यं धर्मादिमत्यो धर्मादिविख्याता वा इत्यर्थः ।२८।

धर्माद्यर्थिनः कुलस्त्रियामप्यत्यासक्तिं निषेधयन्नाह—

भजेद्देहमनस्तापशमान्तं स्त्रियमन्नवत् ।
क्षीयन्ते खलु धर्मार्थकायास्तदतिसेवया ॥ २९ ॥

टीका—भजेत् सेवेत । कोऽसौ, त्रैवर्णिकः विशेषणाद्दर्शनिकः श्रावकः । कां, स्त्रियं । कथं, यथा भवति देहमनस्तापशमान्तं शरीरमनसोः सन्तापशमो यथा भवति न पुनरत्यासक्त्या । किंवत्, अन्नवत् भोजनं यथा । खलु यस्मात् । क्षीयन्ते क्षयं यान्ति । के, धर्मार्थकामाः धर्मो, धनं, शरीरं च त्रीण्यपि । कया, तदतिसेवया अन्नस्येव स्त्रिया अप्यतिमात्रोपयोगेन ॥३०

पुत्रस्योत्पादनादिप्रयत्नविधिमाह—

प्रयतेत सधर्मिण्यामुत्पादयितुमात्मजम् ॥
व्युत्पादयितुमाचारे स्ववत्त्रातुमथापथात् ॥ ३० ॥

टीका—प्रयतेत परमादरं कुर्यात् । कोऽसौ, दर्शनिकः । किं कर्तुम्, उत्पादयितुं जनयितुं । कम्, आत्मजमौरसं पुत्रं । क्षेत्रजाद्येकादशपुत्राणामनभ्युपगमात् ।

---

१ पुत्रोत्पादनविधिस्त्वयमष्टाङ्गहृदयोक्तः —
पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता । शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि । वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः । रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा शुक्रं शुक्लं गुरु स्निग्धं मधुरं बहुलं बहु । घृतमाक्षिकतैलाभं सद्गर्भायार्तवं पुनः ॥ लाक्षारसशशास्राभं धौतं यच्च विरज्यते । शुद्धशुक्रार्त्तवं स्वस्थं संरक्तं मिथुनं मिथः । स्नेहैः पुंसवनैः स्निग्धं शुद्धं शीलितवस्तिकम् । नरं विशेषात्क्षीराद्यैर्मधुरौषधसंस्कृतैः नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत् । क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम् ॥ स्रस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम् । पद्मं सङ्कोचमायाति दिनेऽतीते यथा तथा ॥

कस्यां, सधर्मिण्यां समानो धर्मो अस्यामस्तीति नित्ययोगे 'इन्' कुलस्त्रिया-मित्यर्थः। आत्मनो जात आत्मज इत्यन्वर्थतासिद्ध्यर्थं कुलस्त्रीरक्षायां नित्यं यतितव्यमिति प्रतिपत्तव्यं। तथा प्रयतेत। कोऽसौ, सः। किं कर्तुं, व्युत्पादयितुं विविधमुत्कृष्टं ज्ञानं प्रापयितुं। कम्, आत्मजं। क्व, आचारे कुललोकसंव्यवहारे। किंवत्, स्ववत् आत्मना तुल्यं। तथा प्रयतेतासौ। किं कर्तुं, त्रातुं रक्षितुं निवर्तयितुमित्यर्थः। कम्, आत्मजं। कस्मात्, अपथात् धर्मादिभ्रंशनोपायात् दुराचारादित्यर्थः। स्ववदित्यत्रापि योज्यं। अथशब्दः समुच्चये ॥ ३० ॥

सत्पुत्ररहितेन श्रावकेणोत्तरपदं प्रति प्रोत्साहो दुष्करः स्यादिति दृष्टान्तेनोपष्टम्भयन्नाचष्टे——

विना सुपुत्रं कुत्र स्वं न्यस्य भारं निराकुलः ।
गृही सुशिष्यं गणिवत् प्रोत्सहेत परे पदे ॥ ३१ ॥

टीका——कुत्र, कस्मिन् पुंसि स्वमात्मीयं भारं पोष्यादिनिर्वाहभरं न्यस्य स्थापयित्वा निराकुलो निर्द्वन्द्वः सन् प्रोत्सहेत प्रकृष्टमुद्योगं कुर्यात्

ऋतावतीते योनिः स्याच्छुक्रं नातः प्रतीच्छति ।
मासेनोपचितं रक्तं दमनिभ्यामृतौ पुनः ॥
ईषत्कृष्णं विगन्धं च वायुर्योनिमुखान्नुदेत् ।
ततः पक्षेक्षणादेव कल्याणध्यायिनी त्र्यहम् ॥
स्रजालङ्काररहिता दर्भसंस्तरशायिनी ।
क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्शनम् ॥
पर्णे शरावे हस्ते वा भुंजीत ब्रह्मचारिणी ।
चतुर्थेऽन्हि ततः स्नाता शुक्लमाल्याम्बरा शुचिः ॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत्पुरः पतिम् ।
ऋतुस्तु द्वादश निशाः पूर्वास्तिस्रोऽथ निन्दिताः ॥
एकादशी च युग्मासु स्यात्पुत्रोऽन्यासु कन्यका ।

न क्वापीत्यर्थः । कोसौ, गृही प्रकृतत्वाद्दर्शनिकः । क्व, पदे संयमस्थाने । किंविशिष्टे, परे व्रतिकप्रतिमायां वानप्रस्थाद्याश्रमे वा । कथं, विना अन्तरेण । कं सुपुत्रं आत्मसमानमात्मजं । किंवत्, गणिवत् धर्माचार्यो यथा । कं सुशिष्यमात्मसमानमेवाचार्याद्विना । कुत्र, श्रमणे । स्वं भारं संघनिर्बाहलक्षणं । न्यस्य निराकुलो निर्व्यपेक्षः सन् पदे आत्मसंस्कारादौ मोक्षपदे वा प्रोत्सहेत, न क्वापीत्यर्थः । इदमत्रैदम्पर्य— दर्शनिकेन धर्माचार्येण च परं पदमाश्रयितुमिच्छता सत्पुत्रः सच्छिष्यश्चात्मवन्निष्पादनीयः ॥ ३१ ॥

प्रकृतमर्थमुपसंहरन् व्रतिकप्रतिमारोहणयोग्यतां सूत्रयन्नाह—

दर्शनप्रतिमामित्थमारुह्य विषयेष्वरम् ।
विरज्यन् सत्त्वसज्जः सन्व्रती भवितुमर्हति ॥ ३२ ॥

टीका—अर्हति योग्यो भवति । कोऽसौ, श्रावकः । किं कर्तुं, भवितुं सम्पत्तुं किंविशिष्टो, व्रती व्रतिकप्रतिमावान् । किंविशिष्टः सन्, सत्त्वसज्जः धैर्यादिसात्विकभावनिष्ठः । किं कुर्वन्, विरज्यन् स्वयमेव विरक्तिं गच्छन् । केषु, विषयेषु कामिन्यादिषु । कथं, अरं पाक्षिकापेक्षया स्वस्य च प्राक्तनावस्थापेक्षयातिशयेन । किं कृत्वा, आरुह्य पर्यन्तं प्राप्य । कां, दर्शनप्रतिमां । कथम्, इत्थमनेन पाक्षिकाचारसंस्कारेत्यादिपूर्वोक्तप्रकारेणेति भद्रम् ॥ ३२ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितो द्वादशः प्रक्रमाच्च
तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

अथ व्रतिकप्रतिमामध्यायत्रयेण प्रपञ्चयिष्यन् प्रथमं तावत्तल्लक्षणं संगृह्णन्नाह—

सम्पूर्णदृग्मूलगुणो निःशल्यः साम्यकाम्यया ।
धारयन्नुत्तरगुणानक्षूणान्व्रतिको भवेत् ॥ १ ॥

टीका—भवेत् । कोऽसौ, व्रतिकः । किं कुर्वन्, धारयन् अकृच्छ्रेण दधन् । कान्, उत्तरगुणान् वक्ष्यमाणान् । किंविशिष्टान्, अक्षूणान् निरतिचारान् । कया, साम्यकाम्यया इष्टानिष्टयो रागद्वेषोपरमवाञ्छया न पुनर्लाभादीच्छया । किंविशिष्टः सन्, सम्पूर्णदृग्मूलगुणः सम्पूर्णा उपयोगमात्राश्रयेणान्तरङ्गेण चेष्टामात्राश्रयेण च बहिरङ्गेणातिचारेण रहितत्वादखण्डा दृक् सम्यक्त्वं, मूलगुणाश्च यस्य स तथोक्तः । पुनः किंविशिष्टः, निःशल्यः शृणाति हिनस्तीति शल्यं शरीरानुप्रवेशिकाण्डादि, शल्यमिव शल्यं कर्मोदयविकारः शारीरमानसबाधाहेतुत्वात् । तत् त्रिविधं मिथ्यात्वमायानिदानभेदात् । मिथ्यात्वं विपरीताभिनिवेशः, माया वञ्चना, निदानं तपःसंयमाद्यनुभावन कांक्षाविशेषः, शल्यान्निष्क्रान्तो निःशल्यः ॥ ननु च सम्पूर्णदृग्मूलगुण इत्यनेनैव शल्यपरिहारस्य सिद्धत्वाद् व्यर्थमिदमिति चेत्सत्यं, किंत्वचिरप्रतिपन्नव्रतस्य पूर्वविभ्रमसंस्कारारोप्यमाणतत्परिणामानुसरणनिवारणार्थं भूयो यत्नः क्रियते । उपदेशे च पौनरुक्त्यं न दोषः ॥ १ ॥

---

१ तपःसंयमाद्यनुभावनकांक्षाविशेषो निदानम् । तद् द्वेधा प्रशस्तेतरभेदात्, प्रशस्तं पुनर्द्विविधं विमुक्तिसंसारनिमित्तभेदात् तत्र विमुक्तिनिमित्तं कर्मक्षयाद्याकाङ्क्षा । उक्तं च—

कर्मव्यपायं भवदुःखहानिं बोधिं समाधिं जिनबोधसिद्धिम् ।
आकांक्षितं क्षीणकषायवृत्तेर्विमुक्तिहेतुः कथितं निदानम् ॥
जिनधर्मसिद्ध्यर्थं तु जात्याद्याकाङ्क्षणं संसारनिमित्तम् ।
जातिं कुलं बन्धुविवर्जितत्वं दरिद्रतां वा जिनधर्मसिद्ध्यै ।
प्रयाचमानस्य विशुद्धवृत्तेः संसारहेतुर्गदितं निदानम् ॥
मोक्षेऽपि मोहादभिलाषदोषो विशेषतो मोक्षनिषेधकारी ।
यतस्ततोऽध्यात्मरतो मुमुक्षुर्भवेत्किमन्यत्र कृताभिलाषः ॥

शल्यत्रयोद्धरणे हेतुमाह—

सागारो वाऽनगारो वा यन्निःशल्यो व्रतीष्यते ।
तच्छल्यवत्कुदृङ्मायानिदानान्युद्धरेद्धृदः ॥ २ ॥

टीका—यद्यस्मात्कारणात् । इष्यते । कोऽसौ,व्रती । किंविशिष्टो,निःशल्यः । किंविशिष्टः सन्, सागारो वा अनगारो वा । अत्रेयं भावना—शल्यापगमे सत्येव व्रतसम्बन्धाद् व्रती मन्यते, न हिंसाद्युपरतिमात्रव्रतसंबन्धात् । यथा बहुक्षीरघृतो गोमानिति व्यपदिश्यते बहुक्षीरघृताभावात् सतीष्वपि गोषु न गोमान्, तथा सशल्यत्वात् सत्स्वपि व्रतेषु न व्रती । यस्तु निःशल्यः स व्रतीति । तत्तस्मात् । उद्धरेत् निष्कासयेत् । कोऽसौ,व्रतार्थी । कानि,कुदृङ्मायानिदानानि । कस्मात् , हृदो हृदयात् । किंवत् ,शल्यवत् शल्यानि यथा ॥ २ ॥

शल्यसहचारीणि व्रतानि धिक्कुर्वन्नाह—

आभान्त्यसत्यदृङ्मायानिदानैः साहचर्यतः ।
यान्यव्रतानि व्रतवद् दुःखोदर्काणि तानि धिक् ॥ ३ ॥

टीका—धिग् निन्द्यानि । कानि,तानि अव्रतानि व्रताभासानि । किंविशिष्टानि,दुःखोदर्काणि यतः दुःखमुदर्कमुत्तरफलं येषां तानि । यानि किं,यानि आभान्ति आभासन्ते । कानि,अव्रतानि । किंवत्, व्रतवद् व्रतानि यथा । कस्मात् , साहचर्यतः सहचारित्वात् । कैः,असत्यदृशा मिथ्यात्वेन मायया निदानेन च ॥ ३ ॥

उत्तरगुणनिर्णयार्थमाह—

पञ्चधाऽणुव्रतं त्रेधा गुणव्रतमगारिणाम् ।
शिक्षाव्रतं चतुर्धेति गुणाः स्युर्द्वादशोत्तरे ॥ ४

टीका—स्युः भवेयुः । के, गुणाः संयमविकल्पाः । केषाम्, अगारिणां गृहिणां । किंविशिष्टाः, उत्तरे मूलगुणानन्तरसेव्यत्वादुत्कृष्टत्वाच्च । कति, द्वादश । कथं, इति अनेन प्रकारेण । भवति । किं तत्, अणुव्रतं अणुव्रतापेक्षया लघुव्रतमहिंसादि । कतिधा, पञ्चधा अस्य पञ्चधात्वं बहुमतत्वादिष्यते

क्वचित्तु रात्र्यभोजनमप्यणुव्रतमुच्यते । तथा भवति । किं तत्, गुणव्रतं । कतिधा, त्रेधा । गुणार्थमणुव्रतानामुपकारार्थं व्रतं गुणव्रतं दिग्विरत्यादीनामणुव्रतानुबृंहणार्थत्वात् । तथा भवति । किं तत्, शिक्षाव्रतं । कतिधा, चतुर्धा शिक्षायै अभ्यासाय व्रतं देशावकाशिकादीनां प्रतिदिवसाभ्यसनीयत्वात् । अत एव गुणव्रतादस्य भेदः । गुणव्रतं हि प्रायो यावज्जीविकमाहुः । अथवा शिक्षा विद्योपादानं शिक्षाप्रधानं व्रतं शिक्षाव्रतं देशावकाशिकादेर्विशिष्टश्रुतज्ञानभावनापरिणतत्वेनैव निर्वाह्यत्वात् ॥

सामान्येन पञ्चाणुव्रतानि लक्षयन्नाह—

विरतिः स्थूलवधादेर्मनोवचोऽङ्गकृतकारितानुमतैः ।
क्वचिदपरेऽप्यननुमतैः पञ्चाहिंसाद्यणुव्रतानि स्युः ॥ ५ ॥

टीका—स्युः भवेयुः । कानि, अहिंसाद्यणुव्रतानि । कति, पञ्च । विरतिः निवृत्तिः । कस्मात्, स्थूलवधादेः । कैः, मन इत्यादि—कृतादयो भावे क्तसाधनाः । मनश्च वचश्च अङ्गं च मनोवचोऽङ्गानि, तेषां प्रत्येकं कृतं च कारितं चानुमतं च मनोवचोऽङ्गकृतकारितानुमतानि तैः । केषां पञ्चाणुव्रतानि स्युः, क्वचिद् गृहवासनिवृत्ते श्रावके तथा अपरे गृहवासनिरते श्रावके । अननुमतैरनुमतिवर्जितैस्तैः षड्भिस्तानि स्युरिति संक्षेपः । इतो विस्तरः—स्थूलजीवादिविषयत्वान्मिथ्यादृष्टीनामपि हिंसादित्वेन प्रसिद्धत्वाद्वा स्थूलो वधादिः स्थूला हिंसानृतस्तेयाब्रह्मपरिग्रहा इत्यर्थः । ततो मनसा वाचा कायेन च पृथक्करणकारणानुमननैर्निवृत्तिरहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाख्यानि पञ्चाणुव्रतानि क्वचिद्गृहवासनिवृत्ते श्रावके भवेयुरित्युत्कर्षवृत्त्याऽणुव्रतान्युपदिश्यन्ते । यान्यपरे गृहवासनिरते श्रावकेऽननुमतैरनुमतिविवर्जितैर्मनस्करणादिभिः षड्भिः स्थूलहिंसादिनिवृत्त्या सम्पद्यन्ते तानि मध्यमवृत्त्या व्रतान्यभिमन्यन्ते । तस्यापत्यादिभिर्हिंसादिकरणे तत्कारणे वा अनुमतेरशक्यप्रतिषेधत्वात् । स

उक्तं च चारित्रसारे—

१ वधादसत्याच्चौर्याच्च कामाद् ग्रन्थान्निवर्तनम् ।
पञ्चधाऽणुव्रतं राज्यभुक्तिः षष्ठमणुव्रतम् ॥

एष द्विविधत्रिविधाख्यः स्थूलहिंसादिविरतिभङ्गो बहुविषयत्वात् श्रेयान् । अपिशब्दः प्रकारान्तरेणापि स्थूलहिंसादिनिवृत्तेरणुत्वख्यापनार्थः । शक्त्या हि व्रतं प्रतिपन्नं सुखनिर्वाहं श्रेयोऽर्थं च स्यात् । तद्विरतिभङ्गाः करणादित्रिकेण योगत्रिकेण च विशिष्यमाणा एकोनपञ्चाशद्भवन्ति। यथा हिंसां न करोति मनसा १, वाचा २, कायेन च ३, मनसा वाचा ४, मनसा कायेन ५, वाचा कायेन ६, मनसा वाचा कायेन च ७, एते करणेन सप्त भङ्गाः एवं कारणेन सप्त । अनुमत्यापि सप्त । तथा हिंसां न करोति न कारयति च मनसा १, वाचा २, कायेन ३, मनसा वाचा ४, मनसा कायेन ५, वाचा कायेन ६, मनसा वाचा कायेन च ७, एते करणकारणाभ्यां सप्त । एवं करणानुमतिभ्यां सप्त । कारणानुमतिभ्यामपि सप्त । करणकारणानुमतिभिरपि सप्त । एवं सर्वे मिलिता एकोनपञ्चाशद्भवन्ति । एते च त्रिकालविषयत्वात्प्रत्याख्यानस्य कालत्रयेण गुणिताः सप्तचत्वारिंशदधिकं शतं भवन्ति १४७ । त्रिकालविषयता चातीतस्य निन्दया साम्प्रतिकस्य संवरणेनानागतस्य च प्रत्याख्यानेनेति । एते च भङ्गा अहिंसाव्रतवद् व्रतान्तरेष्वपि द्रष्टव्याः । अत्रेयं भावना दिक् । तत्र तावद्बाहुल्येनोपदेशाद् द्विविधत्रिविधभङ्गमाश्रित्योच्यते । स्थूलहिंसां न करोत्यात्मना न कारयत्यन्येन मनसा वाचा कायेन चेति । तथा स्थूलहिंसां न करोति न कारयति मनसा वाचा । यद्वा मनसा कायेन अथवा वचसा कायेन चेति । तत्र यदा मनसा वाचा न करोति न कारयति तदा मनसाऽभिसन्धिरहित एव वाचाऽपि हिंसकमब्रुवन्नेव कायेनैव दुश्चेष्टितादि असंज्ञिवत्करोति । यदा तु मनसा कायेन न करोति न कारयति तदा मनसाऽभिसन्धिरहित एव कायेन दुश्चेष्टितादि परिहरन्नेवानाभोगाद्वाचैव हन्मि घातयामि वेति ब्रूते । यदा तु वाचा कायेन च न करोति न कारयति तदा मनसैवाभिसन्धीकृत्य करोति कारयति च । अनुमतिस्तु त्रिभिरपि सर्वत्रैवास्ति । एवं शेषविकल्पा अपि भावनीयाः । स्थूलग्रहणमुपलक्षणं । तेन निरपराधसंकल्पपूर्वकहिंसा-

१ पंगुकुष्टिकुणित्वादि दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां हिंसां संकल्पतस्त्यजेत् ॥

दीनामपि ग्रहणम् । एतेन—"दण्डो हि केवलो लोकमिमं चामुं च रक्षति । राज्ञा शत्रौ च पुत्रे च यथादोषं समं धृत" इति वचनादपराधकारिषु यथाविधदण्ड-प्रणेतृणामपि चक्रवर्त्यादीनामणुव्रतादिधारणं पुराणादिषु च बहुशः श्रूयमाणं न विरुध्यते । आत्मीयपदवीशक्त्यनुसारेण तैः स्थूलहिंसादिविरतेः प्रतिज्ञा-नात् ॥ ५ ॥

स्थूलविशेषणं व्याचष्टे—

स्थूलहिंस्याद्याश्रयत्वात् स्थूलानामपि दुर्दृशाम् ।
तत्त्वेन वा प्रसिद्धत्वद्वधादि स्थूलमिष्यते ॥ ६ ॥

टीका—इष्यते अभिमन्यते आचार्यैः । किं तत्, वधादि हिंसादिपापकर्मप-ञ्चकं । किंविशिष्टमिष्यते, स्थूलं । कस्मात्, स्थूलहिंस्याद्याश्रयत्वात् स्थूला बादरा हिंस्यादयो हिंस्यभाष्यमोष्यपरिभोग्यपरिग्राह्या आश्रया आलम्बनानि यस्य तत्तदाश्रयं तद्भावात् । तथा वधादि स्थूलमिष्यते । कस्मात्, प्रसिद्धत्वात् सम्प्रतिपन्नत्वात् । केषां, स्थूलानामपि । किंलक्षणानां, दुर्दृशां मिथ्यादृष्टीनां । केन, तत्त्वेन वधादिभावेन । वाशब्दात्स्थूलकृतत्वाच्चेत्यनुक्तं समुच्चीयते ॥ ६ ॥

इदानीमौत्सर्गिकमहिंसाणुव्रतं व्याचष्टे——

शान्ताद्यष्टकषायस्य सङ्कल्पैर्नवभिस्त्रसान् ।
अहिंसतो दयार्द्रस्य स्यादहिंसेत्यणुव्रतम् ॥ ७ ॥

टीका—स्याद्भवेत् । किं तत्, अणुव्रतं । किमाख्यम्, अहिंसेति अहिंसाख्यं । कस्य, शान्ताद्यष्टकषायस्य शान्ता शमं गताः शमिता वा आद्या अनन्तानुबन्धिनो अप्रत्याख्यानावरणाश्च अष्टौ कषायाः क्रोधादयो यस्य येन वा तस्य । पुनः किंविशिष्टस्य, दयार्द्रस्य करुणामृदुहृदयस्य । प्रयो-जनोद्देशेन कदाचित् स्थावरघाते प्रवृत्तावप्यनुकम्प्यमानमानसस्येति भावः । किं कुर्वतः, अहिंसतो द्रव्यभावप्राणैरवियोजयतः । कान्, त्रसान् द्वित्रिचतुः-पञ्चेन्द्रियजीवान् । कैः, सङ्कल्पैः उत्तरसूत्रद्वयनिर्दिष्टैर्हिंसाभिसन्धिभिः । कति-भिः, नवभिः मनोवाक्कायैः पृथक्करणकारणानुमननैरित्यर्थः । अत्र करणग्रहणं कर्तुः स्वातन्त्र्यप्रतिपत्त्यर्थं । कारणाश्रयणं परप्रयोगापेक्षं । अनुमननोपादानं प्रयोजकस्य मानसपरिणामप्रदर्शनार्थं । तथाहि——त्रसहिंसां स्वयं न करोमि

त्रसान् हिनस्मीति मनःसङ्कल्पं न करोमीत्यर्थः। तथा मनसा त्रसहिंसामन्यं न कारयामि त्रसान् हिंसय हिंसयेति मनसाऽन्यप्रयोजको न भवामीत्यर्थः। अत्र हिंसयेति हन्त्यर्थाच्चेवति हिनस्तेश्चुरादिपाठाण्णिजन्तस्य रूपं। तथाऽन्यं त्रसहिंसां कुर्वन्तं मनसा नानुमन्ये सुन्दरमनेन क्रियते इति मनःसङ्कल्पं न करोमीत्यर्थः। एवं वाचा स्वयं त्रसहिंसां न करोमि त्रसान् हिनस्मीति स्वयं वाचं नोच्चारयामीत्यर्थः। तथा वाचा त्रसहिंसां न कारयामि त्रसान् हिंसय हिंसयेति वाचं नोच्चारयामीत्यर्थः। तथाऽन्यं त्रसहिंसां कुर्वन्तं वाचा नानुमन्ये साधु क्रियते त्वयेति वाचं नोच्चारयामीत्यर्थः। तथा कायेन त्रसहिंसां स्वयं न करोमि त्रसहिंसने दृष्टिमुष्टिसन्धाने स्वयं कायव्यापारं न करोमीत्यर्थः। तथा कायेन त्रसहिंसां न कारयामि त्रसहिंसने हस्तादिसञ्ज्ञया कायेन परं न प्रेरयामीत्यर्थः। त्रसहिंसां कुर्वन्तमन्यं कायेन नानुमन्ये त्रसहिंसने प्रवर्तमानमन्यं नखच्छोटिकादिना नाभिनन्दामीत्यर्थः॥ ७॥

एतदेव पद्यद्वयेन संगृह्णन्नाह—

इमं सत्त्वं हिनस्मीति हिन्धि हिन्ध्येष साध्विमम्।
हिनस्तीति वदन्नाभिसन्दध्यान्मनसा गिरा॥ ८॥
वर्तेत न जीववधे करादिना दृष्टिमुष्टिसन्धाने।
न च वर्तयेत्परं तत्परे नखच्छोटिकादि न च रचयेत्॥९॥

टीका—नाभिसन्दध्यात्। न सङ्कल्पयेत। कोऽसौ, त्यक्तगृहः श्रावकः। कं, वधं हिंसां। केन, मनसा तथा गिरा वाचा। कथमिति, किमिति हिनस्मि हन्मि। कं, सत्त्वं जीवं। किंविशिष्टम्, इमं पुरोवर्तिनं। तथा हिन्धि, हिन्धि मारय मारय। कं, इमं। तथा हिनस्ति। हन्ति। कोऽसौ, एषः पुरुषः। कम्, इमं। कथं, साधु सुंदरं। न वर्तेत न व्याप्रियेत। कोऽसौ, त्यक्तगृहः। जीववधे जीवानां सत्त्वकल्पितत्रसप्राणिनां प्राणव्यपरोपणे। क्व विषये, दृष्टिमुष्टिसन्धाने दृष्टिश्चक्षुः मुष्टिर्हस्तांगुलीबन्धविशेषः, दृष्टिश्च मुष्टिश्च दृष्टिमुष्टी ताभ्यां सन्धानं संयोजनं यस्मिन् प्रवृत्तिविषये तद् दृष्टिमुष्टिसन्धानं पुस्तकासनादिकमुपकरणवस्तु तस्मिन्। त्यक्तगृहस्यापि श्रावकस्य सम्भविनि जीववधे करादिना हस्तांगुल्याद्यङ्गोपाङ्गेन न प्रवर्तेतेत्यर्थः। उक्तं च—

आसनं शयनं यानं मार्गमन्यच्च वस्तु यत्।
अदृष्टं तन्न सेवेत यथाकालं भजन्नपि ॥

दृष्टिग्रहणं ज्ञानक्रियोपलक्षणं। मुष्टिग्रहणं च ग्रहणादिक्रियोपलक्षणं। तथा न च वर्तयेत्। कोऽसौ, त्यक्तगृहः। कं, परं। क, तादृशे जीववधे। तथा न च रचयेत् न कुर्यात्। किं तत्, नखच्छोटिकादि। क, तत्परे जीववधे स्वयमेव वर्तमाने पुंसि ॥ ८ ॥ ९ ॥

एवं त्यक्तगृहस्योपासकस्याहिंसाणुव्रतविधानमुपदिश्येदानीं गृहवर्तिनस्तदुपदिशन्नाह—

इत्यनारम्भजां जह्याद्धिंसामारम्भजां प्रति।
व्यर्थस्थावरहिंसावद् यतनामावहेद्गृही ॥ १० ॥

टीका—जह्यात् त्यजेत्। कोऽसौ, गृही गृहवर्तिश्रावकः। कां, हिंसां किंविशिष्टाम्, अनारम्भजां अनारम्भे आसनोपवेशनादौ जातां तत्सम्भविनीमित्यर्थः। उक्तं च—

गृहकार्याणि सर्वाणि दृष्टिपूतानि कारयेत्।

कथं जह्यात्, इति अनेन त्यक्तगृहोपासकोपदिष्टेन प्रकारेण। तथा आवहेत् कुर्यात्। कोऽसौ, गृही। कां, यतनां समितिपरतां। कथं, प्रत्युद्दिश्य। कां, हिंसां। किंविशिष्टाम्, आरम्भजां कृष्याद्यारम्भसम्भविनीं। किंवत्, व्यर्थस्थावरहिंसावत् निष्प्रयोजनैकेन्द्रियवधे यथा ॥ १० ॥

स्थावरवधादपि निवृत्तिमुपपादयति—

यन्मुक्त्यङ्गमहिंसैव तन्मुमुक्षुरुपासकः।
एकाक्षवधमप्युज्झेद्यः स्यान्नावर्ज्यभोगकृत् ॥ ११ ॥

१ हिंसा द्वेधा प्रोक्ताऽऽरम्भानारम्भभेदतो दक्षैः।
गृहवासतो निवृत्तो द्वेधाऽपि त्रायते तां च ॥
गृहवाससेवनरतो मन्दकषायः प्रवर्तितारम्भः।
आरम्भजां स हिंसां शक्नोति न रक्षितुं नियतम् ॥

टीका—यद्यस्माद्भवति । किं तत्, मुक्त्यङ्गं मोक्षसाधनं । किं, अहिंसैव द्रव्यभावहिंसाविरमणमेव । तत्तस्मात् । उज्झेत् त्यजेत् । कोऽसौ, उपासकः श्रावकः । किंविशिष्टो, मुमुक्षुः बुभुक्षोर्नास्ति नियम इति भावः । कम्, एकाक्षवधमपि त्रसहिंसामिव स्थावरहिंसामपि । यः किं, यः एकाक्षवधः । न स्यात् । किंविशिष्टः, अवर्ज्यभोगकृत् अवर्ज्यानां वर्जयितुमशक्यानामावर्ज्यानां वा अर्जनीयानां भोगानां सेव्यार्थानां कारणम् ॥ ११ ॥

सांकल्पिकवधं नियमयति—

गृहवासो विनाऽऽरम्भान्न चारम्भो विना वधात् ।
त्याज्यः स यत्नात्तन्मुख्यो दुस्त्यजस्त्वानुषङ्गिकः ॥१२॥

टीका—न भवति । कोऽसौ, गृहवासो गेहाश्रमः । कथं, विना । कस्मात् आरम्भात् कृष्यादिजीवनोपायात् । तथा न भवति । कोऽसौ, आरम्भः । कथं विना । कस्मात्, वधात् प्राण्युपमर्दनात् । यत एवं तत्तस्मात्त्याज्यः । कोऽसौ, स वधः । किंविशिष्टो, मुख्यः इमं जन्तुमासाद्यार्थित्वेन हन्मीति सांकल्पप्रभवः । यत्नात् अवधानात् । तुर्विशेषे । तेन भवति । कोऽसौ, आरम्भः । किंविशिष्टो, दुस्त्यजः त्यक्तुमशक्यः । किंविशिष्टः, आनुषङ्गिकः कृष्याद्यनुषङ्गे जातः कृष्यादौ क्रियमाणे सम्भवन्नित्यर्थः ॥ १२ ॥

प्रयत्नहेयां हिंसामुपदिशति—

दुःखमुत्पद्यते जन्तोर्मनः संक्लिश्यतेऽस्यते ।
तत्पर्यायश्च यस्यां सा हिंसा हेया प्रयत्नतः ॥ १३ ॥

---

१ जे तसकाया जीवा पुव्वुद्दिट्ठा ण हिंसिदव्वा ते ।
एगिंदियावि णिक्कारणेण पढमं वदं थूलं ॥
स्तोकैकेन्द्रियघाताद् गृहिणां सम्पन्नयोग्यविषयाणाम् ।
शेषस्थावरमारणविरमणमपि भवति कर्तव्यम् ।
भूपयःपवनाग्नीनां तृणादीनां च हिंसनम ।
यावत्प्रयोजन स्वस्य तावत्कुर्यादजन्तुजित् ॥

टीका—हेया त्याज्या गृहिणा। कासौ, हिंसा। कस्मात्, प्रयत्नतः प्रणिधानेन। उत्पद्यते। किं, दुःखं शारीरं दुःखं क्लेशः। कस्य, जन्तोर्जीवस्य परजीवस्य वा। तथा संक्लिश्यते सन्तप्यते। किं तत्, मनश्चित्तं जन्तोः। तथाऽस्यते विनाश्यते। कोऽसौ, तत्पर्यायः स चासौ पर्यायश्च तत्पर्यायो वर्तमानभवग्रहणम्॥ १३॥

अहिंसाणुव्रताराधनोपदेशार्थमित उत्तरः प्रबन्धः। तत्र तावत्प्रयोक्तारमाश्रित्येदमुच्यते—

सन्तोषपोषतो यः स्यादल्पारम्भपरिग्रहः।
भावशुद्ध्येकसर्गो सावहिंसाणुव्रतं भजेत्॥ १४॥

टीका--भजेत् आराधयेत्। कोऽसौ, गृही। किं तत, अहिंसाणुव्रतं। यः किं, यः स्यात्। किंविशिष्टः, अल्पारम्भपरिग्रहः आरम्भश्च परिग्रहश्च ममेदमहमस्येति बुद्धिग्राह्यो भार्याद्यर्थः आरम्भपरिग्रहौ, अल्पौ दुर्ध्यानप्रकर्षानुत्पादकौ आरम्भपरिग्रहौ यस्य स तथोक्तः। कस्मात्, सन्तोषपोषतो धृतेः प्रकर्षात्। पुनः किंविशिष्टो, भावशुद्ध्येकसर्गो मनःशुद्धावेकाग्रः॥१४॥

पञ्चातिचारान् परिहरन् वाङ्मनोगुप्त्यादिभावनापञ्चकेनाहिंसाणुव्रतमुपयुञ्जीतेत्युपदिशति——

मुञ्चन् बन्धं वधच्छेदावतिभारादिरोपणम्।
भुक्तिरोधं च दुर्भावाद्भावनाभिस्तदाविशेत्॥ १५॥

टीका—आविशेदुपयुञ्जीत। कोऽसौ,व्रतिकः। किं तत्,अहिंसाणुव्रतं। काभिः भावनाभिर्वाग्गुप्त्या मनोगुप्त्येर्यासमित्या आदाननिक्षेपणसमित्या आलोकितपानभोजनेनेति पंचभिरभ्यासविशिष्टैः। किं कुर्वन्, मुञ्चन् वर्जयन्। किं तत्, बन्धादिपञ्चकं,। कस्मात्,दुर्भावात्। इति समन्वयः। इतो विस्तरः—बन्धो रज्वादिना गोमनुष्यादीनां नियन्त्रणं। सच पुत्रादीनामपि विनयग्रहणार्थं विधीयते अतो दुर्भावादित्युक्तं। दुर्भावं दुष्परिणामं प्रबलकषायोदयमाश्रित्य क्रियमाणो यो बन्धस्तं वर्जयन्नित्यर्थः। अत्रायं विधिः—बन्धो द्विपदानां

चतुष्पदानां वा स्यात् सोऽपि सार्थकोऽनर्थको वा। तत्रानर्थकस्तावच्छ्रावकस्य कर्तुं न युज्यते। सार्थकः पुनरसौ द्वेधा सापेक्षो निरपेक्षश्च। तत्र सापेक्षो यो दामग्रंथ्यादिना शिथिलेन चतुष्पदानां विधीयते यश्च प्रदीपनादिषु मोचयितुं छेत्तुं वा शक्यते। निरपेक्षो यन्निश्चलमत्यर्थममी बद्ध्यन्ते। द्विपदानां तु दासदासीचोरजारादिप्रमत्तपुत्रादीनां यदा बन्धो विधीयते तदा सविक्रमणा एवामी बन्धनीया रक्षणीयाश्च यथाऽग्निभयादिषु न विनश्यन्ति। यद्वा द्विपदचतुष्पदाः श्रावकेण त एव संग्राह्या येऽबद्धा एव तिष्ठन्तीति प्रथमोऽतिचारः। वधो दण्डकशाद्यभिघातः। सोऽपि दुर्भावाद्विधीयमानो बन्धवदतिचारः। यदि पुनः कोऽपि न करोति विनयं तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृत् द्विर्वा ताडयेदिति द्वितीयोऽतिचारः। छेदः कर्णनासिकादीनामवयवानामपनयनं। सोऽपि दुर्भावात्क्रियमाणोऽतिचारो निर्दयं हस्तादीनां छेद इत्यर्थः स्वास्थ्यापेक्षया तु गण्डव्रणादिच्छेदनदहनादिकं ससान्त्वनं कुर्वतोऽपि नातिचारः स्यादिति तृतीयः। अतिभारादिरोपणं न्याय्यभारादतिरिक्तस्य वोढुमशक्यस्य भारस्यारोपणं वृषभादीनां पृष्ठस्कन्धादौ वाहनोपाधिरोपणं। तदपि दुर्भावात्क्रोधाल्लोभाद्वा क्रियमाणमतिचारः। अत्राप्ययं विधिः—श्रावकेण तावत् द्विपदादिवाहनेन जीविका प्रागेव मोक्तव्येत्येष श्रेष्ठः पक्षः। अथान्योऽसौ न स्यात्तदा द्विपदो यावन्तं भारं स्वयमुत्क्षिपति अवतारयति च तावन्तमेव वाह्यते मोच्यते चोचितवेलायाम्। चतुष्पदस्य तु यथोचितभारः किञ्चिदूनः क्रियते हलशकटादिषु पुनरुचितवेलायामसौ मुच्यते इति चतुर्थः। भुक्तिरोधोऽन्नपानादिनिषेधः। सोऽपि दुर्भावाद्बन्धवदतिचारः। तीक्ष्णक्षुधादिपीडितः प्राणी म्रियते इत्यन्नादिनिरोधो न कस्यापि कर्तव्यः। अपराधकारिणि च वाचैव वदेदद्य ते न दास्यते भोजनादिकमिति। स्वभोजनवेलायां तु नियमत एवान्यं भोजयित्वा स्वयं भुञ्जीतान्यत्रोपवासचिकित्स्यज्वरादिव्याधितेभ्यः। शान्तिनिमित्तं चोपवासाद्यपि कारयेदिति पञ्चमः। किं बहुना मूलगुणस्या-

हिंसालक्षणस्यातिचारो यथा न भवति तथा यतनया वर्तितव्यम् ॥ १५ ॥

उक्तमेवार्थं मुग्धधियां सुखस्मृत्यर्थं किञ्चिदुपसंगृह्णन्नाह—

गवाद्यैर्नैष्ठिको वृत्तिं त्यजेद्बन्धादिना विना ।
भोग्यान् वा तानुपेयात्तं योजयेद्वा न निर्दयम् ॥ १६ ॥

टीका—त्यजेद्वर्जयेत् । कोऽसौ, नैष्ठिकः । पाक्षिकस्य तु नास्ति नियमः । कां, वृत्तिं जीवनार्थं व्यापारं । कैः, गवाद्यैर्गोमहिषतुरगादिभिः । एष प्रशस्यतमः पक्षः । वा अथवा । उपेयात् परिगृण्हीयात् नैष्ठिकः । कान्, एतान् गवादीन् । किंविशिष्टान्, भोग्यान् वाहदोहादावुपयोक्तुं शक्तान् । कथं, विना । केन, बन्धादिना नियन्त्रणताडनादिना । एष मध्यमः पक्षः । अथवा न योजयेत् स्वयमन्येन वा न विधापयेत् नैष्ठिकः । कं, तं बन्धादिं । कथं, निर्दयं । एषोऽधमः पक्षः । 'व्रतानि पुण्याय भवन्ति जन्तोर्न सातिचाराणि निषेवितानि । सस्यानि किं क्वापि फलन्ति लोके मलोपलीढानि कदाचनापि' ॥ अत्राह कश्चित्—ननु हिंसैव श्रावकेण प्रत्याख्याता न बन्धादयः ततस्तत्करणेऽपि न दोषो हिंसाविरतेरखण्डितत्वात् । अथबन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव विरतिखण्डनात् । किं च बंधादीनां प्रत्याख्येयत्वे व्रतेयत्ता विशीर्येत प्रतिव्रतमतिचारव्रतानामाधिक्यादिति । एवं च न बन्धादीनामतिचारतेति । अत्रोच्यते । सत्यमहिंसैव प्रत्याख्याता न बन्धादयः । केवलं तत्प्रत्याख्यानेऽर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्या हिंसोपायत्वात्तेषां । न च बन्धादिकरणेऽपि व्रतभङ्गः किन्त्वतिचार एव । कथं? द्विविधं हि व्रतं अन्तर्वृत्त्या बहिर्वृत्त्या च तत्र मारयामीति विकल्पाभावेन यदा कोपाद्यावेशात्परप्राणप्रहाणमविगणयन् बन्धादौ प्रवर्तते न च हिंसा भवति तदा निर्दयताविरत्यनपेक्षतया प्रवृत्तत्वेनान्तर्वृत्त्या व्रतस्य भङ्गो हिंसाया अभावाद्बहिर्वृत्त्या पालनमिति देशस्य भङ्गजननाद्देशस्यैव पालनादतिचारव्यपदेशः प्रवर्तते । तदुक्तं:—'न मारयामीति कृतव्रतस्य विनैव मृत्युं क इहातिचारः । निगद्यते यः कुपितो वधादीन् करोत्यसौ स्यान्नियमानपेक्षः ॥ मृत्योरभावान्नियमोऽस्ति तस्य कोपाद्दयाहीनतया हि भङ्गः । देशस्य भंगादनुपालनाच्च पूज्या अतीचारमुदाहरन्ति ॥" यच्चोक्तं

प्रतेयत्ता विशीर्येतेति तदयुक्तं विशुद्धाहिंसासद्भावे हि बन्धादीनामभाव एव अतः स्थितमेतत् बन्धादयोऽतिचारा एवेति ॥ १६ ॥

एतदेव संगृह्णन्नाह—

न हन्मीति व्रतं क्रुध्यन्निर्दयत्वान्न पाति न ।
भनक्त्यघ्नन् देशभङ्गत्राणात् त्वतिचरत्यधीः ॥ १७ ॥

टीका—न पाति न पालयति । कोऽसौ, अधीरज्ञोऽसमीक्ष्यकारी । किं तत्, न हन्मीति व्रतं न मारयामीति नियमं । किं कुर्वन्, क्रुध्यन् क्रोधावेशं गच्छन् । कुतो न पाति, निर्दयत्वात् करुणारहितत्वात् । तथा न भनक्ति न नाशयति । कोऽसौ, अधीः । किं तत्, न हन्मीति व्रत । किं कुर्वन्,—अघ्नन् प्राणैर्जीवमवियोजयन् । किं तर्हि करोतीत्याह-अतिचरति व्रतमतिक्रम्याधिवर्तते । तु पुनः । कस्मात्, देशभङ्गत्राणात् भङ्गश्च त्राणं च भङ्गत्राणं देशस्यान्तर्बहिर्वृत्त्युभयरूपव्रतैकदेशस्य भङ्गत्राणमन्तर्वृत्त्या भञ्जनं बहिर्वृत्त्या च पालनं तस्मात् ॥ १७॥

अतिचरतीति पदार्थमभिव्यक्तुं भुक्तिरोधनं चेत्यत्र चशब्देन समुच्चितं चातिचारजातं वक्तुमाह—

सापेक्षस्य व्रते हि स्यादतिचारोंऽशभञ्जनम् ।
मन्त्रतन्त्रप्रयोगाद्याः परेऽप्यूह्यास्तथाऽत्ययाः ॥ १८ ॥

टीका—हि यस्मात् । स्याद्भवेत् । कोऽसौ, अतिचारः । किं स्यादंशभञ्जनं अन्तर्वृत्त्या बहिर्वृत्त्या वा खण्डनं । कस्य, सापेक्षस्य । क्व, व्रते प्रतिपन्नमहिंसाव्रतं न भनज्मीति अपेक्षमाणस्य पुंसः । तथा ऊह्याः वितर्क्याः । के, अत्यया अतीचाराः । किंविशिष्टाः, मन्त्रतन्त्रप्रयोगाद्याः मन्त्र इष्टकर्मसाधनसमर्थः पठितसिद्धोऽक्षरपिण्डः, तन्त्रं सिद्धौषधिक्रियाः, मन्त्रश्च तन्त्रं च मन्त्रतन्त्रे तयोः प्रयोगो विधित्सत्कर्मणि व्यापारणं स आद्यो येषां ध्यानादीनां ते मन्त्रतन्त्रप्रयोगाद्याः गतिस्तम्भमतिस्तम्भोच्चाटनादिदुष्टकर्मसाधनहेतवः । न केवलं ते परेऽपि शास्त्रान्तरनिर्दिष्टाश्च । कथमूह्याः, तथा तेन व्रतापेक्षापूर्वकं तदेकदेशभञ्जनलक्षणेन प्रकारेण मन्त्रादिवत् ॥ १८ ॥

बन्धादीनामतिचारत्वसमर्थनपुरस्सरमतिचारपरिहारे यत्नं कारयन्नाह—

मन्त्रादिनाऽपि बन्धादिः कृतो रज्ज्वादिवन्मलः ।
तत्तथा यतनीयं स्यान्न यथा मलिनं व्रतम् ।। १९ ।।

टीका—भवति । कोऽसौ, बन्धादिः बन्धनताडनादिः । किं स्यात्, मलः यथोदितशुद्धिप्रतिबन्धित्वादहिंसाणुव्रतातिचारः स्यात्तदेकदेशभञ्जकत्वाविशेषा- त् । किंविशिष्टः, कृतो विहितः । केन, मन्त्रादिना मन्त्रतन्त्रादिना । न केवलं रज्ज्वादिनेत्यपिशब्दार्थः । केनेव, रज्वादिवत् पाशकशादिना यथा । तत्तस्मा- द्यतनीयं मैत्र्यादिभावनालक्षणया प्रमादपरिहारपूर्वकचेष्टारूपया च यतनया वर्तितव्यं । कथं, तथा तेन विशुद्धाध्यवसायलक्षणेन प्रकारेण । यथा किं, यथा न स्यात् । किं तत्, व्रतं । किंविशिष्टं, मलिनं सातिचारम् ।। १९ ।।

अहिंसाणुव्रतस्वीकारविधिमाह—

हिंस्यहिंसकहिंसातत्फलान्यालोच्य तत्त्वतः ।
हिंसां तथोज्झेन्न यथा प्रतिज्ञाभङ्गमाप्नुयात् ।। २० ।।

टीका—उज्झेत् व्रतयेत् । कोऽसौ, श्रावकः । कां, हिंसां । कथं, तथा तेन स्वशक्त्यनुसारलक्षणेन प्रकारेण । किं कृत्वा, आलोच्य गुरुसधर्मश्रेयोऽ र्थिभिः सह विमृश्य । कानि, हिंस्यहिंसकहिंसातत्फलानि वध्यवधकवधत- त्साध्यानि । कस्मात्, तत्त्वतः याथातथ्येन । यथा किं, यथा नाप्नुयात् । कोऽसौ, व्रती प्रतिपन्नव्रतः । कं, प्रतिज्ञाभङ्गं नियमखण्डनम् ।। २० ।।

हिंसकादींल्लक्षयति—

प्रमत्तो हिंसको हिंस्या द्रव्यभावस्वभावकाः ।
प्राणास्तद्विच्छिदा हिंसा तत्फलं पापसंचयः ।। २१ ।।

टीका—भवति । कोऽसौ, हिंसकः । किंरूपः, प्रमत्तः कषायाद्याविष्टः । प्रपञ्चितं चैतदहिंसामहाव्रतोपदेशप्रस्तावे प्रागिति न पुनरिह प्रपंच्यते । तथा भवन्ति । के, हिंस्याः प्राणाः । किमात्मानो, द्रव्यभावस्वभावकाः द्रव्यात्मकाः पुद्गलविवर्तरूपाः भावात्मकाश्च चित्परिणामलक्षणाः । तथा भ- वति । काऽसौ, हिंसा । किंलक्षणा, तद्विच्छिदा तेषां द्रव्यभावप्राणानां वियोगकरणं । तथा भवति । किं तत्, तत्फलं हिंसासाध्यं । किं पापस- ञ्चयः दुष्कर्मबन्धः ।। २१ ।।

गृहिणोऽप्यहिंसाव्रतनैर्मल्याय विधिविशेषमाह—

कषायविकथानिद्राप्रणयाक्षविनिग्रहात् ।
नित्योदयां दयां कुर्यात्पापध्वान्तरविप्रभाम् ॥ २२ ॥

टीका—कुर्यात् । कोसौ, अहिंसाणुव्रतनैर्मल्यार्थी । कां, दयामनुकम्पां । किंविशिष्टां, नित्योदयां अविच्छिन्नोल्लासां । पुनः किंविशिष्टां, पापध्वान्तरविप्रभां पापं बन्धाद्यतिचारदुष्कृतं तत् ध्वान्तमिव पुण्यप्रकाशविरोधित्वात् तत्र रविप्रभावत्तदनवगाह्यत्वात् । कस्मात्, कषायेत्यादि-कषायाः क्रोधादयः विकथा मार्गविरुद्धाः कथाः, निद्रा भुक्तान्नपरिणामहेतुः स्वापः, प्रणयो मोहः स्नेहानुबन्धान्ममायमिति ग्रहः, अक्षाणि स्पर्शादिविषयरागद्वेषपरिणतानीन्द्रियाणि, तेषां पञ्चदशप्रमादानां विनिग्रहात् विधिपूर्वकनिग्रहात् । अत्र मार्गविरुद्धाः कथा भक्तस्त्रीदेशराजसम्बन्धिन्यः । तत्र भक्तकथा इदं चेद श्यामाकपायमोदकादि साधु भोज्यं, साध्वनेन भुज्यते, अहमपि चेदं भोक्ष्ये इत्यादिरूपा । तथा स्त्रीकथा स्त्रीणां नेपथ्य हासहावभावादिवर्णनरूपा 'कर्णाटी सुरतोपचारचतुरा, लाटी विदग्धा प्रिये'त्यादिरूपा वा । तथा देशकथा दक्षिणापथः प्रचुरान्नपानस्त्रीसम्भोगप्रधानः । पूर्वदेशो विचित्रवस्त्रगुडखण्डशालिमद्यादिप्रधानः । उत्तरापथे शूराः पुरुषाः, जविनो वाजिनो, गोधूमप्रधानानि धान्यानि, सुलभं कुंकुमं, मधुराणि द्राक्षादाडिमकपित्थादीनि । पश्चिमदेशे सुखस्पर्शानि वस्त्राणि, सुलभा इक्षवः, सितं वारीत्येवमादि । राजकथा-शूरोऽस्मदीयो राजा सधनः शौण्डः गजपतिः गौडः, अश्वपतिस्तुरुष्कः इत्यादिरूपा । एवं प्रतिकूला अपि भक्तादिकथा वाच्याः । यदा तु रागद्वेषावनास्कन्दन् धर्मकथाङ्गत्वेन अर्थकामकथाः कथयति तदा न वैकथिकः स्यात् । एवं प्रणयस्यापि धर्मविरोधित्वेनैव प्रमादत्वं बोध्यम् ॥ २२ ॥

---

१ पुण्यं तेजोमयं प्राहुः प्राहुः पापं तमोमयम् ।
तत्पापं पुंसि किं तिष्ठेद्दयादीधितिमालिनि ॥
स्नेहानुविद्धहृदयो ज्ञानचरित्रान्वितोऽपि न श्लाघ्यः ।
दीप इवापादयिता कज्जलमलिनस्य कार्यस्य ॥

गृहस्थस्य हिंसादुष्परिपाल्यत्वशङ्कामपाकरोति—

विष्वग्जीवचिते लोके क्व चरन् कोऽप्यमोक्ष्यत ।
भावैकसाधनौ बन्धमोक्षौ चेन्नाभविष्यताम् ॥ २३ ॥

टीका-अमोक्ष्यत मोक्षमगमिष्यत । कोऽसौ, कोऽपि मुमुक्षुः । किं कुर्वन्, चरन् चेष्टमानः । कस्मिन्, क्व—न क्वापि प्रदेशे । कस्मिन्, लोके जगति । किंविशिष्टे, विष्वग्जीवचिते समन्ताज्जन्तुव्याप्ते । चेद्यदि वा नाभविष्यतां नाजनिष्यतां । कौ, बन्धमोक्षौ । किंविशिष्टौ, भावैकसाधनौ भावः परिणाम एकमुत्कृष्टं प्रधानं साधनं निमित्तं ययोः । तत्र शुभाशुभोपयोगौ पुण्यापापरूपबन्धस्य शुद्धोपयोगश्च मोक्षस्य प्रधानं कारणमिति विभागः॥२३॥

एवमतिचारपरिहारद्वारेणाहिंसाणुव्रतपरिपालनमुपदिश्य साम्प्रतं रात्रिभोजनवर्जनव्रतबलेन तदुपदिशन्नाह—

अहिंसाव्रतरक्षार्थं मूलव्रतविशुद्धये ।
नक्तं भुक्तिं चतुर्धापि सदा धीरस्त्रिधा त्यजेत् ॥ २४ ॥

टीका-त्यजेत् । कोऽसौ, धीरः । कां, भुक्तिं भोजनं । कतिधा, चतुर्धाऽपि अन्नपानखाद्यलेह्यप्रकारमपि । कदा, नक्तं रात्रौ । कथं, सदा सर्वदा यावज्जीवं । कथं, त्रिधा मनोवाक्कायैः । किंविशिष्टः सन्, धीरः परीषहोपसर्गै-रक्षोभ्यः सत्वभावनानिष्ठ इत्यर्थः । किमर्थं, अहिंसाव्रतरक्षार्थं मूलव्रतविशुद्धये च मूलगुणान्निर्मलीकर्तुमहिंसाणुव्रतं च रक्षितुमित्यर्थः ॥ २४ ॥

दृष्टादृष्टदोषभूयिष्ठमपि रात्रिभोजनमाचरन्तं वक्रभणित्या तिरस्कुर्वन्नाह—

जलोदरादिकृद्यूकाद्यङ्कमप्रेक्ष्यजन्तुकम् ।
प्रेताद्युच्छिष्टमुत्सृष्टमप्यश्नन्निश्यहो सुखी ॥ २५ ॥

टीका—अहो आश्चर्यं कष्टं च । भवति । कोऽसौ, जनः । किंविशिष्टः, सुखी सुखिनमात्मानं मन्यते । इहामुत्र च दुःखभागेव भवतीति भावः । किं कुर्वन्, अश्नन् भोज्यमाहरन् । क्व, निशि रात्रौ । किंविशिष्टम्, जलोदरादिकृद्यूकाद्यङ्कमपि अपिशब्दोऽन्तदीपकत्वाच्चतुर्भिरपि विशेषणैः सम्बध्यते । जलोदरमादिर्येषां कुष्ठादीनामपायानां तान् कुर्वन्तीति तत्कृतो जलोदरादिकृतः ते च ते यूकादयश्च यूकामर्कटिकादयस्ते तथाविधा अङ्कः कलङ्का अङ्के

वा उत्सङ्गे मध्ये यस्यान्नपानादेर्भोज्यवस्तुनस्तथोक्तं । तत्र यूका भोजनेन सह भुक्ता जलोदरं करोति, कौलिकः कुष्ठं, मक्षिका छर्दिं, मद्गिका मेदोहानिं व्यञ्जनान्तःपतितो वृश्चिकस्तालुव्यथां, कण्टकः काष्ठखण्डं वा गलव्यथां, वालश्च गले लग्नः स्वरभङ्गमित्यादयो दृष्टदोषाः सर्वेषां प्रतीतिकरा रात्रि-भोजने सम्भवन्ति। तथा अप्रेक्ष्यजन्तुकमपि अप्रेक्ष्याःस्तमसा छन्नत्वाद् दृष्टुम-शक्या जन्तुका अल्पजन्तवः सूक्ष्मजीवाः कुन्थ्वादयो जलघृतादिमध्ये पतिताः मोदकखर्जूराद्यनुषङ्गिणो वा यत्र तत्तथोक्तं। किं च। निशि भोजने क्रिय-माणेऽवश्यं पाकः सम्भवति । तत्र च षड्जीवनिकायवधोऽवश्यम्भावी । भोजनधावनादौ च जलगतजन्तुविनाशो जलोज्झने च भूमिगतकुन्थुपिपीलि-कादिजन्तुघातश्च संभवति। तथा प्रेताद्युच्छिष्टमपि प्रेता अधमव्यंतरा आ-दयो येषां पिशाचराक्षसादीनां तैरुच्छिष्टं स्पर्शादिना अभोज्यतां नीतं । एते पूर्वे चादृष्टदोषाः। तथा उत्सृष्टमपि प्रत्याख्यातमपि वस्तु घोरान्धकार-रुद्धदृशां तदुपलक्षणासम्भवादेषोऽप्यदृष्टो दोषः ॥ २५ ॥

वनमालादृष्टान्तेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

त्वां यद्युपैमि न पुनः सुनिवेश्य रामं,
लिप्ये वधादिकृदघैस्तदिति श्रितोऽपि ।
सौमित्रिरन्यशपथान्वनमालयैकं,
दोषाशिदोषशपथं किल कारितोऽस्मिन् ॥ २६ ॥

टीका—किल रामायणे ह्येवं श्रूयते । कारितो विधापितः । कोऽसौ, सौमित्रिर्लक्ष्मणः । कया, वनमालया स्वभार्यया। कं दोषाशिदोषशपथं दोषाशिनो रात्रिभोजिनो दोषो महापातकाख्यः तेन लिप्येऽहमिति शपथं। किंविशिष्टम्, एकं शपथान्तररहितं। क, अस्मिन् लोके । किंविशिष्टोऽपि, श्रितोऽपि प्रतिपन्नोऽपि। कान्, अन्यशपथान् शपथान्तराणि। कथं, इति अनेन प्रकारेण। यदि नोपैमि नागच्छामि । कां, त्वां । कथं पुनर्व्याघुट्य। किं त्वा, सुनिवेश्य सुव्यवस्थितं कृत्वा । कं, रामं। तत् ततः लिप्ये संयुज्येऽहं । कैः कर्तृभिः, गोस्त्र्यादिघातकादिपापैः । तत्कथा यथा- लक्ष्मणो दशरथपितृनिदेशात्सह रामेण सीतया च दक्षिणापथे प्रस्थितो-

ऽन्तरा कूर्चनगरे महीधरराजतनयां वनमालां परिणीतवान् । ततश्च रामेण सह परतो देशान्तरं यियासन् स्वभार्यां वनमालां प्रतिमोचयति स्म । सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मणं शपथानकारयत् । यथा प्रिये रामं मनीषिते देशे परिसंस्थाप्य यद्यहं भवतीं स्वदर्शनेन न प्रीणयामि तदा प्राणातिपातादिपातकिनां गतिं यामीति। सा तु तैः शपथैर-तुष्यन्ती यदि रात्रिभोजनकारिणां शपथं करोषि तदा त्वां प्रतिमुञ्चामि, नान्यथेति । स च तथेत्यभ्युपगत्य देशान्तरं प्रस्थितवानिति ॥ २६ ॥

लौकिकसंवाददर्शनेनापि रात्रिभोजनप्रतिषेधमाह—

यत्र सत्पात्रदानादि किंचित्सत्कर्म नेष्यते ।
कोऽद्यात्तत्रात्ययमये स्वहितैषी दिनात्यये ॥ २७ ॥

टीका-कः स्वहितैषी आत्मनो लोकद्वयेऽपि पथ्यमिच्छुः अद्यात्, न कश्चित्स्वहितैषी भुञ्जीतेत्यर्थः। क, तत्र दिनात्यये रात्रिसमये किंविशिष्टे अत्ययमये दोषभूयिष्ठे दोषनिर्वृत्ते वा । यत्र किं, यत्र नेष्यते बाह्यैरपि नाभिमन्यते । किं तत्, सत्कर्म शुभक्रिया । किंविशिष्टं, किञ्चित् किमपि । किं पुनः सर्वं । किंविशिष्टं तत्, सत्पात्रदानादि सत्पात्रदानं स्नानं देवार्चन-माहुतिः श्राद्धं विशेषतो भोजनं च ॥ २७ ॥

दिनरात्रिभोजनद्वारेण पुंसामुत्तममध्यमजघन्यभावमाह--

भुञ्जतेऽह्नः सकृद्वर्या द्विर्मध्याः पशुवत्परे ।
राज्यहस्तद्व्रतगुणान् ब्रह्मोद्यानावगामुकाः ॥ २८ ॥

टीका—भुञ्जते अश्नन्ति । के ते, वर्या उत्तमाः शुभकर्मणोल्वणाः । कथं, सकृत एकवारं । कस्य, अन्हो दिनस्य मध्ये । तथा भुञ्जते । के, मध्या मध्यमाः शुभक्रियाभिरनुत्तमाधमाः। कथं, द्विः द्विवारं । कस्य, अन्हः। तथा परे अधमाः पापकर्माणः भुञ्जते । किंवत्,पशुवत् गोमहिषादिभिस्तुल्यं । कथं,रात्र्य-हः नक्तंदिनं । किंविशिष्टाः सन्तो,नावगामुकाः अजानानाः। कान्,तद्व्रतगुणा-

न् रात्रिभोजनवर्जनोपकारकधर्मान्। किंविशिष्टान्, बह्वोद्यान् सर्वज्ञप्रतिपाद्यान् शास्त्रनिर्दिष्टान् विना सकलजनानुभवसिद्धं रात्रिभोजननिवृत्तिफलविशेषमाह—

योऽत्ति त्यजन् दिनाद्यन्तमुहूर्तौ रात्रिवत्सदा।
स वर्ण्येतोपवासेन स्वजन्मार्द्धं नयन् कियत् ॥ २९ ॥

टीका—योऽत्ति भोजनं करोति। किं कुर्वन्, त्यजन् वर्जयन्। कौ, दिनाद्यन्तमुहूर्तौ दिवसस्याद्यावन्ते च द्वे द्वे घटिके। किंवत्, रात्रिवत् रात्रिं यथा। कथं, सदा नित्यं। स कियत् कियन्मात्रं वर्ण्येत स्तूयेत सद्भिः। किं कुर्वन्-नयन् गमयन्। किं तत्, स्वजन्मार्धं अर्धं निजं जन्म। केन, उपवासेन चतुर्विधाहारपरिहारेण। समांशे विषमांशे वाऽत्रार्धशब्दो व्याख्येयः ॥ २९ ॥

अथ रात्रिभोजनवर्जनवन्मूलव्रतविशुद्ध्यङ्गत्वादहिंसाव्रतरक्षांगत्वाच्च श्रावकस्य भोजनान्तरायान् श्लोकचतुष्टयेन व्याचष्टे—

अतिप्रसङ्गमसितुं परिवर्धयितुं तपः।
व्रतबीजवृतीर्भुक्तेरन्तरायान् गृही श्रयेत् ॥ ३० ॥

टीका-श्रयेत् प्रतिपद्येत। कोऽसौ, गृही व्रतिको गृहस्थः। कान्, अन्तरायान् कस्याः, भुक्तेः भोजनवर्जनहेतूनित्यर्थः। किंविशिष्टान्, व्रतबीजवृतीः बीजस्येव व्रतानामावेष्टकान् रक्षोपायत्वात् अहिंसाणुव्रतशीलभूतानित्यर्थः। किं कर्तुं, असितुं त्यक्तुं। कम्, अतिप्रसङ्गं विहितातिक्रमेणोपर्युपरि प्रवृत्तिं तथा परिवर्द्धयितुं समन्तादुपचेतुं। किं तत्, तपः इच्छानिरोधम् ॥ ३० ॥

तानेव श्लोकत्रयेण विशेषतो निर्देष्टुं विवृणोति—

दृष्ट्वाऽऽर्द्रचर्मास्थिसुरामांसासृक्पूयपूर्वकम्।
स्पृष्ट्वा रजस्वलाशुष्कचर्मास्थिशुनकादिकम् ॥ ३१ ॥
श्रुत्वाऽतिकर्कशाक्रन्दविड्वरप्रायनिःस्वनम्।
भुक्त्वा नियमितं वस्तु भोज्येऽशक्यविवेचनैः ॥ ३२ ॥

संसृष्टे सति जीवद्भिर्जीवैर्वा बहुभिर्मृतैः ।
इदं मांसमिति दृष्टसङ्कल्पे चाशनं त्यजेत् ॥ ३३ ॥

टीका--त्यजेत् । कोऽसौ, व्रतिकः । किं तत्, अशनं तात्कालिकमेवाहारं, न तु वैकालिकादिकं । किं कृत्वा, दृष्ट्वा । स्पृष्ट्वा चेत्यपि द्रष्टव्यं । किं तत्, आर्द्रेत्यादि--आर्द्रमशुष्कं चर्माजिनं, अस्थि च कीकसं, तथा सुरां मद्यं, मांसं पिशितं, असृक् शोणितं, पूयं व्रणादिगतं पक्वासृक्, पूर्वशब्दाद्दुर्शांत्रादि । तथा स्पृष्ट्वा । किं तत्, रजस्वलां पुष्पवतीं स्त्रीं, शुष्के चर्मास्थिनी, शुनकं श्वानं, आदिशब्देन मार्जारश्वपचादि । तथा श्रुत्वा आकर्ण्य । कम्, अतिकर्कशनिःस्वनं अस्य मस्तकं कृन्धि इत्यादिरूपं, आक्रन्दनिःस्वनं हाहेत्याद्यार्तस्वरस्वभावं, विड्वरप्रायनिःस्वनं परचक्रागमनातङ्कप्रदीपनादिविषयं । तथा भुक्त्वा अशित्वा । किं तत्, वस्तु । किंविशिष्टं, नियमितं प्रत्याख्यातं । तथा अशनं त्यजेत् । क्व सति, भोज्ये भोक्तव्ये द्रव्ये सति । किंविशिष्टे, संसृष्टे मिलिते । कैः, जीवैः द्वित्रिचतुरिन्द्रियप्राणिभिः । किं कुर्वद्भिः, जीवद्भिः प्राणद्भिः किंविशिष्टैः सद्भिः, अशक्यविवेचनैः भोज्यद्रव्यात्पृथक्कर्तुमशक्यैः । वा अथवा संसृष्टे । कैः, मृतैर्जीवैः । कतिभिः, बहुभिस्त्रिचतुरादिभिः । तथा । इदमित्यादि इदं भुज्यमानं वस्तु मांसं सादृश्यात् इदं रुधिरमिदमस्थ्ययं सर्प इत्यादिरूपेण मनसा विकल्प्यमाने भोज्यवस्तुनीत्यर्थः ॥ ३३ ॥

अथाहिंसाणुव्रतशीलत्वेन मौनव्रतं व्याचिख्यासुः पञ्चश्लोकीमाह----

गृध्यै हुंकारादिसञ्ज्ञां संक्लेशं च पुरोऽनु च ।
मुञ्चन् मौनमदन् कुर्यात्तपःसंयमबृंहणम् ॥ ३४ ॥

टीका--कुर्याद् व्रतिकः । किं तत्, मौनमजल्पनं । किं कुर्वन्, अदन् भोजनं कुर्वन् । पुनः किं कुर्वन्, मुञ्चन् वर्जयन् । कां, हुङ्कारादिसञ्ज्ञां हुङ्कारखात्कार भ्रूक्षेपाङ्गुलिचलनादि भः स्वाभिप्रायज्ञापन । कस्यै, गृद्ध्यै दृष्टभोज्यार्थं ।

तन्निषेधार्थं तु हुङ्कारादिना सञ्ज्ञाकरणेपि न दोषः। अथवा गृद्धयै भोजनाभिकांक्षाप्रवृत्त्यर्थं । तथा मुञ्चन्। कं, संक्लेशं कोपदैन्याद्यविशुद्धपरिणामं। कथं, पुराऽनु च पूर्वं पश्चाच्च। किंविशिष्टं मौनं, तपःसंयमबृंहणं इच्छानिरोधस्य प्राणेन्द्रियसंयमस्य च पुष्टिकरम् ॥ ३४ ॥

मौनस्य तपोवर्द्धकत्वं श्रेयःसञ्चायकत्वं च श्लोकद्वयेन समर्थयते—

अभिमानावने गृद्धि–रोधाद्वर्धयते तपः ।
मौनं तनोति श्रेयश्च–श्रुतप्रश्रयतायनात् ॥ ३५ ॥

टीका—वर्धयते । किं तत्, मौनं । किं, तपः। कस्मिन्निमित्ते सति, अभिमानावने अयाचकत्वव्रतरक्षायां सत्यां । तथा गृद्धिरोधात् भोजनलौल्यप्रतिबन्धाद्धेतोः। तथा तनोति स्फीतीकरोति। किं तत्, मौनं। किं, श्रेयः पुण्यं। कस्मात्, श्रुतप्रश्रयतायनात् श्रुतज्ञानविनयानुबन्धात् ॥ ३५ ॥

शुद्धमौनान्मनःसिद्ध्या शुक्लध्यानाय कल्पते ।
वाक्सिद्ध्या युगपत्साधुस्त्रैलोक्यानुग्रहाय च ॥ ३६ ॥

टीका—कल्पते सम्पद्यते समर्थो भवति। कोऽसौ, साधुर्देशसंयतः संयतश्च। कस्मै, शुक्लध्यानाय। कया, मनःसिद्ध्या चित्तवशीकरणेन। कस्मात् जातया, शुद्धमौनात् भोजनादौ[२] निरतिचारमौनव्रतात्। तथा साधुः कल्पते। कस्मै, त्रैलोक्यानुग्रहाय त्रिजगद्भव्यजनानुपकर्तुं। कथं, युगपत् एककालं। कया, वाक्सिद्ध्या युगपत्त्रिजगदनुग्रहसमर्थभारतीविभूत्या ॥ ३६ ॥

नियतकालिकसार्वकालिकमौनयोरुद्योतनविशेषनिर्णयार्थमाह—

उद्योतनं महेनैकघण्टादानं जिनालये ।
असार्वकालिके मौने निर्वाहः सार्वकालिके ॥ ३७ ॥

---

१ हुंकारांगुलिखात्कारभ्रूमूर्धचलनादिभिः ।
मौनं विदधता संज्ञा विधातव्या न गृद्धये ॥
भ्रूनेत्रहुंकारकरांगुलीभिर्गृद्धिप्रवृत्त्यै परिवर्ज्य संज्ञाम् ।
करोति भुक्तिं विजिताक्षवृत्तिः स शुद्धमौनव्रतवृद्धिकारी ॥

२ सर्वदा शस्यते जोषं भोजने तु विशेषतः ।
रसायनं सदा श्रेष्ठं सरोगत्वे पुनर्न किम् ॥

टीका—भवति विधीयते वा। किं तत्, उद्द्योतनं फलातिशयलाभमाहात्म्यापादनं। क्व, मौने। किंविशिष्टे, असार्वकालिके यथात्मशक्ति नियतकालं कृते। किं तत् एकेत्यादि—एकघण्टादानं एकस्या घण्टाया दानं वितरणं। क्व, जिनालये अर्हच्चैत्यगृहे। कथं, सह। केन, महेनोत्सवेन पूजया वा। तथा सार्वकालिके यावज्जीवं प्रतिपन्ने मौने उद्द्योतनं भवति। किं तत्, निर्वाहो निराकुलं वहनं। नान्यत् ॥ ३७ ॥

आवश्यकादिषु शक्तितः कृत्वा मौनं सर्वदाऽपि मौनविधानेन वाग्दोषोच्छेदमाह—

आवश्यके मलक्षेपे पापकार्ये च वान्तिवत् ।
मौनं कुर्वीत शश्वद्वा भूयोवाग्दोषविच्छिदे ॥ ३८ ॥

टीका—कुर्वीत। कोऽसौ, साधुः। किं तत्, मौनं। क्व, आवश्यके सामायिकादिकर्मषट्के, तथा मलक्षेपे विण्मूत्रोत्सर्गे, तथा पापकार्ये हिंसादिकर्मणि

१ सन्तोषं भाव्यते तेन वैराग्यं तेन दर्श्यते ।
संयमः पोष्यते तेन मौनं येन विधीयते ॥
लौल्यत्यागात्तपोवृद्धिरभिमानस्य रक्षणम् ।
ततश्च समवाप्नोति मनःसिद्धिं जगत्त्रये ॥
श्रुतप्रश्रयात् श्रेयःसमृद्धेः स्यात्समाश्रयः ।
ततो मनुजलोकस्य प्रसीदति सरस्वती ॥
वाणी मनोरमा तस्य शास्त्रसन्दर्भगर्भिता ।
आदेया जायते येन क्रियते मौनमुज्ज्वलम् ॥
पदानि यानि विद्यन्ते वन्दनीयानि कोविदैः ।
सर्वाणि तानि लभ्यन्ते प्राणिना मौनकारिणा ॥
भव्येन शक्तितः कृत्वा मौनं नियतकालिकम् ।
जिनेन्द्रभवने देया घण्टिका समहोत्सवम् ॥
न सार्वकालिके मौने निर्वाहव्यतिरेकतः ।
उद्योतनं परं प्राज्ञैः किंचनापि विधीयते ॥

परेण क्रियमाणे, चशब्देन स्नानाशनमैथुनादौ च। यतेस्तु भामर्ग्यप्रवेशेऽपि। किंवत्, वान्तिवत्। छर्द्यां यथा छर्दनादनन्तरमाचमनं यावदित्यर्थः। अथवा मौनं कुर्वीत। कथं, शश्वत् नित्यं। किमर्थं, भूय इत्यादि—भूयसां कायदोषापेक्षया बहुतराणां वाग्दोषाणां परुषादिवचनकृतपापास्रवाणां विच्छेदार्थम् ३८

अथ सत्याणुव्रतरक्षणार्थमाह—

कन्यागोक्ष्मालीककूटसाक्ष्यन्यासापलापवत् ।
स्यात्सत्याणुव्रती सत्यमपि स्वान्यापदे त्यजन् ॥ ३९ ॥

टीका—स्यात्। कोऽसौ, व्रतिकः श्रावकः। किंविशिष्टः, सत्याणुव्रती। किं कुर्वन्, त्यजन् वर्जयन्। किं तत्, सत्यमपि चोरे चोरोऽयमित्यादिरूपं तथ्यमपि। किमर्थं, स्वान्यापदे स्वपरविपत्त्यर्थं यत्तथाभूतं तत्सत्यमपि। किंवत्, कन्यालीकादिवत्। यस्मिन्नुक्ते स्वपरयोर्वधबंधादिकं राजादिभ्यो भवति तत्स्थूलासत्यं तादृक् सत्यं च स्वयमवदन् परांश्चावादयन् सत्याणुव्रती स्यादित्यर्थः। तत्र कन्यालीकं यथा—भिन्नां कन्यामभिन्नां वा विपर्ययं वा वदता भवति। इदं सर्वस्य कुमारादिद्विपदविषयकस्यालीकस्योपलक्षणं। गवालीकं—अल्पक्षीरां गां बहुक्षीरां विपर्ययं वा वदतः स्यात्। इदमपि सर्वचतुष्पदविषयालीकस्योपलक्षणं। क्ष्मालीकं—परस्वकामपि भूमिमात्मस्वकां विपर्ययं वा वदतो भवेत्। इदं चाशेषपादपाद्यपदद्रव्यविषयालीकस्योपलक्षणं। कन्याद्यलीकानां च लोकेऽतिगर्हितत्वेन रूढत्वात् द्विपदादिग्रहणं न क्रियते। कन्याद्यलीकत्रयं लोकविरुद्धत्वान्न वाच्यं। कूटसाक्ष्यं—प्रमाणीकृतस्य लञ्चामत्सरादीनां कूटं वदतः स्यात्। यथाऽहमत्र साक्षीति। अस्य च परपापसमर्थकत्वविशेषेण पूर्वेभ्यो भेदः। तच्च धर्मविपक्षत्वान्न वदेत्। धर्म्यं ब्रूयान्नाधर्म्यमिति विवादिभिरभ्यर्थितत्वात्। न्यासापलापः—न्यस्यते रक्षणार्थमन्यस्मै समर्प्यत इति न्यासः सुवर्णादिद्रव्यं तदपलापं नालपेत विश्वसितघातकत्वात्। किं चाज्ञानसंशयादिनाऽप्यसत्यं न ब्रूयात्, किं पुना रागद्वेषाभ्याम् ॥ ३९ ॥

लोकव्यवहाराविरोधेन च तत्प्रयोगमुपदिशति—

लोकयात्रानुरोधित्वात्सत्यसत्यादि वाक्त्रयम् ।
ब्रूयादसत्यासत्यं तु तद्विरोधान्न जातुचित् ॥ ४० ॥

टीका—ब्रूयात् । कोऽसौ, सत्याणुव्रती । किं तत्, सत्यसत्यादिवाक्त्रयं वक्ष्यमाणलक्षणं । कस्मात्, लोकयात्रानुरोधित्वात् लोकव्यवहारविसंवादित्वात् । न तु ब्रूयात् । किं तत्, असत्यासत्यं । कथं, जातुचित् कदाचिदपि । कस्मात्, तद्विरोधात् लोकयात्राविप्रलम्भनात् ॥ ४० ॥

सत्यसत्यादीनि श्लोकत्रयेण लक्षयन्नाह—

यद्वस्तु यद्देशकाल-प्रमाकार प्रतिश्रुतम् ।
तस्मिस्तथैव संवादि सत्यसत्यं वचो वदेत् ॥ ४१ ॥

टीका—वदेत् सत्याणुव्रती । किं तत्, वचः । किंविशिष्टं, सत्यसत्यं । किंलक्षणं, संवादि तथाभूतं । क्व, तस्मिन् प्रतिज्ञाते वस्तुनि । कथं, तथैव तेनैव तद्देशकालपरिणामस्वरूपत्वेन प्रकारेण । यत्किं, यद्वस्तु । प्रतिश्रुतं प्रतिज्ञातं । किंविशिष्टं, यद्देशकालप्रमाकारं प्रमा परिमाण संख्या च, आकारो वर्णसंस्थानादिरूपं, देशश्च कालश्च प्रमा च आकारश्च देशकालप्रमाकाराः प्रतिज्ञाविषयीकृता यस्य तत्तथोक्तम् ॥ ४१ ॥

असत्यं वय वासोऽन्धो रन्धयेत्यादि सत्यगम् ।
वाच्यं कालातिक्रमेण दानात्सत्यमसत्यगम् ॥ ४२ ॥

टीका—वाच्यं वक्तव्यं सत्याणुव्रतिना । किं तद् वचः । किंविशिष्टं, असत्यं किंविशिष्टं सत्, सत्यगं सत्याश्रितं । असत्यमपि किञ्चित्सत्यमेवेत्यर्थः । तदेव वयेत्यादिना दर्शयति—भोः कुविन्द वय आतानवितानीभावरूपतया आसूत्रय त्वं । किं तत्, वासो वस्त्रं । वस्त्रनिर्माणयोग्यतन्तुषु वस्त्रशब्दप्रयोगादसत्यत्वं । तथा भो भक्तक रन्धय पच त्वं । किं तत्, अन्धः क्रूरं । अन्धोयोग्यतण्डुलेष्वन्धशब्दप्रयोगादसत्यत्वं । आदिशब्दाद्गोः पेषक कणिकां पिंष्टीत्यादिरूपं ग्राह्यं । अत्र तत्तच्छब्दावाच्यत्वेऽपि लोके तथाव्यवहारात्सत्यत्वं । इदमसत्यसत्यं ॥ तथा वाच्यं । किं तत्, सत्यं । किंविशिष्टं, असत्यगं सत्यासत्यमित्यर्थः । कुतः, सम्भवद्दानात् वितरणात् । केन, कालातिक्रमेण । यथा अर्द्धमासतमे दिवसे तवेदं देयमित्यास्थाय मासतमे संवत्सरतमे वा दिवसे ददातीति । अत्र दाना-

व्यभिचारात्सत्यत्वं। प्रतिपन्नतत्कालव्यभिचाराच्चासत्यत्वं। इदमपि लोके तथा व्यवहारात्क्वचिद्वक्तव्यम्॥ ४२॥

यत्स्वस्य नास्ति तत्कल्ये दास्यामीत्यादिसंविदा।
व्यवहारं विरुन्धानं नासत्यासत्यमालपेत्॥ ४३॥

टीका—न आलपेत् न ब्रूयात् सत्याणुव्रती। किं तत्, असत्यासत्यं वचः। किं कुर्वाणं, विरुन्धानं बाधमानं। कं, व्यवहारं लोकयात्रां। कया, यदित्यादि-यद्वस्तु नास्ति। कस्य, स्वस्यात्मनः सम्बन्धी। तद्दास्यामि तुभ्यं वितरिष्यामि। कदा, कल्ये प्रातः। इत्यादिरूपया संविदा प्रतिज्ञया॥ ४३॥

सावद्यव्यतिरिक्तानृतपञ्चकस्य नित्यं वर्जनीयत्वमाह—

भोक्तुं भोगोपभोगाङ्गमात्रं सावद्यमक्षमाः।
ये तेऽप्यन्यत्सदा सर्वं हिंसेत्युज्झन्तु वाऽनृतम्॥ ४४॥

टीका—अत्रायोग्या विशेषवचनवाच्यता निवृत्तावशक्तान् प्रति सावद्यविशेषवक्तव्यतानुवृत्त्यर्थो वाशब्दः किं बहुनेत्यर्थः। वा किं बहुना। उज्झन्तु त्यजन्तु। के, तेऽपि धर्मैषिणः। किं तत्, अनृतं। किंविशिष्टं, अन्यत् सावद्यव्यतिरिक्तं सदपलपनादि। कियत्, सर्वं पञ्चधाऽपि। कथं, सदा नित्यं। कथं कृत्वा, हिंसेति यतः सर्वमनृतं हिंसापर्यायत्वाद्धिंसैव प्रमादयोगाविशेषात्। यत्र तु प्रमत्तयोगो नास्ति तद्धियाऽनुष्ठानाद्यनुवदनं नासत्यं। एतेनेदमपि संगृहीतं-'सा मिथ्याऽपि न गीर्मिथ्या या गुर्वादिप्रसादिनी' इति। के ते इत्याह—ये भवंति। किंविशिष्टाः, अक्षमा असमर्थाः। किं कर्तुं, मोक्तुं त्यक्तुं। किं तत्, सावद्यं वचः क्षेत्रं कृषेत्यादिरूपं प्राणिवधादिप्रवर्तकं। किंविशिष्टं सत्, भोगोपभोगाङ्गमात्रं भोगो भोजनादिः, उपभोगः कामिन्यादिः भोगश्चोपभोगश्च भोगोपभोगौ तयोरङ्गं साधनं तदेव तन्मात्रं न पुनस्तदसाधनं। सावद्यं वचः-तत्र नास्त्यात्मेत्यादि सदपलपनं। सर्वगत आत्मा श्यामाकतण्डुलमात्रो वेत्यादिकमसदुद्भावनं। गामश्वमभिवदतो विपरीतं। काणं काणमभिदधानस्याप्रियं अरे बान्धकिनेय इत्यादि गर्हितं साक्रोशमित्यन्यत्॥ ४४॥

सत्याणुव्रतस्य पञ्चातिचारान् हेयत्वेनाह—

मिथ्यादिशं रहोऽभ्याख्यां कूटलेखक्रियां त्यजेत् ।
न्यस्तांशविस्मर्त्रनुज्ञां मन्त्रभेदं च तद्व्रतः ॥ ४५ ॥

टीका—त्यजेत् । कोऽसौ, तद्व्रतः । तत्स्थूलालीकादिवचनविरतिलक्षणं व्रतं यस्यासौ सत्याणुव्रतीत्यर्थः । किं तत्, मिथ्यादिशमित्यादिपञ्चकं । तत्र मिथ्यादिक् मिथ्योपदेशः । अभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेष्वन्यस्यान्यथा प्रवर्तनं । परेण सन्देहापन्नेन पृष्टेऽज्ञानादिनान्यथा कथनमित्यर्थः । अथवा प्रतिपन्नसत्यव्रतस्य परपीडाकरं वचनमसत्यमेव । ततः प्रमादात्परपीडाकरणे उपदेशे अतिचारो यथा वाह्यन्तां खरोष्ट्रादयो हन्यन्तां दस्यव इति निष्प्रयोजनं वचनं । यद्वा विवादे स्वयं परेण वाऽन्यतरातिसन्धानोपायोपदेशो मिथ्योपदेशः ॥ रहोऽभ्याख्या-रहस्येकान्ते स्त्रीपुम्भ्यामनुष्ठितस्य क्रियाविशेषस्याभ्याख्या प्रकाशनं यया दम्पत्योरन्यस्य वा पुंसः स्त्रिया वा रागप्रकर्ष उत्पद्यते । सा च हास्यक्रीडादिनैव क्रियमाणोऽतिचारो न त्वभिनिवेशेन । तथा सति व्रतभङ्ग एव स्यात् । कूटलेखक्रिया अन्येनानुक्तमननुष्ठितं च यत्किञ्चित्तस्य परप्रयोगवशादेवं तेनोक्तमनुष्ठितं चेति वञ्चनानिमित्तं लेखनं । अन्यसरूपाक्षरमुद्राकरणमित्यन्ये । न्यस्तांशविस्मर्त्रनुज्ञा-न्यस्तस्य निक्षिप्तस्य हिरण्यादिद्रव्यस्य अंशमेकमंशं विस्मर्तुर्विस्मरणशीलस्य निक्षेप्तुरनुज्ञा । द्रव्यमनुनिक्षेप्तुर्विस्मृततत्संख्यस्याल्पसंख्यं तद्गृह्णत एवमित्यनुमतिवचनं । सोऽयं न्यासापहाराख्योऽतिचारः। मन्त्रभेदः अङ्गविकारभ्रूक्षेपादिभिः पराभिप्रायं ज्ञात्वाऽसूयादिना तत्प्रकटनं । विश्वसितमित्रादिभिर्वा आत्मना सह मन्त्रितस्य लज्जादिकरस्यार्थस्य प्रकाशनं । यत्तु मन्त्रभेदः परीवादः पैशुन्यं कूटलेखनम् । मुधा साक्षिपदोक्तिश्च सत्यस्यैते विघातकाः ॥ इति यशस्तिलके अतिचारान्तरवचनं तत्परेऽप्यूह्यास्तदात्यय इत्यनेन संगृहीतं प्रतिपत्तव्यम् ॥ ४५ ॥

अथाचौर्याणुव्रतलक्षणार्थमाह—

चौरव्यपदेशकरस्थूलस्तेयव्रतो मृतस्वधनात् ।
परमुदकादेश्चाखिलभोग्यान्न हरेद्दीत न परस्वम् ॥ ४६ ॥

टीका--न हरेत् न गृह्णीयात्। नापि ददीत न परस्मै वितरेत् । कोऽसौ, चौरेत्यादि—चौरोऽयमुपलक्षणाद्धर्मघातकोऽयं बधकारोयमित्यादिव्यपदेशं नाम करोतीति चौरादिव्यपदेशकरं, स्थूलस्तेयं बादरचौर्यं खात्रखननादिकं, तत्पूर्वमदत्तादानं वा, तत्र व्रतं नियमस्तस्माद्वा व्रतं निवृत्तिर्यस्य स तथोक्तोऽचौर्याणुव्रतीत्यर्थः । किं तत्, परस्वं परस्य धनं चेतनमचेतनं वा द्रव्यं सामर्थ्यादत्तं तस्यैव परस्वामिकत्वोपपत्तेर्दत्तस्य च स्वस्वामिकत्वसम्भवात् ॥ किंविशिष्टं, परमन्यत् । कस्मात् मृतस्वधनात् मृतश्चासौ स्वो ज्ञातिश्च मृतस्वः अर्थात्पुत्रादिरहितो लोकान्तरप्राप्तो बन्धुस्तस्य धनं तस्मात् अन्यत्, जीवतां ज्ञातीनामित्यर्थः । न केवलं ततः परं उदकादेश्च तोयतृणप्रभृतेश्च । किंविशिष्टात् अखिलभोग्यात् अखिलैः सर्वैः स्थिरैरागन्तुभिश्च लोकैर्भोक्तुं योग्यत्वेन राजादिसमुत्कलितात् ॥ ४६ ॥

प्रमत्तयोगात्परकीयतृणस्याप्यदत्तस्यादाने दाने चाचौर्यव्रतभङ्गं दर्शयति

संक्लेशाभिनिवेशेन तृणमप्यन्यभर्तृकम् ।
अदत्तमाददानो वा ददानस्तस्करो ध्रुवम् ॥ ४७ ॥

टीका—ध्रुवं निश्चितं भवति । कोऽसौ, पुरुषः । कीदृशः, तस्करश्चौरः । किं कुर्वाणः, आददानः आत्मसात्कुर्वन् । ददानो वा परस्मै प्रयच्छन् । किं तत्, तृणमपि किं पुनः सुवर्णादिकं । किंविशिष्टं, अन्यभर्तृकं अन्यः स्वस्मात्परो भर्ता स्वामी यस्य तदन्यभर्तृकमन्यदीयमित्यर्थः । किंविशिष्टं सत्, अदत्तं तत्स्वामिना अवितीर्णं । केन, संक्लेशाभिनिवेशेन रागाद्यावेशेन । एतेनेदमुक्तं भवति—प्रमत्तयोगे सत्येवादत्तस्यादाने दाने वा चौर्यं स्यान्नान्यथा ॥ ४७ ॥

निधानादिधनं राजकीयत्वसमर्थनेन व्रतयन्नाह—

नास्वामिकमिति ग्राह्यं निधानादिधनं यतः ।
धनस्यास्वामिकस्येह दायादो मेदिनीपतिः ॥ ४८ ॥

टीका—न ग्राह्यं नादेयमचौर्याणुव्रतिना । किं तत्, निधानादि धनं नदीगुहाबिवराकरादिस्थितं द्रव्यं । कथं कृत्वा, अस्वामिकमिति नास्य कश्चित् स्वामीति परस्वं न भवतीति सङ्कल्प्य । कुत इत्याह यतो यस्मात् । भवति । कोऽसौ

मेदिनीपतिः राजा । कीदृशः, दायादः साधारणः स्वामी । कस्य, धनस्य । कीदृशस्य, अस्वामिकस्य स्वामिरहितस्य । क्व, इह लोके ॥ ४८ ॥

स्वामिसांशयिके स्वधनेऽपि नियमं कारयन्नाह—

स्वमपि स्वं मम स्याद्वा न वेति द्वापरास्पदम् ।
यदा तदाऽऽदीयमानं व्रतभङ्गाय जायते ॥ ४९ ॥

टीका– जायते सम्पद्यते । किं तत्, स्वमपि स्वं आत्मीयमपि द्रव्यं । कस्मै, व्रतभङ्गाय अचौर्यव्रतभङ्गं करोतीत्यर्थः । किं क्रियमाणं, दीयमानं आकारप्रश्लेषादादीयमानं च । कदा, तदा तस्मिन् काले । यदा यस्मिन् काले भवति । किं तत, स्वमपि स्वं । किंविशिष्टं, द्वापरास्पदं संशयस्थानं । कथं कृत्वा, इदं धनं मम स्याद्भवेद्वा न वा स्यादित्येवं ॥ ४९ ॥

अचौर्याणुव्रतातिचारप्रहाणार्थमाह—

चोरप्रयोगचोराहृतग्रहावधिकहीनमानतुलम् ।
प्रतिरूपकव्यवहृतिं विरुद्धराज्येऽप्यतिक्रमं जह्यात् ॥ ५० ॥

टीका–जह्यात् त्यजेत् । कोऽसौ, अचौर्याणुव्रती । किं तत्, चोरप्रयोगाद्यतिचारपञ्चकमिति समन्वयः । तत्र चोरप्रयोगः–चोरयतः स्वयमन्येन वा चोरय त्वमिति चोरणक्रियायां प्रेरणं । प्रेरितस्य वा साधु करोषीत्यनुमननं । कुशिकाकर्तरिकाघर्घरिकादिचोरोपकरणानां वा समर्पणं विक्रयणं वा । अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रतस्य चोरप्रयोगो व्रतभङ्ग एव तथाऽपि किमधुना यूयं निर्व्यापारास्तिष्ठथ। यदि वो भक्तादिकं नास्ति तदाऽहं तद्ददामि। भवदानीतमोषस्य वा यदि क्रेता नास्ति तदाऽहं विक्रेष्ये इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्यासावतिचारः । चौराहृतग्रहः-अप्रेरितेनाननुमतेन च चौरेणानीतस्य कनकवस्त्रादेरादानं मूल्येन मुद्रिकया वा । चौरानीतं च काणक्रयेण मुद्रिकया वा पच्छन्नं गृह्णँश्चौरो भवति ततश्चौर्यकरणाद्व्रतभङ्गः। वाणिज्यमेव मया क्रियते न चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वादभङ्ग इति भङ्गाभङ्गरूपोऽतिचारः ॥ अधिकहीनमानतुलं मानं प्रस्थादि हस्तादि च। तुला

उन्मानं । मानं च तुला च मानतुलं, अधिकं च हीनं चाधिकहीनं तच्च तन्मानतुलं च, अधिकमानं हीनमानं, अधिकतुला हीनतुला चेत्यर्थः । तत्र न्यूनेन मानादिनाऽन्यस्मै ददाति, अधिकेनात्मनो गृह्णातीत्येवमादिकूटप्रयोगो हीनाधिकमानोन्मानमित्यर्थः ॥ प्रतिरूपकव्यवहृतिः-प्रतिरूपकं सदृशं व्रीहीणां पलंजि, घृतस्य वसा, हिङ्गोः खदिरादिवेष्टस्तैलस्य मूत्रं, जात्यसुवर्णरूप्ययोर्युक्तसुवर्णरूप्ये, इत्यादिप्रतिरूपकेण व्यवहृतिर्व्यवहारो व्रीह्यादिषु पलंज्यादि प्रक्षिप्य तद्विक्रयणं । एतद् द्वयं परधनग्रहणरूपत्वाद्भङ्ग एव । केवलं खात्रखननादिकमेव चौर्यं प्रसिद्धं । मया तु वणिक्कलैव कृतेति भावनया व्रतरक्षणोद्यतत्वादतिचार एवेति ।

विरुद्धराज्येऽप्यतिक्रमः । अपिः समुच्चये । विरुद्धं विनष्टं विगृहीतं वा राज्यं राज्ञः पृथ्वीपालनोचितं कर्म विरुद्धराज्यं छत्रभङ्गःपराभियोगो वेत्यर्थः । तत्रातिक्रम उचितन्यायादन्येनैव प्रकारेणार्थस्य दानग्रहणं । विरुद्धराज्येऽल्पमूल्यलभ्यानि महार्घ्याणि द्रव्याणि इति प्रयततः । अथवा विरुद्धयोरर्थाद्राज्ञो राज्यं नियमिता भूमिः कटकं वा विरुद्धराज्यं तत्र । षष्ठीसप्तम्योरर्थं प्रति भेदाभावात् । तस्यातिक्रमो व्यवस्थालंघनं । व्यवस्था च परस्परविरुद्धराजकृत्वे एव । तल्लंघनं चान्यतरराज्यनिवासिन इतरराज्ये प्रवेशः । इतरराज्यनिवासिनो वा अन्यतरराज्ये प्रवेशः । विरुद्धराज्यातिक्रमस्य च यद्यपि स्वस्वामिनोननुज्ञातस्यादत्तादानलक्षणयोगेन तत्कारिणां च चौर्यदण्डयोगेन चौर्यरूपत्वाद्व्रतभङ्ग एव, तथापि विरुद्धराज्यातिक्रमं कुर्वता मया वाणिज्यमेव कृतं न चौर्यमिति भावनया व्रतसापेक्षत्वाल्लोके च चोरोयमिति व्यपदेशाभावादतिचारता स्यात् । अथवा चोरप्रयोगादयः पञ्चाप्येते व्यक्तचौर्यरूपा एव । केवलं सहकारादिना वा प्रकारेण क्रियमाणास्तेतिचारतया व्यपदिश्यन्ते । न चैते राज्ञा तत्सेवकादीनां वा न सम्भवन्तीति वाच्यम् । यतः प्रथमो द्वितीयः स्पष्ट एव । तृतीयस्तुर्यश्च यदा राजा भाण्डागारे हीनाधिकमानोन्मानं द्रव्याणां विनिमयं च कारयति तदा राज्ञोप्यतिचारौ स्तः । विरुद्धराज्यातिक्रमस्तु यदा सामन्तादिः कश्चित् स्वस्वामिनो वृत्तिमुपजीवति

तद्विरुद्धस्य च सहायो भवति तदा अस्यातिचारः स्यात् । सोमदेवपंडितस्तु मानन्यूनत्वाधिकत्वेन द्वावतीचारौ मन्यमान इदमाह--मानवन्न्यूनताधिक्ये तेन कर्म ततो ग्रहः । विग्रहो संग्रहोर्थस्यास्तेयस्यैते निवर्तकाः ॥ ५० ॥

अथ स्वदारसन्तोषाणुव्रतस्वीकारविधिमाह—

प्रतिपक्षभावनैव न रतौ रिरंसारुजि प्रतीकारः ।
इत्यप्रत्ययितमनाः श्रयत्वहिंस्रः स्वदारसन्तोषम् ॥ ५१ ॥

टीका—श्रयतु स्वीकरोतु । कोऽसौ, अहिंस्रः ईषद्धिंसनशीलोऽणुव्रती । कं, स्वदारसन्तोषं स्वदारेषु स्वभार्यायां स्वदारैर्वा सन्तोषो मैथुनसञ्ज्ञावेदनाशान्त्या देहमनसोः स्वास्थ्यापादनं । किंविशिष्टः सन्, अप्रत्ययितमनाः प्रत्यया विश्वासः प्रत्ययः संजातोऽस्येति प्रत्ययितं न प्रत्ययितमप्रत्ययितं मनो यस्यासावप्रत्ययितमना असञ्जातविश्वासचित्त इत्यर्थः । कथं, इति अनेन सदुपदेशप्रकारेण । तमेव दर्शयति—भवति । कोऽसौ, प्रतीकारः प्रशमनोपायः । कस्यां रिरंसारुजि योन्यादौ रन्तुमिच्छारूपायां वेदनायां । किं प्रतीकारः, प्रतिपक्षभावनैव ब्रह्मचर्यस्य प्रागुक्तविधिना पुनश्चेतसि सन्निवेशनमेव । न पुनर्भवति तत्र प्रतीकारः । किं, रतिः स्त्रीसम्भोगः ॥ ५१ ॥

स्वदारसन्तोषिणं व्याचष्टे——

सोऽस्ति स्वदारसन्तोषी योऽन्यस्त्रीप्रकटस्त्रियौ ।
न गच्छत्यंहसो भीत्या नान्यैर्गमयति त्रिधा ॥ ५२ ॥

टीका—अस्ति भवति । कोऽसौ, स गृहाश्रमी । कीदृशः, स्वदारसंतोषी स्वदारेषु निजधर्मपत्न्यां सन्तुष्यति मैथुनसञ्ज्ञां प्रतिचिकीर्षयन् भजतीत्येवंव्रतः । स्वदारेषु सन्तोषोऽस्यास्तीति वा । यः किं, यो न गच्छति न भजति । के, अन्यस्त्रीप्रकटस्त्रियौ अन्यस्त्री परदाराः परिगृहीता अपरिगृहीताश्च । तत्र परिगृहीताः सस्वामिका अपरिगृहीता स्वैरिणी प्रोषितभर्तृका कुलाङ्गना वा अनाथा । कन्या तु भाविभर्तृकत्वात्पित्रादिपरतन्त्रत्वाद्वा सनाथेत्यन्यस्त्रीतो न विशिष्यते । प्रकटस्त्री वेश्या । अन्यस्त्री च प्रकटस्त्री च अन्यस्त्रीप्रकटस्त्रियौ । ते द्वे अपि यो न भजति । कया, भीत्या भयेन । कस्मात्, अंहसः पा-

पात् न राजादेः । नापि यो गमयति उपभोजयति । के, ते द्वे । कैः कर्तृभिः, अन्यैः परदारादिलम्पटैः । कथं, त्रिधा मनोवाक्कायैः कृतकारिताभ्यामनुमत्याऽपि वा । तदेतद्ब्रह्माणुव्रतं निरतिचारं मद्यामिषक्षौद्रपञ्चोदुम्बरविरतिलक्षणाष्टमूलगुणान् प्रतिपन्नवतो विशुद्धसम्यग्दृशः श्रावकस्योपदिश्यते। यस्तु स्वदारवत्साधारणस्त्रियोऽपि व्रतयितुमशक्तः परदारानेव वर्जयति सोऽपि ब्रह्माणुव्रतीष्यते । द्विविधं हि तद्व्रतं । स्वदारसन्तोषः परदारवर्जनं चेति । एतच्चान्यस्त्रीप्रगटस्त्रियाविति स्त्रीद्वयसेवाप्रतिषेधोपदेशाल्लभ्यते । तत्राद्यमभ्यस्तदेशसंयमस्य नैष्ठिकस्येष्यते । द्वितीयं तु तदभ्यासोन्मुखस्य । तदाह श्रीसोमदेवपण्डितः—वधूवित्तस्त्रियौ मुक्त्वा सर्वत्रान्यत्र तज्जने । माता स्वसा तनूजेति मतिर्ब्रह्म गृहाश्रमे ॥ यस्तु—पंचुंबरसहियाइं सत्त वि वसणाइ जो विवज्जेइ । सम्मत्तविसुद्धमई सो दंसणसावओ भणिओ ॥ इति वसुनन्दिसैद्धान्तिमतेन दर्शनप्रतिमायां प्रतिपन्नस्तस्येदं ॥ तन्मतेनैव व्रतप्रतिमां बिभ्रतो ब्रह्माणुव्रतं स्यात् तद्यथा—पव्वेसु इत्थिसेवा अणंगकीडा सया विवज्जेइ ॥ थूळअड बंभयारी जिणेहिं भणिदो पवयणम्हि ॥ यस्तु " सम्यग्दर्शनशुद्धः संसारशरीरभोगनिर्विण्णः । पञ्चगुरुचरणशरणो दर्शनिकस्तत्त्वपथगृह्य " इति स्वामिमतेन दर्शनिको भवेत्तस्येदं ब्रम्हाणुव्रतमतिचारवर्जनार्थमेवात्रानूद्यतं ॥ ५२ ॥

अथ यद्यपि गृहस्थस्य प्रतिपन्नं व्रतमनुपालयतो न तादृशः पापबन्धोऽस्ति तथापि यतिधर्मानुरक्तत्वेन तत्प्राप्तेः प्राग्गार्हस्थ्येऽपि कामभोगविरक्तः सन् श्रावकधर्मं प्रतिपालयति तं वैराग्यकाष्ठामुपनेतुं सामान्येनाब्रह्मदोषानाह—

सन्तापरूपो मोहाङ्गसादतृष्णानुबन्धकृत् ।
स्त्रीसम्भोगस्तथाऽप्येष सुखं चेत्का ज्वरेऽक्षमा ॥ ५३ ॥

टीका—भवति । कोऽसौ, स्त्रीसम्भोगः । कीदृशः, सन्तापरूपः स्त्रीसम्पर्कस्य पित्तप्रकोपहेतुत्वात्सन्तापयतीति सन्तापः सन्तापकरं रूपं यस्य स सन्तापरूपः ज्वरपक्षे तु सन्तपनं सन्तापः संज्वरः स एव रूपमस्येति विग्रहः। तथा चोक्तं सन्तापात्कोपजो ज्वर इति । पुनः कीदृशः, मोहेत्यादि—मोहो हिताहितविवेकविकलत्वं,अंगसादः शरीरनिःसहत्वं तृष्णानुबन्धः तर्षाविच्छेदः

पक्षे पिपासासातत्यं मोहश्चांगसादश्च तृष्णानुबन्धश्च मोहांगसादतृष्णानुबंधा-स्तान् करोति । यद्यप्येवंविध एष तथाऽपि सुखं चेत् मन्यसे भो आत्मन् तदा काऽपि त्वया कार्या । काऽसौ, अक्षमा । क्व, ज्वरे ज्वरोपि सुखं मन्तव्य इति भावः । तथा चोक्तमार्षे--स्त्रीभोगो न सुखं चेतस्सम्मोहाद्गात्र-सादनात् । तृष्णानुबन्धात्सन्तापरूपत्वाच्च यथा ज्वरः ॥ ५३ ॥

परदाररतौ सुखाभावमुपदिशति—

समरसरसरङ्गोद्गममृते च काचित्क्रिया न निर्वृतये ।
स कुतः स्यादनवस्थितचित्ततया गच्छतः परकलत्रम् ॥५४॥

टीका--न च भवति । काऽसौ, क्रिया प्रवृत्तिः । किंविशिष्टा, काचित् आलिंगनचुम्बनादिका । कस्यै, निर्वृतये सुखार्थं । कथं, ऋते विना । कं, समरसरसरंगोद्गमं । समसमायोगं समानरतिमित्यर्थः । कुतः स्यान्न कुतश्चि-द्भवेदित्यर्थः । कोऽसौ, समरसरसरंगोद्गमः । कस्य, पुंसः । किं कुर्वतो, गच्छतः सेवमानस्य । किं तत्, परकलत्रं । कया, अनवस्थितचित्ततया स्वपरजनशंकातंकाकुलितमनस्कतया ॥ ५४ ॥

स्वदाररतस्यापि भावतो द्रव्यतश्च हिंसासम्भवं नियमयति—

स्त्रियं भजन् भजत्येव रागद्वेषौ हिनस्ति च ।
योनिजन्तून् बहून् सूक्ष्मान् हिंस्रः स्वस्त्रीरतोऽप्यतः ॥५५॥

टीका-भवति । कोऽसौ, नरः । किंविशिष्टः, हिंस्रः । भावद्रव्याभ्यां हिंसनशीलः । किंविशिष्टोऽपि, स्वस्त्रीरतोऽपि स्वस्त्रियां रतं मैथुनं यस्य सोऽपि विशेषतस्तु परस्त्रीरतः । तत्र रागद्वेषयोर्बहुतरत्वसम्भवात् । कस्मात्, अत एतस्मात्कारणात् । यतो भजत्येव अवश्यमाश्रयति । कोऽसौ, स्त्रियं भजन् स्त्रियं सेवमानः पुमान् । कौ, रागद्वेषौ प्रीत्यप्रीती । तथा हिनस्ति हन्ति । कान्, योनिजन्तून् भगजीवान् । किंविशिष्टान्, सूक्ष्मान् दुर्लक्ष्यान् । कति, बहून् प्रचुरान् । वात्स्यायनोऽपि योनौ जन्तूनिच्छति तथा च तद्ग्रन्थः— " रक्तजाः कृमयः सूक्ष्मा मृदुमध्यादिशक्तयः । जन्मवर्त्मसु कण्डूतिं जनयन्ति तथाविधाम् " ॥ ५५ ॥

ब्रह्मचर्यमहिमानमभिष्टौति—

स्वस्त्रीमात्रेऽपि सन्तुष्टो नेच्छेद्योऽन्याः स्त्रियः सदा ।
सोऽप्यद्भुतप्रभावः स्यात् किं वर्ण्यं वर्णिनः पुनः ॥ ५६ ॥

टीका—यो नेच्छेत् नाभिलषेत् । काः, स्त्रियः नारीः । किंविशिष्टाः, अन्याः स्वस्त्रीतो व्यतिरिक्ताः । किंविशिष्टः सन्, सन्तुष्टः सन्तोषं गतः । केन, स्वस्त्रीमात्रेण निजनार्यैव । स्यात् । कोऽसौ, सोऽपि स्वदारसन्तुष्टोऽपि । किंविशिष्टः, अद्भुतप्रभावो लोकविस्मयनीयमाहात्म्यः । किं वर्ण्यं । किं माहात्म्यं स्तुत्यं । कस्य, वर्णिनः सर्वस्त्रीनिवृत्तस्य । कथं, पुनः प्राग्वर्णितप्रायत्वादित्यर्थः ॥ ५६ ॥

इदानीं स्वभर्तृमात्रसेवनव्रतायाः स्त्रिया बहुमान्यतां दृष्टान्तेन स्पष्टयति

रूपैश्वर्यकलावर्यमपि सीतेव रावणम् ।
परपूरुषमुज्झन्ती स्त्री सुरैरपि पूज्यते ॥ ५७ ॥

टीका—पूज्यते सत्क्रियते । काऽसौ, स्त्री । कैः, सुरैर्देवैः । किं पुनर्मनुष्यादिभिरित्यपिशब्दार्थः । किं कुर्वती, उज्झन्ती व्रतयन्ती । कं, परपूरुषं स्वभर्तुरन्यं पुरुषं । अत्र हेतौ शतृङ्, परपुरुषोज्झनेन सुरपूजाया अन्यत्वात् । किंविशिष्टमपि, रूपेत्यादि—रूपमाकारसौन्दर्यं ऐश्वर्यं पूजार्थाज्ञाधिपत्यं कला गीतनृत्यादिकाः रूपं चैश्वर्यं च कलाश्च ताभिर्वर्यमुत्कृष्टमसाधारणरूपादिमन्तमित्यर्थः । अपिर्विस्मये । केव कमित्याह—सीतेव रावणं जानकी यथा लंकेश्वरम् ॥ ५७ ॥

ब्रह्माणुव्रतातिचारानाह—

इत्वरिकागमनं परविवाहकरणं विटत्वमतिचाराः ।
स्मरतीव्राभिनिवेशोऽनङ्गक्रीडा च पञ्च तुर्ययमे ॥ ५८ ॥

टीका—इत्वरिकागमनादयः पञ्चातिचारास्तुर्ययमे सार्वकालिकब्रह्मचर्याणुव्रते भवन्तीति सम्बन्धः । तत्रेत्वरिकागमनं अस्वामिका असती गणिकात्वेन पुंश्चलीत्वेन वा पुरुषानेति गच्छतीत्येवंशीला इत्वरी । तथा प्रतिपुरुषमेतीत्येवंशीलेति व्युत्पत्त्या वेश्यापीत्वरी । ततः कुत्सायां के इत्वरिका तस्यां गमनमासेवनं । इयं चात्र भावना—भाटिप्रदानान्नियतकालस्वीकारेण स्वक-

त्वीकृत्य वेश्यां वेत्वरिकां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वादल्पकालपरिग्रहाच्च न भंगो वस्तुतोऽस्वदारत्वाच्च भंग इति भंगाभंगरूपत्वादित्वरिकाया वेश्यात्वेनान्यस्यास्त्वनाथतयैव परदारत्वात् । किं चास्य भाट्यादिना परेण किञ्चित्कालं परिगृहीतां वेश्यां गच्छतो भंगः कथञ्चित्परदारत्वात्तस्या । लोके तु परदारत्वारूढेर्न भंग इति भंगाभंगरूपोऽतिचारः । अन्ये त्वपरिगृहीतकुलांगनामप्यन्यदारवर्जिनोऽतिचारमाहुः । तत्कल्पनया परस्या भर्तुरभावेनापरदारत्वादभङ्गो लोके च परदारतया रूढेर्भंग इति भङ्गाभङ्गरूपत्वात्तस्य । एतेनेत्वरिकापरिगृहीतापरिगृहीतागमनलक्षणमतिचारद्वयं तत्त्वार्थशास्त्रोद्दिष्टमपि संगृहीतं भवति । परविवाहकरणादयस्तु चत्वारो द्वयोरपि स्फुरन्तीति प्रथमोऽतिचारः ॥ १ ॥

परविवाहकरणं-स्वापत्यव्यतिरिक्तानां कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानं । एतच्च स्वदारसन्तोषवता स्वकलत्रेतरदारवर्जकेन च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न कार्यं न च कारणीयमिति व्रतं यदा गृहीतं भवति तदाऽन्यविवाहकरणं मैथुनकरणमित्यर्थतः प्रतिषिद्धमेव च भवति । तद्व्रती तु मन्यते विवाह एवायं मया क्रियते न मैथुनं कार्यत इति व्रतसापेक्षत्वादतिचारः । कन्याफललिप्सा च सम्यग्दृष्टेरव्युत्पन्नावस्थायां सम्भवति । मिथ्यादृशस्तु भद्रकावस्थायामनुग्रहार्थं व्रतादाने सा सम्भवति । ननु परविवाहनवत् स्वापत्यविवाहनेऽपि समान एव दोष इति चेत् सत्यं । किं तर्हि यदि स्वकन्याविवाहो न कार्यते तदा स्वच्छन्दचारिणी स्यात् । ततश्च कुलसभ्यलोकविरोधः स्यात । विहितविवाहात्तु पतिनियतस्त्रीत्वेन न तथा स्यात् । एष न्यायः पुत्रेऽपि विकल्पनीयः । यदि पुनः कुटुम्बचिन्ताकारकः कोऽपि स्वभ्रात्रादिर्भवेत्तदा स्वापत्यविवाहनेऽपि नियत एव श्रेयान् । यदा तु स्वदारसन्तुष्टो विशिष्टसन्तोषाभावात् अन्यत्कलत्रं परिणयति तदाऽप्यस्यायमतिचारः स्यात् । परस्य कलत्रान्तरस्य विवाहकरणमात्मना विवाहनमिति व्याख्यानादिति द्वितीयोऽतिचारः ॥ २ ॥

विटत्वं भण्डिमा तत्प्रधानवाक्प्रयोगः ॥ ३ ॥ स्मरतीव्राभिनिवेशः—कामे-

तिमात्रमाग्रहः। परित्यक्तान्यसकलव्यापारस्य तद्व्यवसायितेत्यर्थः । यथा मुखकक्षोपस्थान्तरेष्ववितृप्ततया लिङ्गं प्रक्षिप्य महतीं वेलां निश्चलो मृत इवास्ते चटक इव चटकां मुहुर्मुहुः स्त्रियमारोहति । जातबलक्षयश्च वाजीकरणान्युपयुङ्क्ते । अनेन खल्वौषधादिप्रयोगेण गजप्रसेकी तुरगावमर्दी च पुरुषो भवतीति बुद्ध्या इति चतुर्थः ॥ ४ ॥

अनङ्गक्रीडा अङ्गं साधनं देहावयवो वा तच्चेह मैथुनापेक्षया योनिर्मेहनं च ततोऽन्यत्र मुखादिप्रदेशे रतिः। यतश्च चर्मादिमयैर्लिङ्गैः स्वलिङ्गेन कृतार्थोऽपि स्त्रीणामवाच्यदेशं पुनः पुनः कुद्राति । केशाकर्षणादिना वा क्रीडन् प्रबलरागमुत्पादयति साऽप्यनङ्गक्रीडोच्यते । इह च श्रावकोऽत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तत्कर्तुं न शक्नोति तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते । मैथुनमात्रेण च यापनायां सम्भवत्यां विटत्वादित्रयमर्थतः प्रतिषिद्धमेव । तत्प्रयोगे हि न कश्चिद्गुणः । प्रत्युत सद्योऽतिरागोद्दीपनं बलक्षयस्तात्कालिकी च्छिदा राजयक्ष्मादिरोगाश्च स्युः । तदुक्तं-ऐदम्पर्यमतो मुक्त्वा भोगानाहारवद्भजेत् ॥ देहदाहोपशान्त्यर्थमभिध्यानविहानये ॥ १ ॥ एवं प्रतिषिद्धाचरणाद्भङ्गो नियमाबाधनाच्चाभङ्ग इत्येतेऽपि विटत्वादयस्त्रयोऽतिचाराः। यद्वा स्वदारसन्तोषी मैथुनमेव मया वेश्यादौ प्रत्याख्यातमिति स्वकल्पनया तत्र तदेव वर्जयति न विटत्वादिकं । परदारविवर्जकोऽपि परदारेषु मैथुनमेव नाशिष्टवाक्प्रयोगालिङ्गनादीनीति तयोः कथञ्चिद्व्रतसापेक्षत्वाद्विटत्वादयोऽतिचाराः । स्त्रियास्तु पूर्वव्रतपरविवाहकरणादयः। प्रथमस्तु यदा स्वकीयपतिर्वारिकदिने सपत्न्या परिगृहीतो भवति तदा सपत्नीवारकं विलुप्य तं परिभुञ्जानाया अतिचारोऽतिक्रमादिना च परपुरुषं (इव) स्वपतिं वा ब्रह्मचारिणमभिसरन्त्याः स्यात् ॥ ५८ ॥

अथ परिग्रहपरिमाणाणुव्रतं व्याचष्टे—

ममेदमिति सङ्कल्पश्चिदचिन्मिश्रवस्तुषु ।
ग्रन्थस्तत्कर्शनात्तेषां कर्शनं तत्प्रमाव्रतम् ॥ ५९ ॥

टीका—भवति । कोऽसौ, ग्रन्थः परिग्रहः । किंलक्षणो, ममेदमिति सङ्कल्पः इदं चेतनमचेतनं मिश्रं वा वस्तु मम सम्बन्धि मदीयं मत्स्वामिकमिति

सङ्कल्पो मानसोऽध्यवसायो ममत्वपरिणामो मूर्च्छेति यावत्। केषु, चिद्वस्तुषु कलत्रपुत्रादिषु, अचिद्वस्तुषु गृहसुवर्णादिषु। मिश्रवस्तुषु चेतनाचेतनेषु बहिः पुष्पवाटिकादिषु अन्ततश्च मिथ्यात्वादिषु। भवति। किं तत्, तत्प्रमाव्रतं परिग्रहपरिमाणाख्यमणुव्रतं। किं, कर्शनमल्पीकरणं। केषां, तेषां चितामचितां चिदचितां च वस्तूनां। कस्मात्, तत्कर्शनात् यथोक्तमूर्च्छालक्षणपरिग्रहाल्पीकरणात्॥ ५९॥

अन्तरङ्गसङ्गनिग्रहोपायमाह—

उद्यत्क्रोधादिहास्यादिषट्कवेदत्रयात्मकम्।
अन्तरङ्गं जयेत्सङ्गं प्रत्यनीकप्रयोगतः॥ ६०॥

टीका—जयेत् निगृह्णीयात्। कोऽसौ, पञ्चमाणुव्रतार्थी। कं, सङ्गं ग्रन्थं। किंविशिष्टं, अन्तरङ्गं आध्यात्मिकं। किमात्मकं, उद्यदित्यादि उद्यन्ति उच्चलन्ति विपच्यमानानि, उदितानां दुर्जयत्वात्, क्रोधादयोऽनन्तानुबन्ध्यप्रत्याख्यानावरणवर्जिताः, तान्मिथ्यात्वसहितान्निगृह्यैव देशसंयमस्य प्रवृत्तत्वात् अष्टौ प्रत्याख्यानावरणसंज्वलनाख्या इह गृह्यन्ते, हास्यादिषट्कं हास्यरत्यरतिशोकभयजुगुप्साः, वेदाः स्त्रीपुन्नपुंसकवेदाः रागाख्यास्तेषां त्रयं वेदत्रयं, क्रोधादयश्च हास्यादिषट्कं च वेदत्रयं च क्रोधादिहास्यादिषट्कवेदत्रयाणि, उद्यन्ति च तानि क्रोधादिहास्यादिषट्कवेदत्रयाणि च तान्येव आत्मा स्वरूपं यस्यासौ तदात्मकस्तं। केन जयेत्, प्रत्यनीकप्रयोगतः यथास्वमुत्तमक्षमादिभावनया॥ ६०॥

बहिरङ्गसङ्गत्यागविधिमाह—

अयोग्यासंयमस्याङ्गं सङ्गं बाह्यमपि त्यजेत्।
मूर्च्छाङ्गत्वादपि त्यक्तुमशक्यं कृशयेच्छनैः॥ ६१॥

टीका—त्यजेत्। कोऽसौ, पञ्चमाणुव्रती। कं, सङ्गं। किंविशिष्टं, बाह्यं वस्तुक्षेत्रादिकं। अन्तरङ्गसङ्गत्यागापेक्षयाऽपिशब्दः समुच्चये। किंविशिष्टम्, अङ्गं साधनं। कस्य अयोग्यासंयमस्य अयोग्यः श्रावकस्य कर्तुमनुचितोऽसंयमः स चेहानारम्भजत्रसवधो व्यर्थः स्थावरवधः परदारागमनादिश्च

अयोग्यश्चासावसंयमश्चायोग्यासंयमस्तस्य । कुतो हेतोः, मूर्च्छाङ्गत्वात् मोहोदयनिमित्तत्वात् । यस्त्वसौ त्यक्तुमशक्यस्तत्त्यागविधिमाह—कृशयेत् स्वल्पीकुर्यात् । कं, तं बाह्यसङ्गं । किंविशिष्टमपि, त्यक्तुमशक्यमपि अशक्यवर्जनमपि। कथं, शनैः मनाक् समयपरिपाट्या कालक्रमेण परिग्रहसञ्ज्ञाया अनादिसन्तत्या प्रवर्तमानत्वेन सहसा तत्त्यागस्य कर्तुमशक्यत्वात् कृतस्यापि तद्वासनावशाद्भङ्गसम्भावनाच्चैतदुच्यते ॥ ६१ ॥

एतदेव प्रपञ्चयन्नाह—

देशसमयात्मजात्याद्यपेक्षयेच्छां नियम्य परिमायात् ।
वास्त्वादिकमामरणात्परिमितमपि शक्तितः पुनः कृशयेत् ।६२

टीका—परिमायात् परिमितं कुर्यात् । किं तत्, वास्त्वादिकं वास्तुक्षेत्रधनधान्यद्विपदचतुष्पदशयनासनयानकुप्यभाण्डलक्षणं दशभेदं बाह्यग्रन्थं । किं कृत्वा, नियम्य सन्तोषभावनया निगृह्य । कां, इच्छां परिग्रहे तृष्णां । कया, देशेत्यादि देशो वास्यमानो जनपदः, समयः कालः, आत्मा स्वात्मा, जातिः वणिक्त्वादिः, देशश्च समयश्च आत्मा च जातिश्च ता आदयो येषां स्वान्वयवयःपदव्यादीनां ते देशादयस्तेषामपेक्षया तानाश्रित्येत्यर्थः । कथं परिमायात्, आमरणात् मरणावधि यावज्जीवमित्यर्थः । तथा कृशयेच्छ्रावकः । किं, तत्परिमितमपि वास्त्वादिकं । कथं, पुनः । कस्मात्, शक्तितः नैस्सङ्गयभावनया समुत्पन्नां स्वशक्तिमपेक्ष्येत्यर्थः ॥ ६२ ॥

परिग्रहं वक्रभणित्या दूषयन्नाह—

अविश्वासतमोनक्तं लोभानलघृताहुतिः ।
आरम्भमकराम्भोधिरहो श्रेयः परिग्रहः ॥ ६३ ॥

टीका—अहो आश्चर्ये । श्रेयः सेव्यः पुंसां कल्याणं वा । कोऽसौ, परिग्रहः । किंविशिष्टः, अविश्वासतमोनक्तं अविश्वास एव तमो ध्वान्तं दुःखहेतुत्वात् तत्र नक्तं रात्रिस्तद्धेतुत्वादिति अविश्वासतमोनक्तं । तथा लोभ एवानलोऽग्निश्चित्तसन्तापकत्वात् तत्र घृताहुतिः सर्पिःप्रक्षेपः प्रदीपकत्वादिति लोभानलघृताहुतिः । तथा आरम्भमकराम्भोधिः आरम्भाः कृष्यादयस्त एव मकरास्त्रासातङ्कनिमित्तत्वात् तत्र अम्भोधिः समुद्रः उत्पत्तिनित्यप्रवृत्तिनिमि-

तत्वादित्यारम्भमकराम्भोधिः ॥ ६३ ॥

पञ्चमाणुव्रतातिचारपञ्चकनिषेधविधिमाह—

वास्तुक्षेत्रे योगाद्धनधान्ये बन्धनात्कनकरूप्ये ।
दानात्कुप्ये भावान्न गवादौ गर्भतो मितिमतीयात् ॥ ६४ ॥

टीका—नातीयान्नातिक्रमेत् । कोऽसौ, परिग्रहपरिमाणाणुव्रती । कां, मितिं व्रतविषयीकृतं परिमाणं । क, वास्तुक्षेत्रे वास्तुनि च क्षेत्रे च । कस्मात् योगात् वास्त्वन्तरसंयोजनं क्षेत्रान्तरसंयोजनं चाश्रित्य । तथा धनधान्ये धने च धान्ये च न मितिमतीयात् । कस्मात्, बन्धनात् बन्धनं रज्ज्वादिनियन्त्रणं सत्यङ्कारदानादि चाश्रित्य । तथा कनकरूप्ये सुवर्णे च रूप्ये च न मितिमतीयात् । कस्मात्, दानात्, दानमाश्रित्य । तथा कुप्ये सुवर्णरूप्याभ्यामन्यत्र कांस्यरथादिद्रव्ये न मितिमतीयात् । कस्मात्,भावात् भावं परिणामान्तरं अभिप्रायं वाश्रित्य । तथा गवादौ गोमहिषीवडवादिचतुष्पदपत्तिशुकादिद्विपदवर्गे न मितिमतीयात् । कस्मात्, गर्भतो गर्भमाश्रित्येति समन्वयः॥

इतस्तदर्थो विस्तरतः कथ्यते- तत्र वास्तु गृहादि ग्रामनगरादि च । तत्र गृहादि त्रेधा खातोच्छ्रिततदुभयभेदात् । तत्र खातं भूमिगृहादिकं उच्छ्रितं प्रासादादिकं, खातोच्छ्रितं च भूमिगृहोपरिगृहादिसन्निवेशः। क्षेत्रं सस्योत्पत्तिभूमिः । तत् त्रेधा सेतुकेतूभयभेदात् । तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते । केतुक्षेत्रं आकाशोदकपातान्निष्पाद्यसस्यं । उभयमुभयजलनिष्पाद्यसस्यं । वास्तु च क्षेत्रं च वास्तुक्षेत्रमिति समाहारनिर्देशोऽत्रोत्तरत्र च बाह्यग्रन्थस्य पञ्चविधत्वकल्पनयाऽतीचारपञ्चकस्य सुखप्रयोजनार्थं । तत्र वास्तुक्षेत्रे योगाद्भित्तिवृत्त्याद्यपनयेन वास्तुक्षेत्रान्तरमीलनान्तरमाश्रित्य परिमितपरिग्रहः श्रावको न मितिमतीयात् देवगुरुसाक्षिकव्रतग्रहणकाले यावज्जीवं चतुर्मासादिकालावधि वा प्रतिपन्नां संख्यां नातिक्रमेत् । वास्त्वादिकमेव मया विपुलीक्रियते न प्रतिपन्ना तत्संख्यातिक्रम्यत इति बुद्ध्या तद्विषयं वा हस्तादिपरिमाणं सहसाकारादिना नातिक्रमेत् । अन्यथा वास्तुक्षेत्रप्रमातिक्रमो नाम प्रथमोतिचारः स्यात् व्रतसापेक्षस्यैव स्वबुद्ध्या व्रतभङ्गमकुर्वतो

तिचारत्वव्यवस्थापनात् ॥ १ ॥

धनं गणिमादिभेदात् चतुर्विधं । तत्र गणिमं पूगफलजातिफलादि । धरिमं कुंकुमकर्पूरादि । मेयं स्नेहलवणादि । परीक्ष्यं रत्नवस्त्रादि । धान्यं व्रीह्या-दिभेदात्पञ्चदशधा । उक्तं च-व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः अणवः प्रियंगुकोद्रवमयुष्टिकाशालिराढक्यः ॥ १ ॥

किं च कलायकुलित्थौ पञ्चदशधान्यानीति च । धनं च धान्यं च धन-धान्यं । तत्र स्वगृहगतधनादेर्विक्रये व्यये वा कृते गृहिष्यामीति भावनया बन्धनात् रज्ज्वादिनियन्त्रणलक्षणात् सत्यङ्कारदानादिरूपाद्वा स्वीकृत्य धन-धान्यं विक्रेतृगृहे एव स्थापयन्न मितिमतीयात् । अन्यथा द्वितीयोतिचारः स्यात् ॥ २ ॥

कनकं सुवर्णं घटितमघटितं वाऽनेकप्रकारमेवं रूप्यमपि, कनकं च रूप्यं तत्र । दानात् स्वव्रतकालावधौ पूर्णे गृहिष्यामीति अभिप्रायेण तुष्टराजादितः स्वप्रतिपन्नसंख्यां ततोधिके लब्धेन्यस्मै वितरणान्न मितिमतीयात् अन्यथा तृतीयोतिचारः स्यात् ॥ ३ ॥

कुप्ये रूप्यसुवर्णव्यतिरिक्ते कांस्यलोहताम्रसीसकत्रपुमृद्भाण्डवंशविकारो-दङ्किकाकाष्ठमञ्चकमञ्चिकामसूरकरथशकटहलप्रभृतिद्रव्ये-भावात् द्वयोर्द्वयोर्मे-लनेनैकीकरणरूपात् पर्यायान्तराद्व्रतावधौ पूर्णे गृहिष्यामीति अन्यप्रदेयतया व्यवस्थापनेनार्थित्वरूपाभिप्रायाद्वा न मितिमतीयादन्यथा चतुर्थोतिचारः स्यात् । कुप्यस्य हि या संख्या कृता तस्याः कथञ्चित् द्विगुणत्वे सति व्रत-भङ्गभयात् भावतो द्वयोर्द्वयोर्मीलनेनैकीकरणरूपात्पर्यायान्तरात्स्वाभाविक-संख्याबाधनात् संख्यामात्रपूरणाच्चातीचारः । अथवा भावतोऽभिप्रायादर्थि-त्वलक्षणाद्विवक्षितकालावधेः परतो गृहिष्याम्यतो नान्यस्मै प्रदेयतया व्यवस्थापयतोसौ स्यात् ॥ ४ ॥

गवादौ गौरादिर्यस्य द्विपदचतुष्पदवर्गस्यासौ गवादिः । आदिशब्देन हास्त्यश्वमहिष्यादिचतुष्पदानां शुकसारिकादिद्विपदानां पत्न्युपरुद्धदासपदा-त्यादीनां संग्रहः । तत्र गर्भतो न मितिमतीयात् । गवादीनां गर्भग्रहणादु-

पलक्षणादन्येषां यथास्वमनाभोगादिनातिक्रमादिना वा संख्यां नातिक्रमेत् । गोमहिषीवडवादेर्हि विवक्षितसंवत्सराद्यवधिमध्ये एव प्रसवे अधिकगवादिभावाद्व्रतभङ्गः स्यादिति तद्भयात्क्रियत्यपि काले गते गर्भग्रहणाद्गर्भस्थगवादिभावेन बहिस्तदभावेन च कथञ्चिद् व्रतभङ्गात्पञ्चमोतिचारः स्यात् ॥ ५ ॥

एते च क्षेत्रवास्तुहिरण्यरूप्यधनधान्यदासीदासकुप्यप्रमाणातिक्रमा इति तत्त्वार्थमतेन पञ्चातिचाराः प्रपञ्चिताः । स्वामिमतेन त्विमे—अतिवाहनातिसंग्रहविस्मयलोभातिभारवहनानि । परिमितपरिग्रहस्य च विक्षेपाः पञ्च लक्ष्यन्ते ॥ १ ॥ अत्रातिवाहनं लोभावेशवशात् वृषभादीनां शक्त्यतिक्रमेण हठान्मार्गे नयनं । अतिसंग्रहः इदं धान्यादिकमग्रे विशिष्टं लाभं दास्यतीति लोभावेशादतिशयेन संग्रहणं । अतिविस्मयो धान्यादौ प्रपन्नलाभेन विक्रीते मूल्तोऽप्यसंगृहीते वा तत्क्रयाणकेनाधिकेऽर्घे लब्धे लोभावेशादतिविषादः । अतिलोभो विशिष्टेऽर्घे लब्धेऽपि अधिकलाभाकांक्षा । अतिभारवहनं लोभावेशादधिकभारारोपणं ॥ सोमदेवपण्डितस्त्विदमाह---कृतप्रमाणाल्लोभेन धनाद्यधिकसंग्रहः ॥ पञ्चमाणुव्रतज्यानिं करोति गृहमेधिनाम् ॥१॥ तच्चैतच्च परेऽप्यूह्यास्तदत्यया इत्यनेन संगृहीतम् ॥ ६४ ॥

एवं निर्मलीकृतपरिग्रहव्रतपालकस्य फलं दृष्टान्तेन स्फुटयन्नाह—

यः परिग्रहसंख्यानव्रतं पालयतेऽमलम् ।
जयवज्जितलोभोऽसौ पूजातिशयमश्नुते ॥ ६५ ॥

टीका—यः पालयते रक्षयति । किं तत्, परिग्रहसंख्यानव्रतं । कथं कृत्वा, अमलं यथोक्तातिचाररहितं । असौ श्रावकः पूजातिशयं शक्रादिकृतामर्चनामश्नुते लभते । किंविशिष्टः, यतो जितलोभः जितलोभत्वादित्यर्थः । किंवत्, जयवत् मेघेश्वराख्यकुरुराजो यथा ॥ ६५ ॥

इत्थं निरतिचाराणुव्रतपरिणत्येनुपालनाय निर्मलशीलसप्तकपालनायामुपासकमुत्थापयितुं तदनुभावमाह—

पञ्चाप्येवमणुव्रतानि समतापीयूषपानोन्मुखे
सामान्येतरभावनाभिरमलीकृत्यार्पितान्यात्मनि ।

त्रातुं निर्मलशीलसप्तकमिदं ये पालयन्त्यादरात्
ते सन्यासविधिप्रमुक्ततनवः सौर्वीः श्रियो भुंजते ॥ ६६ ॥

टीका--भुञ्जते अनुभवन्ति । के, ते निर्मलाणुव्रतशीलपालिनो भव्याः । काः, श्रियः सम्पदः । किंविशिष्टाः, सौर्वीः स्वर्भवाः यथास्वं सौधर्माद्यच्युतान्तकल्पसम्बन्धिनीः । किंविशिष्टाः सन्तः, सन्न्यासेत्यादि सन्न्यासविधिना सप्तदशाध्यायोक्तेन प्रकर्षेण सकलसङ्घसमक्षतालक्षणेन मुक्ता त्यक्ता तनुः शरीरं यैस्ते तथोक्ताः । सति साधने निस्तरणभणितिरियं । ये के, ये पालयन्ति । किं तत्, इदमनन्तराध्याये वक्ष्यमाणं । निर्मलशीलसप्तकं । कस्मात् आदरात् तत्परतया । किं कर्तुं, त्रातुं पालयितुं । निर्वहणार्थमिदं । कानि, अणुव्रतानि, । कति, पञ्च अपिशब्दादेकं द्वे त्रीणि चत्वारि वा । कथं, एवं उक्तप्रकारेण । किंविशिष्टानि सन्ति, अर्पितानि परिणमितानि । क, आत्मनि अन्तस्तत्त्वे । उद्यपनप्रकाशनेयं । किंविशिष्टे, समतापीयूषपानोन्मुखे साम्यामृतपानाद्यभिमुखे । किं कृत्वा, अमलीकृत्य तत्तदतीचारेभ्यः प्रच्याव्य । उद्द्योतनोक्तिरियं । काभिः, सामान्येतरभावनाभिः सामान्यभावनाभिर्मैत्र्यादिभिर्विशेषभावनाभिः प्रतिव्रतं पञ्चशो नियमिताभिर्महाव्रताधिकारोक्ताभिरिति भद्रम् ॥ ६६ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादित एकादशः
प्रक्रमाच्च **चतुर्थोऽध्यायः** समाप्तः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

अथ शीलसप्तकं व्याकर्तुकामस्तद्विकल्पभूतानि गुणव्रतानि तावल्लक्षयति —

यद्गुणायोपकारायाणुव्रतानां व्रतानि तत् ।
गुणव्रतानि त्रीण्याहुर्दिग्विरत्यादिकान्यपि ॥ १ ॥

टीका—तत्तस्मादाहुर्ब्रुवन्ति । स्वामिमतानुसारिणः । कानि, गुणव्रतानि । कति, त्रीणि । कानि, दिग्विरत्यादिकानि दिग्विरतिमनर्थदण्डविरतिं भोगोपभोगपरिमाणं । अपिशब्दः सितपटोक्तखरकर्मज्ञापनार्थः । यद्यस्मात् भवन्त्य-

मूनि व्रतानि। कस्मै, गुणाय। कोऽर्थः, उपकाराय। केषाम्, अणुव्रतानाम्॥ १॥

किं तद्दिग्व्रतमित्याह—

यत्प्रसिद्धैरभिज्ञानैः कृत्वा दिक्षु दशस्वपि।
नात्येत्यणुव्रती सीमां तत्स्याद्दिग्विरतिर्व्रतम्॥ २॥

टीका—स्यात्। किं तत्, गुणव्रतमित्यर्थः नामैकदेशो हि व्रतशब्दो नाम्न्यपि वर्तते भीमादिवत्। किं नाम, दिग्विरतिः दिक्षु विरतिर्नियमितसीम्नो बहिर्यातायातनिवृत्तिः। यत्किं, यन्नात्येति नातिक्रम्य गच्छति। कोऽसौ, अणुव्रती न तु महाव्रती तस्य सर्वारम्भपरिग्रहविरतत्वेन समितिपरत्वेन च नृलोके यथाकामं सञ्चाराद्दिग्विरत्यनुपपत्तेः। कां नात्येति, सीमां मर्यादां। किं कृत्वा, प्रतिपद्य। कां, सीमां। कासु, दिक्षु। कतिषु, दशसु। अपिशब्दादेकद्वित्र्यादिष्वपि यावज्जीवमल्पकालं चापि। कैः, अभिज्ञानैः समुद्रनद्यादिभिश्चिन्हैः। किंविशिष्टैः, प्रसिद्धैः दिग्विरतिमर्यादाया दातुर्गृहीतुश्च प्रतीतैः॥ २॥

दिग्व्रतेनाणुव्रतिनोऽपि महाव्रतित्वमुपपादयति—

दिग्विरत्या बहिः सीम्नः सर्वपापनिवर्तनात्।
तप्तायोगोलकल्पोऽपि जायते यतिवद् गृही॥ ३॥

टीका—जायते भवति। गृही। किंवत्, यतिवत्, महाव्रती यथा। कस्मात् सर्वपापनिवर्तनात् सर्वपापानि स्थूलेतरहिंसादीनि भोगोपभोगादीनि च तेभ्यो निवर्तनात् विरमणात् तेषां निवारणाद्वा। क्व, बहिः परतः। कस्याः, सीम्नः प्रतिपन्नमर्यादायाः। कया, दिग्विरत्या दिग्विरतिगुणव्रतेन। किंविशिष्टोऽपि गृही, तप्तायोगोलकल्पोऽपि सन्तप्तलोहपिण्ड इव आरम्भपरिग्रहपरत्वेन सर्वत्र गमनभोजनशयनादिक्रियासु जीवोपमर्दकरत्वात्॥ ३॥

एतदेव दृढयन्नाह—

दिग्व्रतोद्रिक्तवृत्तघ्नकषायोदयमान्द्यतः।
महाव्रतायतेऽलक्ष्यमोहे गेहिन्यणुव्रतम्॥ ४॥

टीका—महाव्रतायते महाव्रतमिवाचरति नियमितदिग्विभागाद्बहिः सर्वसावद्यनिवर्तकत्वात्, न तु महाव्रतं भवति तत्प्रतिबन्धकोदयसद्भावात्। किं तत्, अणुव्रतं। क्व, गेहिनि गृहस्थे। किंविशिष्टे, अलक्ष्यमोहे निश्चेतुमशक्यभावे

प्रत्याख्यानावरणाख्यचारित्रमोहपरिणामे । कस्मात्, दिग्व्रतेत्यादि दिग्व्रतेनोद्रिक्तमुत्कर्षं नीतं व्रतघ्नकषायाणां प्रत्याख्यानावरणाख्यद्रव्यक्रोधादीनामुदग्रस्य विपाकस्य मान्द्यमनौत्कट्यं यत्तस्मात् दिग्विरतिमन्दतरीकृतप्रत्याख्यानावरणविपाकादित्यर्थः ॥ ४ ॥

दिग्विरत्यतिचारानाह—

सीमविस्मृतिरूर्ध्वाधस्तिर्यग्भागव्यतिक्रमाः ।
अज्ञानतः प्रमादाद्वा क्षेत्रवृद्धिश्च तन्मलाः ॥ ५ ॥

टीका-भवन्ति । के ते, तन्मलाः दिग्व्रतातिचाराः । कति, पञ्च । कथं, सीमविस्मृतिरूर्ध्वभागव्यतिक्रमोऽधोभागव्यतिक्रमस्तिर्यग्भागव्यतिक्रमः क्षेत्रवृद्धिश्चेति । कस्मात्, अज्ञानतः प्रमादाद्वेति संक्षेपः । इतो विस्तरः—तत्र सीमविस्मृतिः-नियमितमर्यादाया अज्ञानतो मत्यपाटवसन्देहादिना प्रमादाद्वाऽतिव्याकुलत्वान्यमनस्कत्वादिना स्मृतिभ्रंशः । तथाहि—केनचित्पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीत् । गमनकाले च स्पष्टतया न स्मरति किं शतपरिमाणं कृतमुत पञ्चाशत् तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः शतमतिक्रामतो भङ्गः सापेक्षत्वनिरपेक्षत्वाच्चेति प्रथमोऽतिचारः । ऊर्ध्वेत्यादि ऊर्ध्वं गिरितरुशिखरादेः, अधो ग्रामभूमिगृहकूपादेः, तिर्यक्पूर्वादिदिक्षु येऽमी भागा नियमितप्रदेशास्तेषां व्यतिक्रमा लङ्घनानि । एते च त्रयोऽनाभोगातिक्रमादिभिरेवातिचारा भवन्ति । अन्यथा प्रवृत्तौ तु भङ्ग एव । क्षेत्रवृद्धिः—क्षेत्रस्य पूर्वादिदेशस्य दिग्विरतिविषयस्य ह्रस्वस्य सतो वृद्धिः पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं । तथाहि—केनचित्पूर्वापरदिशोः प्रत्येकं योजनशतं परिमाणीकृत्यैकत्र क्षेत्रं गमनकाले वर्द्धयतो व्रतसापेक्षत्वादतिचारः । यदि चाप्रणिधानात् क्षेत्रपरिमाणमतिक्रान्तं भवति तदा निवर्तितव्यं ज्ञाते वा न गन्तव्यमन्योऽपि न विसर्जनीयः । अथाज्ञतया कोऽपि गतः स्यात्तदा यत्तेन लब्धं तत्त्याज्यमिति पञ्चमः ॥ ५ ॥

अथानर्थदण्डव्रतं लक्षयति—

पीडा पापोपदेशाद्यैर्देहाद्यर्थाद्विनाङ्गिनाम् ।
अनर्थदण्डस्तत्त्यागोऽनर्थदण्डव्रतं मतम् ॥ ६ ॥

टीका—मतं सम्मतं सूरीणां। किं तत्, अनर्थदण्डव्रतं। किं तत्, तत्त्यागस्तस्यानर्थदण्डस्य वर्जनं। य. किं, योऽनर्थदण्डः। किं, पीडा पीडनं। केषां, अङ्गिनां त्रसस्थावरजीवानां। कैः, पापोपदेशाद्यैः पापोपदेशहिंसादानदुःश्रुत्यपध्यानप्रमादचर्याख्यैर्व्यापारैः। कथं, विना। कस्मात्, देहाद्यर्थात् स्वस्य स्वकीयजनानां वा शरीरवाङ्मनःप्रयोजनात् ॥ ६ ॥

पापोपदेशस्वरूपं तद्विरतिं चाह—

पापोपदेशो यद्वाक्यं हिंसाकृष्यादिसंश्रयम्।
तज्जीविभ्यो न तं दद्यान्नापि गोष्ठ्यां प्रसञ्जयेत् ॥ ७ ॥

टीका—भवति। कोऽसौ, स पापोपदेशः। यत्किं, यद्वाक्यं। किंविशिष्टं, हिंसाकृष्यादिसंश्रयं। हिंसा मृषावादादिभिः कृषिवाणिज्यादिभिश्च संश्रयः सम्बन्धो यस्य तत्तथोक्तं तद्विषयमित्यर्थः। हिंसाद्यारम्भेति पाठे तु हिंसादिप्रधाना आरम्भा उपक्रमा इति व्याख्येयं। न दद्यात मृगास्तोयाशयमायाताः किमुपविष्टास्तिष्ठन्तेत्यादिरूपेण न सम्पादयेत्। कोऽसौ, अनर्थदण्डव्रतार्थी। कं, तं पापोपदेशं। केभ्यः, तज्जीविभ्यः व्याधवञ्चकचोरादिभ्यः कृषीवलकिरातादिभ्यश्च। नापि प्रसञ्जयेत् पुनः पुनः प्रवर्तयेत् कथान्तरसम्बन्धे वा नावतारयेत्। कं, तं। कस्यां, गोष्ठ्यां सङ्कथायाम् ॥ ७ ॥

हिंसोपकरणदानपरिहारमाह—

हिंसादानं विषास्त्रादिहिंसाङ्गस्पर्शनं त्यजेत्।
पाकाद्यर्थं च नाग्न्यादि दाक्षिण्याविषयेऽर्पयेत् ॥ ८ ॥

टीका त्यजेन्न कुर्यादनर्थदण्डव्रतार्थी। किं तत्, हिंसोपकरणानां दानं हिंसादानं। मयूरव्यंसकत्वात्समासः। तदेव व्याचष्ट विषास्त्रेत्यादिना विषास्त्रादीनां गरलप्रहरणहलशकटकुशिकुद्दालादीनां हिंसांगानां प्राणिवधसाधनानां स्पर्शनं दानं विषास्त्रादिहिंसाङ्गस्पर्शनं। न चार्पयेत् नापि ढौकयेदसौ।

किं तत्, अग्न्यादि वन्हिघरट्टमुसलोलूखलादि। किमर्थं, पाकाद्यर्थं पचनपेषणकुट्टनादिनिमित्तं। क्व, दाक्षिण्याविषये परम्परव्यवहारविषयादन्यत्र ॥८॥

दुःश्रुत्यपध्यानयोः स्वरूपं परिहारं चाह—

चित्तकालुष्यकृत्कामहिंसाद्यर्थश्रुतश्रुतिम् ।
न दुःश्रुतिमपध्यानं नार्तरौद्रात्म चान्वियात् ॥ ९ ॥

टीका—नान्वियात् नानुवर्तयेत् प्रसङ्गवशादायातमपि तत्क्षणान्निवर्तयेदित्यर्थः। कोऽसौ, अनर्थदण्डव्रतार्थी। कां, दुःश्रुतिं। कीदृशीं, चित्तेत्यादि। कामश्च मन्मथो हिंसा च प्राणातिपातः कामहिंसे ते आदी येषां आरम्भादीनां ते कामहिंसादयोऽर्था अभिधेया येषां तानि कामहिंसाद्यर्थानि तानि श्रुतानि शास्त्राणि। तत्र कामशास्त्रं वात्स्यायनादि। हिंसाशास्त्रं लटकादिमतं। आरम्भपरिग्रहशास्त्रं वार्तानीतिः। साहसशास्त्रं वीरकथा। मिथ्यात्वशास्त्रं ब्रह्माद्वैतादि मतं। मदशास्त्रं वर्णानां ब्राह्मणो गुरुरित्यादिग्रन्थः। रागशास्त्रं वशीकरणादितन्त्रं। तेषां श्रुतिराकर्णनं उपलक्षणादर्जनाद्यपि। चित्तस्य मनसः कालुष्यं रागद्वेषाद्यावेशश्चित्तकालुष्यं तत्करोतीति चित्तकालुष्यकृत्। सा चासौ कामहिंसाद्यर्थश्रुतश्रुतिश्च ताम्। न चान्वियादसौ। किं तत्, अपध्यानं अपकृष्टं ध्यानमेकाग्रचिंतानिरोधं। किंरूपं, आर्तरौद्रात्म आर्तं ऋते दुःखे भवं। यदि वा अर्तिः पीडा यातना च तत्र भवं। रौद्रं रोधयति अपरानिति रुद्रो दुःखहेतुस्तेन कृतं तस्य वा कर्म। आर्तं च रौद्रं च आर्तरौद्रे ते आत्मानौ स्वभावौ यस्य तदार्तरौद्रात्म आर्तरौद्रविकल्पमित्यर्थः। न दुःश्रुतिमपध्यानमार्तरौद्रात्म चान्वियादिति पाठे तु—दुःश्रुतिं कामादिशास्त्रश्रवणलक्षणां, अपध्यानं च नरेन्द्रत्वखचरत्वाप्सरोविद्याधरीपरिभोगादिविषयं, आर्तं वैरिघाताभिघातादिविषयं, रौद्रं वा नान्वियादिति व्याख्येयम् ॥ ९ ॥

प्रमादचर्यालक्षणं तत्त्यागं च श्लोकद्वयेनाह—

प्रमादचर्यां विफलं क्ष्मानिलाग्न्यम्बुभूरुहाम् ।
खातव्याघातविध्यापसेकच्छेदादि नाचरेत् ॥ १० ॥

टीका—नाचरेत् न कुर्यादनर्थदण्डविरतः । कां, प्रमादचर्यां । किंरूपां, विफलमित्यादि । विफलं निष्प्रयोजनं क्ष्मादीनां खातादि विफलं भूखननादिलक्षणमित्यर्थः । तत्र क्ष्माया भूमेः खातं खननं विफलं नाचरेत् । अनिलस्य वातस्य व्याघातं स्वयमागच्छतः कवाटादिना प्रतिबन्ध विफलं नाचरेत् । अग्नेर्विध्यापं जलादिना विध्यापनं विफलं नाचरेत् । अम्बुनो जलस्य सेकं सेचनं भूम्यादौ प्रक्षेपं विफलं नाचरेत् । भूरुहां वनस्पतीनां छेदादि छेदनपत्रपुष्पफलत्रोटनादि विफलं नाचरेत् ॥ १० ॥

तद्वच्च न सरेद्व्यर्थं न परं सारयेन्महीम् ।
जीवघ्नजीवान् स्वीकुर्यान्मार्जारशुनकादिकान् ॥ ११ ॥

टीका—न सरेत्करचरणादव्यापारं न कुर्यात् । किंविशिष्टं, व्यर्थं निष्प्रयोजनं । किंवत्, तद्वच्च क्ष्माखननादिवदेवं तथा न सारयेत् करचरणादिव्यापारं न कारयेत् । कं, परं भृत्यादिकं । कथं, व्यर्थं वृथा । न स्वीकुर्यात् न परिगृह्णीयात् । कान्, जीवघ्नजीवान् प्राणिघातकप्राणिनः । किंविशिष्टान्, मार्जारशुनकादिकान् बिडालमण्डलनकुलकुक्कुटप्रभृतीन् । कथं, नियमेन फलवतोऽपि नात्मसात्कुर्यादित्यर्थः ॥ ११ ॥

अनर्थदंडव्रतातिचारपरिहारमाह—

मुञ्चेत्कन्दर्पकौत्कुच्यमौखर्याणि तदत्ययान् ।
असमीक्ष्याधिकरणं सेव्यार्थाधिकतामपि ॥ १२ ॥

टीका—मुञ्चेद्वर्जयेदनर्थदण्डविरतः । कान्, तदत्ययान् तद्व्रतातिचारान् किंविशिष्टान्, कन्दर्पादीन् पञ्च । तत्र कन्दर्पः कामस्तद्धेतुस्तत्प्रधानो वाक्प्रयोगोऽपि कन्दर्पो रागोद्रेकात्प्रहासमिश्रोऽशिष्टवाक्प्रयोग इत्यर्थः । कौत्कुच्यं कुदिति कुत्सायां निपातो निपातानामानन्त्यात् । कुतः, कुत्सितं कुचति भ्रून-

यनौष्ठनासाकरचरणमुखविकारैः संकुचतीति कुत्कुचः सङ्कोचादिक्रियाभाक् तद्भावः कौत्कुच्यं । प्रहासो भण्डिमवचनं च भण्डिमोपेतकायव्यापारप्रयुक्तमित्यर्थः । एष पूर्वश्च द्वावपि प्रमादचर्याविरतेरतिचारौ । मौखर्यं मुखमस्यास्तीति मुखरोऽनालोचितभाषी वाचाटस्तस्य भावो धाष्टर्यप्रायमसत्यासंबद्धबहुप्रलापित्वं । अयं च पापोपदेशविरतेरतीचारो मौखर्ये सति पापोपदेशसम्भवादिति तृतीयः । असमीक्ष्याधिकरणं प्रयोजनमनालोच्य कार्यस्याधिक्येन करणं । यथा बहुमपि कटमानयत, यावता मे प्रयोजनं तावदहं क्रेष्यामि शेषमन्ये बहवोऽर्थिनः सन्ति तेऽपि क्रेष्यन्ति अहं विक्राययिष्यामीत्येवमनालोच्य बह्वारम्भतृणाजीविभिः कारयति । एवं काष्ठच्छेदइष्टकापाकादिष्वपि वाच्यं । तथा हि स्वोपकरणं हिंसोपकरणान्तरेण संयुक्तं धारयति यथा संयुक्तमुलूखलेन मुसलं हलेन फालं शकटेन युगं धनुषा शरान् इत्यादि । तथा सति यः कश्चित् संयुक्तमुलूखलमुसलादिकमाददीत । वियुक्ते तु तस्मिन् सुखेन परः प्रतिषेद्धुं शक्यते । एतद्धिंसोपकारिदानविरतेरतीचारः । सेव्यार्थाधिकतां सेव्यस्य भोगोपभोगलक्षणस्य जनको यावानर्थस्ततोऽधिकस्य तस्य करणं भोगोपभोगानर्थक्यमित्यर्थः । अत्रायं सम्प्रदायः यदि बहूनि स्नानसाधनानि तैलखल्यामलकादीनि गृह्णाति तदा लौल्येन बहवः स्नानार्थं तडागादौ गच्छन्ति । ततश्च वायुकायाप्कायिकादिवधोऽधिकः स्यात् । न चैवं युज्यते ततो गृह एव स्नातव्यं । तदसम्भवे तु तलादिभिर्गृह एव शिरो घर्षयित्वा तानि सर्वाणि सारयित्वा तडागादितटे निविष्टो गालितजलेनाञ्जलिभिः स्नायात् । तथा येषु पुष्पादिषु संसक्तिः सम्भवति तानि परिहरेदिति सर्वत्र वक्तव्यमिति षष्ठोऽपि प्रमादविरतेरतीचारः ॥ १२ ॥

अथ भोगोपभोगपरिमाणाख्यं तृतीयगुणव्रतस्वीकरणविधिमाह—

भोगोऽयमियान् सेव्यः समयमियन्तं मयोपभोगोऽपि ।
इति परिमायानिच्छस्तावधिकौ तत्प्रमाव्रतं श्रयतु ॥ १३ ॥

टीका–श्रयतु स्वीकरोतु । कोऽसौ, गुणव्रती । किं तत्, तत्प्रमाव्रतं तयो-र्भोगोपभोगयोः प्रमा परिमाणं तत्प्रमा तत्प्रमैव व्रतं तत्र वा व्रतं तत्प्रमाव्रतं भोगोपभोगपरिमाणव्रतमित्यर्थः । किं कुर्वन्, अ नेच्छन् अनाकांक्षन् । कौ, तौ भोगोपभोगौ । किंविशिष्टौ, अधिकौ सेव्यासेव्यतया प्रतिज्ञाताभ्यामतिरिक्तौ । किं कृत्वा, परिमाय परिमितीकृत्य । कथं, इति, किमिति, भोग इत्यादि । अत्रैकं प्रतिषेधमुखेन वाक्यमन्यच्च विधिमुखेन, तत्राद्यं भोगोऽयं समयमियन्तं न सेव्य इति । द्वितीयं भोगोऽयमियान्वा समयमियन्तं सेव्य इति । तत्राद्य व्याख्यायते– न सेव्यो नोपयोक्तव्यः । कोऽसावयं भोग्यतया प्रसिद्धो भोगो माल्यताम्बूलादिः । केन, मया । कं, समयं कालं । कियन्तम्, इयन्तं एतावन्मात्रं यावज्जीवं दिवसमासादिपरिच्छिन्नं वा कालमित्यर्थः । द्वितीय-व्याख्या त्वियं । वा अथवा । सेव्यः । कोऽसौ, अयं भोगः । केन, मया । कियान्, इयान् एतावान् । कं, समयं । किंविशिष्टं, इयन्तं । तथा उपभोगोऽयं समय-मियन्तं न सेव्यो मयेत्येकं उपभोगोऽयमियान्वा समयमियन्तं मया सेव्य इति द्वितीयं । एतयोरपि पूर्ववद्व्याख्या ॥ १३ ॥

भोगोपभोगयोर्लक्षणं तत्त्यागस्य च यावज्जीविकस्य नियतकालस्य च संज्ञाविशेषावाचष्टे––

भोगः सेव्यः सकृदुपभोगस्तु पुनःपुनः स्रगम्बरवत् ।
तत्परिहारः परिमितकालो नियमो यमश्च कालान्तः ॥ १४ ॥

टीका––स भोगो भण्यते । यः सकृदेकवारं सेव्यः सेव्यते भुक्त्वा पुनर्न भुज्यते इत्यर्थः । किंवत्, स्रग्वत् उपलक्षणान्माल्यचन्दनताम्बूलादिर्यथा । स उपभोगो भण्यते । तुर्विशेषे । यः पुनः पुनः सेव्यो भूयोभूयः सेव्यते सेवित्वाऽपि पुनः सेव्यते इत्यर्थः । किंवत्, अम्बरवत् अत्राप्युपलक्षणाद्व-स्त्राभरणकामिन्यादिर्यथा । अथवा स्रगम्बरवच्चेति भोगोपभोगलक्षणयोर्यथा-संख्यमुदाहरणे उदाहरणस्य दिङ्मात्रप्रदर्शकत्वात् । एवं तयोर्लक्षणमुक्त्वा

तत्त्यागविशेषयोः संज्ञाविशेषप्रकाशनार्थमाह तदित्यादि । व्यपदिश्यते । कोऽसौ, तत्परिहारः । किं, नियमः । नियम इति संज्ञया व्यवह्रियते इत्यर्थः । किंविशिष्टः, परिमितकालः एकद्वित्र्यादिसंख्यापरिच्छिन्नदिवसमासादिसमयः। तथा व्यपदिश्यते । कोऽसौ, तत्परिहारः । किं, यमः । यम इति नाम्ना व्यवह्रियत इत्यर्थः । किंविशिष्टः, कालान्तः कालो मरणमन्तोऽवसानं यस्य स कालान्तो मरणपर्यन्त इत्यर्थः ॥ १४ ॥

त्रसघातबहुवधप्रमादविषयानिष्टानुपसेव्यार्थत्यागव्रतपञ्चकमप्यत्रैवान्तर्भावयितुमाह—

पलमधुमद्यवदखिलस्त्रसबहुघातप्रमादविषयोऽर्थः ।
त्याज्योऽन्यथाऽप्यनिष्टोऽनुपसेव्यश्च व्रताद्धि फलमिष्टम् १५

टीका—त्याज्यः प्रत्याख्यातव्यः । कोऽसौ, अर्थ इन्द्रियोपभोग्यो रसश्च। केन, भोगोपभोगपरिसंख्यानव्रतिना । किंविशिष्टः । त्रसेत्यादि—त्रसा द्वीन्द्रियादिजीवाः बहवः प्रचुरास्त्रसस्थावरजीवाः त्रसाश्च बहवश्च त्रसबहवस्तेषां घातौ त्रसबहुघातौ त्रसघातो बहुघातश्चेत्यर्थः । प्रमादो धर्मभ्रंशनोपायः । त्रसबहुघातौ च प्रमादश्च त्रसबहुघातप्रमादाः ते विषया यस्य स त्रसबहुघातप्रमादविषयः । किंविशिष्टः, अखिलः सर्वः । किंवत्, पलमधुमद्यवत् । यथा त्रसघाताश्रयत्वात्पिशितं त्यज्यते, यथा च बहुवधाश्रयत्वान्माक्षिकं त्यज्यते, यथा च प्रमादाश्रयत्वान्मद्यं त्यज्यते तथा यथासंख्यं त्रसघाताद्याश्रयोऽर्थस्त्याज्य इत्यर्थः । तत्र त्रसघातविषयोऽन्तःसुषिरप्रायं नालीनलपलक्यामृणालनालप्रमुखमागन्तुजन्तूनां सम्मूर्च्छिमजन्तूनां च योग्यमध्यावकाशं तथा बहुजन्तुयोग्यस्थानं केतकीनिम्बार्जुनारणिशिग्रुपुष्पमधूकबिल्वादिफलादि च वस्तु । बहुघातविषयो गुडूचीमूलकलशुनार्द्रशृङ्गबेरादिकं । प्रमादविषयो दूषिविषभाङ्गिकाधत्तूरकादि वस्तु । एतेन धनार्थं क्रूरव्यापाराणामपि त्याज्यत्वमुक्तं प्रतिपत्तव्यं । तथा त्याज्यो धर्मार्थिना । कोऽसौ, अखिलोऽर्थः । किंविशिष्टः, अनिष्टः । कथं, अन्यथाऽपि त्रसघाताद्य-

विषयोऽप्यर्थो योऽनिष्टो यदा स्वस्याप्यनभिमतः प्रकृतिसात्मको न भवति सोऽपि तदा प्रत्याख्येय इत्यर्थः । तथा त्याज्यः । कोऽसौ, अखिलोऽर्थः । किंविशिष्टः, अनुपसेव्यः इष्टोऽपि शिष्टानां शीलनायोग्यः चित्रवस्त्रविकृतवेषाभरणादिरुद्गारलालामूत्रपुरीषश्लेष्मादिश्च । एतत्प्रत्याख्यानस्याप्यभिमतार्थहेतुत्वमुखेन करणीयत्वं समर्थयते व्रताद्धि फलमिष्टमिति- हि यस्माद्भवति । किं तत्, फलं साध्यं । किंविशिष्टं, इष्टमभिप्रेतमभ्युदयादिकं । कस्मात्, व्रतात् योग्याद्विषयादभिसन्धिकृताया विरतेः ॥ १५ ॥

उक्तमेवार्थं संव्यवहारप्रसिद्ध्यर्थं श्लोकत्रयेण दर्शयति—

नालीसूरणकालिन्दद्रोणपुष्पादि वर्जयेत् ।
आजन्म तद्भुजां ह्यल्पं फलं घातश्च भूयसाम् ॥ १६ ॥

टीका- वर्जयेत् धर्मार्थी त्यजेत् । किं तत्, नालीत्यादि-आदिशब्देन मूलकार्द्रकनिम्बकुसुमकेतकादि । कथं, आजन्म यावज्जीवं । कुत इत्याह—हि यस्माद् भवति । किं तत्, फलं जिव्हेन्द्रियप्रीणनमात्रं । किंविशिष्टं, अल्पं स्तोकं भक्ष्यमाणक्षणमात्रभावि । केषां, तद्भुजां नालीसूरणादिभक्षकाणां । भवति च । कोऽसौ, घातः तद्भक्षणे वधः । केषां, भूयसां बहुतराणां तदाश्रितजीवानाम् ॥ १६ ॥

उक्तमेवार्थं व्रतदार्ढ्यार्थं पुनर्विशेषतोऽभिव्यक्ते—

अनन्तकायाः सर्वेऽपि सदा हेया दयापरैः ।
यदेकमपि तं हन्तुं प्रवृत्तो हन्त्यनन्तकान् ॥ १७ ॥

टीका—हेयाः प्रत्याख्येयाः । सदा नित्यं । के, अनन्तकायाः । कति, सर्वेऽपि । कैः, दयापरैः अनुकम्पाप्रधानैः श्रावकैः । कुत इत्याह—यद्यस्मात् । हन्ति हिनस्ति । कोऽसौ, पुरुषः । कान्, अनन्तकान् अनन्तप्रमितान् जीवान् कशब्देनात्र जीवार्थस्य विवक्षितत्वादनन्ताश्च ते काश्च जीवाश्चेति विग्रहः । किंविशिष्टः, प्रवृत्तः । किं कर्तुं, हन्तुं भक्षणादिद्वारेण मारयितुं । कं, तमनन्तकायं । किंविशिष्टं, एकं व्यवहारेणैकसंख्यमपि किं पुनर्द्व्यादीन् । एतेनानन्तैर्जीवैरुपलक्षितः

कायो येषां तेऽनन्तकाया मूलादिप्रभवा वनस्पतिकायिकाः। तथा हि मूलजा आर्द्रकहरिद्राप्रभृतयः। अग्रजा आर्यकोदिश्च (?) प्रभृतयः। पर्वजा देवनालेक्षुवेत्रादयः। कन्दजाः पलाण्डुसूरणादयः। स्कन्धजाः सल्लकीकण्टकपलाशादयः। बीजजाः शालिगोधूमादयः। संमूर्च्छिमाः। नियतबीजाभावे स्वयोग्यपुद्गलैर्निष्पन्नशरीराः। उक्तं च—मूलग्गपोरबीजा कंदा तह खंदबीजबीजरुहा। संमुच्छिमा य भणिया पत्तेया णंतकाया य॥ १७॥

आमगोरससंपृक्तं द्विदलं प्रायशोऽनवम्।
वर्षास्वदलितं चात्र पत्रशाकं च नाहरेत्॥ १८॥

टीका—न हरेत् न भक्षयेद्भोगपरः। किं तत्, द्विदलं मुद्गमाषादिधान्यं। किंविशिष्टं, आमेत्यादि—आमेनाग्निना पक्वेन गोरसेन क्षीरेण दध्ना अक्वथितक्षीरादिसम्भूतेन तक्रेण च सम्पृक्तं मीलितं। तद्धि सूक्ष्मबहुलजन्त्वाश्रितमागमे श्रूयते। तथा नाहरेत्। किं तत्, द्विदलं। किंविशिष्टं, अनवं पुराणं। कथं, प्रायशः प्रायोग्रहणात्पुराणस्यापि चिरकालकृष्णीभूतकुलित्थादेरदृष्टजन्तुसम्मूर्छनस्याप्रतिषेधः। तथा नाहरेत्। किं तत्, द्विदलं। किंविशिष्टं, अदलितमकृतद्विधाभावं। कदा, वर्षासु प्रावृषि हि मुद्गादीनामन्तः प्ररोहस्यायुर्वेदे प्रासद्धत्वात् त्रससम्मूर्च्छनस्य च दृष्टत्वेन सम्भाव्यमानत्वादभोज्यत्वं। एतेन रूढानामपि तेषां निषेध उक्तः स्यात्। तथा नाहरेत्। किं तत्, पत्रशाकं पत्ररूपं हरीतकं न तु फलादिरूपं। तत्र तत्परजन्तुभूयिष्ठत्वात्। कदा, वर्षासु तदा त्रसस्थावरसंसक्तिबहुलत्वात्पत्रशाकस्याल्पफलत्वाच्च॥ १८॥

एतद्व्रतस्य विशेषाद्दानृशंस्यसिद्ध्यङ्गत्वमुपदिशति—

भोगोपभोगकृशनात्कृशीकृतधनस्पृहः।
धनाय कोट्टपालादिक्रियाः क्रूराः करोति कः॥ १९॥

टीका—कः करोति न कोऽपि विदधातीत्यर्थः। किंविशिष्टः, कृशीकृतधनस्पृहः स्वल्पीकृतद्रविणाभिलाषः। कस्मात्, भोगोपभोगकृशनाद् भोगोपभोगयोर्विवेकबलेनाल्पीकरणात्। काः कोट्टपालादिक्रियाः तलारवनिपाल-

वीतपालशौल्किकादिव्यापारान्। किंविशिष्टाः, क्रूराः प्राणिघातककर्कशाः । किमर्थं, धनाय द्रव्यार्थम् ॥ १९ ॥

भोगोपभोगव्रतातिचारपञ्चकं लक्षयति—

सचित्तं तेन सम्बद्धं सम्मिश्रं तेन भोजनम् ।
दुष्पक्वमप्यभिषवं भुञ्जानोऽत्येति तद्व्रतम् ॥ २० ॥

टीका—अत्येति अतिचरति श्रावकः । किं तत्, तद्व्रतं भोगोपभोगपरिमाणव्रतं । किं कुर्वाणो, भुञ्जानोऽभ्यवहरन् । किं तत्, भोजनं भुज्यत इति भोजनमाहारो भोज्यद्रव्यं । किं किं, सचित्तं तेन सम्बद्धं सम्मिश्रं तेन सचित्तेन सम्मिश्रं सम्बद्धं दुष्पक्वमभिषवं च । अपिश्चार्थे । तत्र सचित्तं चेतनावद्द्रव्यं हरितकायं। अपक्वं कर्कट्यादि । त्रसबहुघातेत्यादिना निषिद्धेऽप्यत्र प्रवृत्तौ भङ्गसद्भावेऽप्यतिचाराभिधानं व्रतसापेक्षस्याप्रणिधानातिक्रमादिना प्रवृत्तौ द्रष्टव्यमिति प्रथमः ॥ १ ॥

तेन सम्बद्धं सचित्तेनोपश्लिष्टं सचेतनवृक्षादिना संबद्धं गोन्दादिकं पक्वफलादिकं वा सचित्तान्तर्बीजं खर्जूरमाद्यादि च तद्भक्षणं हि सचित्तभोजनवर्जकस्य प्रमादादिना सावद्याहारप्रवृत्तिरूपत्वादतिचारः । अथवा बीजं त्यक्ष्यामि तस्यैव सचेतनत्वात् कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धाहारोऽसौ द्वितीयः ॥ २ ॥

सम्मिश्रं तेन सचित्तेन व्यतिकीर्णं विभक्तुमशक्यं सूक्ष्मजन्तुकमित्यर्थः । अथवा सचित्तशबलं तत्संमिश्रं यथा आर्द्रकदाडिमबीजचिर्भटादिमिश्रं पूरणादिकं तिलमिश्रं च यवधानादिकं अयमपि पूर्ववदतिचारस्तृतीयः ॥ ३ ॥

दुष्पक्वं सान्तस्तण्डुलभावेन अतिक्लेदनेन वा दुष्टं पक्वं मन्दपक्वं वा दुष्पक्वं, तच्चार्धस्विन्नं पृथुकतण्डुलयवगोधूमस्थूलमण्डकफलादिकमामदोषावहत्वेनैहिकप्रत्यवायकारणं । तथा यावतांशेन तत्सचेतनं तावता तत्परलोकमप्यपहन्ति । पृथुकादेर्दुष्पक्वतया किञ्चित्सचेतनावयवत्वात्पक्वत्वाच्च चेतना-

चेतनमिति भुञ्जानस्यातिचारश्चतुर्थः ॥ ४ ॥

अभिषवं सौवीरादिद्रवं वा वृष्यं वा । अयमप्यतिक्रमादिनाऽतिचारः पञ्चमः ॥ ५ ॥

चारित्रसारे पुनः सचित्ताद्याहाराणामतिचारत्वोपपादनार्थमिदमुक्तं एतेषामभ्यवहरणे सचित्तोपयोग इन्द्रियमदवृद्धिर्वातादिप्रकोपो वा स्यात् । तत्प्रतीकारविधाने पापलेपो भवति । अतिथयश्चैनं परिहरेयुरिति ॥

अत्राह स्वामी यथा—विषयविषतोऽनुपेक्षाऽनुस्मृतिरतिलौल्यमतितृषानुभवौ ॥ भोगोपभोगपरिमा व्यतिक्रमाः पञ्च कथ्यन्ते ॥ १ ॥ विषयविषतो विषकल्पेषु विषयेषु अनुपेक्षा आदरो विषयानुभवात्तद्वेदनाप्रतीकारे जातेऽपि पुनरभीष्टाङ्गनासम्भाषणालिङ्गनाद्यवर्जनरूपः प्रथमः । अनुस्मृतिस्तु तदनुभवात्तत्प्रतीकारे जातेऽपि पुनः पुनर्विषयाणां सौन्दर्यसुखसाधनत्वाद्यनुचिन्तनमत्यासक्तिहेतुत्वादतिचारः । अतिलौल्यं अतिगृद्धिस्तत्परिहारे जातेऽपि पुनः पुनस्तदनुभवाकांक्षेत्यर्थः । अतितृषा कामिनीभोगादेरतिगृद्ध्या प्राप्त्याकांक्षा । अत्यनुभवो नियतकालेऽपि यदा भोगोपभोगावनुभवति तदा अत्यासक्त्याऽनुभवति, न पुनर्वेदनाप्रतीकतयाऽतोऽतिचार इति ॥ एतेऽपि चात्र ग्रन्थे परेऽप्यूह्यास्तदत्यया इति वचनात्संगृहीता एव ॥

तद्वच्चेमेऽपि श्रीसोमदेवबुधाभिमताः—दुष्पक्वस्य निषिद्धस्य जन्तुसम्बन्धमिश्रयोः ॥ अवीक्षितस्य च प्राशस्तत्संख्याक्षतिकारणम् ॥ १ ॥ अत्राह सिताम्बराचार्यः—भोगोपभोगसाधनं यद्द्रव्यं तदुपार्जनाय यत्कर्म व्यापारस्तदपि भोगोपभोगशब्देनोच्यते कारणे कार्योपचारात् । ततः कोट्टपालनादिखरकर्मापि त्याज्यं । तत्र खरकर्मत्यागलक्षणे भोगोपभोगव्रते अङ्गारजीविकादीन् पञ्चदशातिचारांस्त्यजेदिति । तदचारु । लोके सावद्यकर्मणां परिगणनस्य कर्तुमशक्यत्वात् । अथोच्यते अतिमन्दमतिप्रतिपत्त्यर्थं तदुच्यते तर्हि तान् प्रतीदमप्यस्तु । मन्दमतीन् प्रति पुनस्त्रसबहुघातविषयार्थत्यागोपदेशेनैव तत्परिहारस्य प्रदर्शितत्वादिति ॥ २० ॥

एतदेव श्लोकत्रयेण संगृह्णन्नाह—

व्रतयेत्खरकर्मात्र मलान् पञ्चदश त्यजेत् ।
वृत्तिं वनाग्न्यनःस्फोटभाटकैर्यन्त्रपीडनम् ॥ २१ ॥
निर्लाञ्छनासतीपोषौ सरःशोषं दवप्रदाम् ।
विषलाक्षादन्तकेशरसवाणिज्यमङ्गिरुक् ॥ २२ ॥
इति केचिन्न तच्चारु लोके सावद्यकर्मणाम् ।
अगण्यत्वात्प्रणेयं वा तदप्यतिजडान् प्रति ॥ २३ ॥

टीका—व्रतयेत् प्रत्याख्यायाच्छ्रावकः। किं तत्, खरकर्म खरं क्रूरं प्राणिबाधकं कर्म व्यापारं। तथा त्यजेत् तद्व्रती। कान्, मलान् कर्मादानसञ्ज्ञान्। कति, पञ्चदश वृत्तिमित्यादिना निर्दिष्टान्। क, अत्र खरकर्मव्रते। अत्र तावत् वृत्तिं जीविकां त्यजेत्। कैः, वनाग्न्यनःस्फोटभाटकैः वनं चाग्निश्च अनश्च स्फोटश्च भाटकं च तैः पञ्चभिः। तथा यन्त्रपीडनं त्यजेत्। तथा निर्लाञ्छनासतीपोषौ त्यजेत् निर्लाञ्छनं चासतीपोषश्चेति द्वन्द्वः। तथा सरःशोषं त्यजेत्। तथा दवप्रदां दवदानं त्यजेत्। तथा विषादिवाणिज्यपञ्चकं त्यजेत्। किंविशिष्टं, अङ्गिरुक् प्राणिबाधकं ॥

तत्र वनजीविका छिन्नस्याच्छिन्नस्य वा वनस्पतिसमूहादेर्विक्रयेण तथा गोधूमादिधान्यानां घरट्टशिलादिना पेषणेन दलनेन वा वर्तनम् ॥ १ ॥

अग्निजीविका अङ्गारजीविकाख्या षड्जीवनिकायविराधनाहेतुना अङ्गारकरणाद्यग्निकर्मणा जीवनं ॥ २ ॥

अनोजीविका शकटजीविका शकटरथतच्चक्रादीनां स्वयं परेण वा निष्पादनेन वाहनेन विक्रयणेन वृत्तिर्बहुभूतग्रामोपमर्दिका गवादीनां च बन्धादिहेतुः ॥ ३ ॥

स्फोटजीविका उडादिकर्मणा पृथिवीकायिकाद्युपमर्दहेतुना जीवनं ॥४॥

भाटकजीविका शकटादिभारवाहनमूल्येन जीवनं ॥ ५ ॥

यन्त्रपीडाकर्म तिलयन्त्रादिपीडनं तिलादिकं च दत्वा तैलादिप्रतिग्रहणं

तत्कर्मणश्च पीलनाय तिलादिक्षोदात्तद्गतत्रसघाताच्च दुष्टत्वं ॥ ६ ॥

निर्लाञ्छनं निर्लाञ्छनकर्म वृषभादेर्नासावेधादिना जीविका । निर्लाञ्छनं निनरां लाञ्छनमङ्गावयवच्छेदः ॥ ७ ॥

असतीपोषः प्राणिघ्नप्राणिपोषो भाटिग्रहणार्थं दासपोषश्च ॥ ८ ॥

सरःशोषो धान्यवपनाद्यर्थं जलाशयेभ्यो जलस्य सारण्या कर्षण । तत्र च जलस्य तद्गतानां त्रसानां तत्पालितानां च षण्णां जीवनिकायानां घात इति दूष्यत्वम् ॥ ९ ॥

वनदानं दावाग्नेस्तृणादिदहनार्थं वितरणं तच्च फलनिरपेक्षतात्पर्याद्वने-चरैर्वह्निज्वालनं व्यसनजमुच्यते । पुण्यबुद्धिजं तु यथा मदीये मरणकाले इयन्तो मम श्रेयोऽर्थं दीपोत्सवाः करणीया इति पुण्यबुद्ध्या क्रियमाणं । तृणदाहे सति नवतृणांकुरोद्भेदाद्गावश्चरन्तीति वा क्षेत्रे वा सम्यसम्पत्तिवृद्ध्येऽग्निज्वालनं अत्र जीवकोटीनां वधो व्यक्त एव । १० ॥

विषवाणिज्यं जीवघ्नवस्तुविक्रयः ॥ ११ ॥

लाक्षावाणिज्यं लाक्षाविक्रयणं । लाक्षायाः सूक्ष्मत्रसजन्तुघातानन्तकायिकप्रवालजालोपमर्दाविनाभाविना स्वयोनिवृक्षादुद्धरणेन टङ्कणमनःशिलासकूमालिप्रभृतीनां बाह्यजीवघातहेतुत्वेन गुग्गुलिकाया धातकीपुष्पत्वचश्च मद्यहेतुत्वेन तद्विक्रयस्य पापाश्रयत्वात् ॥ १२ ॥

दन्तवाणिज्यं हस्त्यादिदन्ताद्यवयवानां पुलिन्द्रादिषु द्रव्यदानेन तदुत्पत्तिस्थाने वाणिज्यार्थं ग्रहणं । ते हि तथा ग्रहणे तत्प्रतिक्रयार्थं हस्त्यादिवधं कुर्वन्ति अनाकारे तु दन्तादिक्रयविक्रये न दोषः ॥ १३ ॥

केशवाणिज्यं द्विपदादिविक्रयः । तत्र च दोषः तेषां पारवश्यवधबन्धादयः क्षुत्पिपासापीडा चेति ॥ १४ ॥

रसवाणिज्यं नवनीतादिविक्रयः । नवनीते हि जन्तुसंमूर्छनं । मधुवसामद्यादौ तु जन्तुघातोद्भवत्वं । मद्येन मदजनकत्वं तद्गतकृमिवघातश्चेति तद्विक्रयस्य दुष्टत्वं ॥ १५ ॥

इति केचित्–एवं सिताम्बराचार्या ब्रुवते । न तच्चारु तदसुन्दरं । कुतः, अगण्यत्वात् परिसंख्यातुमशक्यत्वात् । केषां, सावद्यकर्मणां सपापक्रियाणां । क, लोके व्यवहारार्थिजने वर्तमानानां । प्रणेयं वा प्रतिपाद्यं वा । किं तत, तदपि खरकर्मव्रतमपि । कथं, प्रति उद्दिश्य । कान, अतिजडान् अतिमुग्ध-बुद्धीन् । जड न् प्रति त्रसबहुघातेत्यादिनैवोक्तत्वादिति भावः ॥ इति गुण-व्रतप्रकरणम् ॥ २१।२२।२३ ॥

अथ शिक्षाव्रतविधानार्थमाह—

शिक्षाव्रतानि देशावकाशिकादीनि संश्रयेत् ।
श्रुतिचक्षुस्तानि शिक्षाप्रधानानि व्रतानि हि ॥ २४ ॥

टीका–संश्रयेत् प्रतिपद्येत श्रावकः । कानि, शिक्षाव्रतानि शिक्षा विद्योपादानं, शिक्षाप्रधानानि व्रतानि शिक्षाव्रतानि । किंविशिष्टानि, देशावकाशिकादीनि देशावकाशिकं, सामयिकं, प्रोषधोपवासं, अतिथिसंविभागं च । कथम्भूतो भूत्वा, श्रुतिचक्षुः श्रुतज्ञानलोचनः । कुत इत्याह–हि यस्मात् भवन्ति । कानि तानि व्रतानि । किंविशिष्टानि, शिक्षाप्रधानानि ॥२४॥

देशावकाशिकं निरुक्त्या लक्षयति—

दिग्व्रतपरिमितदेशविभागेऽवस्थानमस्ति मितसमयम् ॥
यत्र निराहुर्देशावकाशिकं तद्व्रतं तज्ज्ञाः ॥ २५ ॥

टीका–निराहुः प्रकृतिप्रत्ययादिविभागेन निश्चितं ब्रुवन्ति । के, तज्ज्ञाः तद्व्रतनिर्वचनविदः । किं, तद् व्रतं । किमाख्यं, देशावकाशिकं देशे दिग्व्रत-गृहीतपरिमाणस्य क्षेत्रस्य विभागे अवकाशोऽवस्थानं देशावकाशः, सोऽस्मिन्नस्तीति । यत्र यस्मिन् व्रते । अस्ति विद्यते । किं तदवस्थानमवस्थितिः श्रावकस्य । क, दिगित्यादि–दिग्व्रते परिमितः प्रतिज्ञपरिमाणो देशः क्षेत्रं दिग्व्रतपरिमितदेशस्तस्य विभागस्तत्काले स्वावस्थानविषयीकृतोंऽशस्तस्मिन् । किंविशिष्टमवस्थानं, मितसमयं परिमितकालं ॥ २५ ॥

तद्व्रतद्वयुक्तं लक्षयति—

स्थास्यामीदमिदं यावदियत्कालमिहास्पदे ॥
इति सङ्कल्प्य सन्तुष्टस्तिष्ठन्देशावकाशिकी ॥ २६ ॥

टीका–भवति । कोऽसौ, श्रावकः । किंविशिष्टो, देशावकाशिकी । किं कुर्वन्, तिष्ठन् लक्षणहेत्वोः क्रियाया इति शतृच् । कालपरिच्छित्त्या नियतदेशे सन्तुष्टतयाऽवस्थानेन देशावकाशिव्रतित्वपरिमाणस्य लक्ष्यमाणत्वात् । किं कृत्वा, सङ्कल्प्य मनसा संप्रधार्य । कथं, इति । किमिति, स्थास्यामि स्थितिं करिष्याम्यहं । क्व, इहास्मिन्नास्पदे स्थाने । कथं, इदमिदं यावत् गृहगिरिग्रामादिमवधिं कृत्वा । कियत्कालं, इयत्कालं घटिकादिप्रहरदिनादिमात्रं । किंविशिष्टः सन्, सन्तुष्टः सीमभ्यो बहिर्निगृहीततृष्णः सन् । दिग्व्रतवदस्यापि नियमितदेशाद्बहिर्लोभनिग्रहेण हिंसादीनां च सर्वशो निवर्तनेनात्र फलवत्त्वात् अमुत्राज्ञैश्वर्यसम्पादकत्वाच्च सुतरां करणीयत्वं चास्य शिक्षाव्रतत्वं शिक्षाप्रधानत्वात्परिमितकालभावित्वाच्चोच्यते । न खल्वेतद्दिग्व्रतवद्यावज्जीविकमपीष्यति । यत्तु तत्त्वार्थादौ गुणव्रतत्वमस्य श्रूयते तद्दिग्व्रतसंक्षेपणलक्षणत्वमात्रस्यैव विवक्षितत्वाल्लक्ष्यते । दिग्व्रतसंक्षेपकरणं चात्रागुणव्रतादिसंक्षेपकारणस्याप्युपलक्षणं द्रष्टव्यं । एषामपि संक्षेपस्यावश्यकर्तव्यत्वात् प्रतिव्रतं च संक्षेपकरणस्य भिन्नव्रतत्वे गुणाः स्युर्द्वादशेति संख्याविरोधः स्यात् ॥ २६ ॥

तद्व्रतातिचारत्यागार्थमाह—

पुद्गलक्षेपणं शब्दश्रावणं स्वाङ्गदर्शनम् ।
प्रैषं सीमबहिर्देशे ततश्चानयनं त्यजेत् ॥ २७ ॥

टीका–त्यजेत् तद्व्रतनैर्मल्यार्थी । किं, पुद्गलक्षेपणादिपञ्चकं । तत्र पुद्गलक्षेपणं परिगृहीतदेशाद्बहिः स्वयमगमनात्कार्यार्थितया व्यापारकारकाणां चोदनाय लोष्ठादिप्रेरणं ॥ १ ॥ शब्दश्रावणं शब्दस्याभ्युत्कशिकादेः श्रावणमाव्हानीयानां श्रोत्रेऽनुपातनं शब्दानुपातनं नामातिचारमित्यर्थः ॥ २ ॥ स्वाङ्गदर्शनं शब्दोच्चारणं विना आव्हानीयानां दृष्टौ स्वरूपस्यानुपातनं रूपानुपाताख्यमतिचारं । एतत् त्रयं मायावितयाऽतिचारत्वं याति ॥ ३ ॥ प्रैषं मर्यादीकृतदेशे

स्थित्वा ततो बहिः प्रेष्यं प्रत्येवं कुर्विति व्यापारणं । देशावकाशिकव्रतं हि मा भूद्गमनागमनादिव्यापारजनितः प्राण्युपमर्द इत्यभिप्रायेण गृह्यते । स तु स्वयंकृतोऽन्येन कारित इति न कश्चित्फलविशेषः। प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः । परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रेष्यप्रयोगं नाम चतुर्थमतिचारं त्यजेदिति सर्वत्र योज्यम् ।। ४ ।। ततश्चानयनं सीमबहिर्देशादिष्टवस्तुनः प्रेष्येण विवक्षितक्षेत्रे प्रापणं। चशब्देन सीमबहिर्देशे स्थितं प्रेष्यं प्रति इदं कुर्वित्याज्ञापनं वा । एतौ चाव्युत्पन्नबुद्धितया सहसाकारादिना वाऽतिचारौ स्तः । सर्वत्र च—सापेक्षस्य व्रते हि स्यादतिचारोंऽशभञ्जनम्—इत्युपजीवम् ।। २७ ।।

अप्ररूपितस्वरूपस्यानुष्ठानं न स्यादिति सामायिकस्वरूपं प्ररूपयति—

एकान्ते केशबन्धादिमोक्षं यावन्मुनेरिव ।
स्वं ध्यातुः सर्वहिंसादित्यागः सामायिकव्रतम् ।। २८ ।।

टीका—भवति । किं तत्, सामायिकव्रतं समस्य रागद्वेषविमुक्तस्य सतः अयो ज्ञानादीनां लाभः प्रशमसुखरूपः स समायः, समाय एव सामायः सामायः प्रयोजनमस्येति वा (?) सामायिकं रागद्वेषहेतुषु मध्यस्थतेत्यर्थः अथवा समय आप्तसेवोपदेशस्तत्र नियुक्तं कर्म सामायिकं व्यवहारेण जिनस्नपनार्चास्तुतिजपाः। निश्चयेन च स्वात्मध्यानमेव सामायिकं । सामायिकमेव व्रतं सामायिकव्रतं । किं, सर्वहिंसादित्यागः सर्वत्र सर्वेषां च हिंसादीनां प्रमत्तयोगभाविनां प्राणव्यपरोपणादिपञ्चपापानां त्यागः परिहारः सर्वत्रेति व्याख्यानाद्देशावकाशिकादस्य भेदः सूच्यते । कस्य, शिक्षाव्रतिनः । किंविशिष्टस्य, ध्यातुः साधुत्वेन[१] ताच्छील्येन वा ध्यायतः । कं, स्वमात्मानं अन्तर्मुहूर्तमात्रं धर्म्यध्याननिष्ठस्येत्यर्थः । कस्येव, मुनेरिव सर्वारम्भपरिग्रहाग्रह-

१ साधुत्वेनेत्यत्र साकल्येनेति पाठभेदः ।

रहितत्वाद्यतिना तुल्यस्य । क, एकान्ते विविक्तस्थाने । कियत्कालं, केशबन्धादिमोक्षं यावत् केशबन्ध आदिर्येषां मुष्टिबन्धवस्त्रग्रंथ्यादीनां गृहीतनियमकालावच्छेदहेतूनां ते केशबन्धादयः तेषां मोक्षो मोचनं तमवधीकृत्य स्थितस्येत्यर्थः । सामायिकं हि चिकीर्षुर्यावदयं केशबन्धो वस्त्रग्रन्थ्यादिर्वा मया न मोच्यते तावत्साम्यान्न प्रचलिष्यामीति प्रतिज्ञां करोति ॥ २८ ॥

सामायिकभावनासमयं नियमयन्नाह—

परं तदेव मुक्त्यङ्गमिति नित्यमतन्द्रितः ।
नक्तं दिनान्तेऽवश्यं तद्भावयेच्छक्तितोऽन्यदा ॥ २९ ॥

टीका—भावयेदभ्यस्येन्मुमुक्षुः । किं, तत्सामायिकव्रतं । क, नक्तंदिनान्ते नक्तं च दिनं च नक्तंदिने तयोरन्ते निशावसाने दिवसावसाने चेत्यर्थः । कथं, अवश्यं नियमेन । अथवा नास्ति वश्यं व्याध्यादिपारतन्त्र्यं यत्र भावनकर्मणि तदवश्यं यथा भवति । किंविशिष्टः सन्, अतन्द्रितः अनलसः । कथं, नित्यं सर्वकालं । कुतो हेतोः, इति यतो भवति । किं तत्, तदेव सामायिकमेव । किंविशिष्टं, मुक्त्यङ्गं मोक्षसाधनं । किंविशिष्टं, परमुत्कृष्टं । परमप्रकर्षप्राप्तचारित्रस्यैव साक्षान्मोक्षहेतुत्वसिद्धेः ॥ एवं तर्हि मध्याह्नादौ तन्न भावयितव्यमिति शङ्कायामिदमाह-शक्तितोऽन्यदेति भावयेन्मुमुक्षुस्तत् । कदाऽन्यदाऽन्यस्मिन्मध्याह्नादौ काले । कथं, शक्तितः स्वशक्तिमपेक्ष्य । नियतकालादन्यदाऽपि तद्भावने दोषाभावाद्गुणसद्भावाच्च ॥ २९ ॥

सामायिकस्थेन परीषहोपसर्गोपनिपाते सति तयोर्जयार्थं किं ध्यातव्यमित्याह—

मोक्ष आत्मा सुखं नित्यः शुभः शरणमन्यथा ।
भवोऽस्मिन्वसतो मेऽन्यत्किं स्यादित्यापदि स्मरेत् ॥ ३० ॥

टीका—स्मरेत् ध्यायेत । कोऽसौ, प्रतिपन्नसामायिकः । किं तत्, इति एतत् । कस्यां सत्यां, आपदि विनिपाते परीषहोपसर्गसंसर्गे इत्यर्थः । एतेन प्रतिपन्नसामायिकेन परीषहोपसर्गाः सोढव्या इत्याक्षिप्यते । किमेतदित्याह

भवति । कोऽसौ, मोक्षः । किं, आत्मा अनन्तज्ञानादिरूपत्वात्, तथा सुखं अनाकुलचिद्रूपत्वात्, तथा नित्यः अनन्तकालभाविप्रध्वंसाभावरूपत्वात्, तथा शुभः शुभकारणप्रभवत्वाच्छुभकार्यत्वाच्च, तथा शरणं समस्तविपदगम्यतया अपायपरिरक्षणोपायत्वात् । संसारः किंरूप इत्याह—अस्ति । कोऽसौ, भवः स्वोपात्तकर्मोदयवशाच्चतुर्गतिविवर्तपरिवर्तनं । कथं, अन्यथा मोक्षविपरीतलक्षणः अनात्मा दुःखमनित्योऽशरणमित्यर्थः । अस्मिंश्च भवे वसतोऽवतिष्ठमानस्य मम किमन्यत्सुखदुःखादि स्यादभूदस्ति भविष्यति च किन्त्वापात एव पुनःपुनर्भवेदित्यर्थः ॥ ३० ॥

सामायिकसिद्ध्यर्थमन्यत्र श्रावकेण किं कर्तव्यमित्याह—

स्नपनार्चास्तुतिजपान् साम्यार्थं प्रतिमार्पिते ।
युञ्ज्याद्यथाम्नायमाद्यादृते सङ्कल्पितेऽर्हति ॥ ३१ ॥

टीका—युञ्ज्यात्प्रयोजयेत् मुमुक्षुः । कान्, स्नपनार्चास्तुतिजपान् स्नपनमाश्रुत्येत्यादौ व्याख्यास्यते, अर्चादयो ज्ञानदीपिकायामत्र च प्राग्यथास्थानं व्याख्याताः । क्व, स्नपनादीन् युञ्ज्यात् अर्हति भगवदर्हद्देवे । किंविशिष्टे, प्रतिमार्पिते साकारस्थापनामवतारिते । कथं, यथाम्नायं उपासकाध्ययनाद्यागमानतिक्रमेण । किमर्थं, साम्यार्थं परमार्थसामायिकसिद्ध्यर्थं । अन्यत्र किं प्रयोक्तव्यमित्याह—आद्यादित्यादि—युञ्ज्यात्साम्यार्थी । किं तत्, आद्यात्स्नपनात् ऋते विना अन्यदर्चादित्रयं । क्व, अर्हति । किंविशिष्टे, सङ्कल्पिते निराकारस्थापनार्पिते । एतेन कृतप्रतिमापरिग्रहाः सङ्कल्पिताप्तपूजाग्रहाश्चेति ये देवसेवाधिकृता इति सूच्यते ॥ ३१ ॥

सामायिकस्य सुदुष्करत्वशङ्कामपाकरोति—

सामायिकं सुदुःसाधमप्यभ्यासेन साध्यते ।
निम्नीकरोति वार्बिन्दुः किं नाश्मानं मुहुः पतन् ॥ ३२ ॥

टीका—साध्यते निष्पाद्यते । किं तत्, सामायिकं । केन, अभ्यासेन असकृत्प्रवृत्या । किंविशिष्टमपि, दुःसाधमपि अतिशयेन निष्पादयितुमशक्यमपि ।

अत्र दृष्टान्तमाह-किं न निम्नीकरोति अनिम्नं निम्नं करोति । कोऽसौ, वार्बिन्दुः । जलबिन्दुः । कम्, अश्मानं शिलां । किं कुर्वन्, पतन् । कथं मुहुर्वारंवारं । अत्र बाह्या अप्याहुः—अभ्यासो हि कर्मणां कौशलमावहति । न हि सकृन्निपातमात्रेणोदबिन्दुरपि ग्राविणि निम्नतामादधातीति ॥ ३१ ॥

तदतिचारपरिहारार्थमाह —

पञ्चात्रापि मलानुज्झेदनुपस्थापनं स्मृतेः ।
कायवाङ्मनसां दुष्टप्रणिधानान्यनादरम् ॥ ३२ ॥

टीका—उज्झेत् त्यजेत् । फलार्थी । कान्, पञ्च मलान् । क्व, अत्रापि व्रतान्तरवत्सामायिकेऽपि । किं किं, स्मृत्यनुपस्थापनं कायवाङ्मनसां दुष्टप्रणिधानानि त्रीणि, अनादरं च । तत्र स्मृतेरनुपस्थापनं सामायिके अनैकाग्र्यमित्यर्थः अथवा सामायिकं मया कर्तव्यं न कर्तव्यमिति वा सामायिकं मया कृतं न कृतमिति वेति प्रबलप्रमादादस्मरणमतिचारः । स्मृतिमूलत्वान्मोक्षमार्गानुष्ठानस्य । कायेत्यादि दुष्टप्रणिधानं सावद्ये प्रवर्तनं तत्र हस्तपादादीनामनिश्चलभूतत्वावस्थापनं कायदुष्प्रणिधानं । वर्णसंस्काराद्भवोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानं । क्रोधलोभद्रोहाभिमानेर्ष्यादयः कार्यव्यासङ्गसंभ्रमश्च मनोदुष्प्रणिधानं । एते त्रयोऽतीचाराः । मनोदुष्प्रणिधानस्य स्मृत्यनुपस्थापनस्य चायं भेदः क्रोधाद्यावेशात्सामायिके मनसश्चिरमनवस्थानं प्रथमं । चिन्तायाः परिस्पन्दनादैकाग्र्येणानवस्थापनमन्यत् । अनादरोऽनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणं यथाकथञ्चिद्वा करणं । करणानन्तरमेव भोजनादिव्यासञ्जनं च । न चात्राविधिकृतादृरमकृतमित्यसूयावचनं प्रमाणीकृत्य भङ्गसम्भावनया सामायिकस्याप्रतिपत्तिः कर्तव्या । यतीनामप्यारम्भे भावितपूर्वत्वादेकदेशविराधनस्य सम्भवात् । न चैतावता तस्य भङ्गोऽपि मनसा सावद्यं न करोमीत्यादिप्रत्याख्यानेष्वेकतरभङ्गेऽपि शेषसद्भावान्न सामायिकस्यात्यन्ताभाव इत्यमीषामतिचारतैव । सुभावितसामायिकस्तु यदा श्रावको भविष्यति तदा तृतीयपदमेवाभ्युपगमिष्यतीति युक्तो व्रतिक-

स्यातिचारपरिहाराय यत्नः ॥ ३३ ॥

अथ प्रोषधोपवासव्रतं लक्षयति—

स प्रोषधोपवासो यच्चतुष्पर्व्यां यथागमम् ।
साम्यसंस्कारदार्ढ्याय चतुर्भुक्त्युज्झनं सदा ॥ ३४ ॥

टीका—भवति । कोऽसौ, सः प्रोषधोपवासः प्रोषधे पर्वण्युपवासः उपवसनं । यत्किं, यच्छ्रावकेण क्रियते । किं तत्, चतुर्भुक्त्युज्झनं चतसृणां भुक्तीनां भोज्यानमशनस्वाद्यखाद्यपेयद्रव्याणां भुक्तिक्रियाणां च त्यागः । एका हि भुक्तिक्रिया धारणकदिने द्वे उपवासदिने चतुर्थी च पारणकदिने प्रत्याख्यायते । कस्यां, चतुष्पर्व्यां चतुर्णां पर्वणां समाहारश्चतुष्पर्वी तस्यां । मासे मासे द्वयोरष्टम्योश्चतुर्दश्योरित्यर्थः । कथं, यथागमं आगमानतिक्रमेण । किमर्थं, साम्यसंस्कारदार्ढ्याय साम्यस्य सामायिकस्य संस्कार उत्कर्षस्तस्य दार्ढ्यं स्थिरीकरणं परिषहाद्यापातेऽपि अविचलनं तस्मै । कदा, सदा सर्वस्मिन् काले यावज्जीवमित्यर्थः ॥ ३४ ॥

एवमुत्तमं प्रोषधविधानमुक्त्वा मध्यमं जघन्यं च तदुपदेष्टुमाह—

उपवासाक्षमैः कार्योऽनुपवासस्तदक्षमैः ।
आचाम्लनिर्विकृत्यादि शक्त्या हि श्रेयसे तपः ॥ ३५ ॥

टीका—कार्यः कर्तव्यः । कोऽसौ, अनुपवासः जलवर्जनचतुर्विधाहारत्यागः । ईषदुपवासोऽनुपवास इति व्युत्पत्तेः । कैः, उपवासाक्षमैः प्रागुक्तलक्षणमुपवासं कर्तुमसमर्थैः । तथा कार्यं । किं तत् । आचाम्लनिर्विकृत्यादि । कैः, तदक्षमैः अनुपवासमपि कर्तुमसमर्थैः । तत्राचाम्लं संस्कृतसौवीरमिश्रौदनभोजनं । निर्विकृतिः विक्रियते जिह्वामनसी येनेति विकृतिर्गोरसेक्षुरसफलरसधान्यरसभेदाच्चतुर्धा । तत्र गोरसः क्षीरघृतादिः, इक्षुरसः खण्डगुडादिः, फलरसो द्राक्षाम्रादिनिष्यन्दो, धान्यरसस्तैलमण्डादिः । अथवा यद्येन सह भुज्यमानं स्वदते तत्तत्र विकृतिरित्युच्यते । विकृतेर्निष्क्रान्तं भोजनं निर्विकृति । आदिशब्देनैकस्थानैकभक्त-रसत्यागादि । हि यस्मात् भवति । किं तत्, तपः ।

कस्मै, श्रेयसे पुण्याय वा । कया चरितं, शक्त्या बलेन वीर्येण च ॥ ३५ ॥

यथागममित्यस्यार्थं चतुःश्लोक्या व्याचष्टे—

पर्वपूर्वदिनस्यार्धे भुक्त्वाऽतिथ्यशितोत्तरम् ।
लात्वोपवासं यतिवद्विविक्तवसतिं श्रितः ॥ ३६ ॥
धर्मध्यानपरो नीत्वा दिनं कृत्वाऽऽपराह्णिकम् ।
नयेत्त्रियामां स्वाध्यायरतः प्रासुकसंस्तरे ॥ ३७ ॥

टीका—नयेद्गमयेत् प्रोषधोपवासी । कां, त्रियामां रात्रिं । क्व, प्रासुकसंस्तरे निर्जन्तुकायां भूमौ निर्जन्तुकैश्च तृणदर्भादिभिः कृते शयने । किंविशिष्टः सन्, स्वाध्यायरतः । एतेन निद्रालस्ये त्यजेदिति लक्षयति । किं कृत्वा, विधाय । किं तत्, आपराह्णिकं अपराह्णे भवं कर्म सांध्यं क्रियाकल्पमित्यर्थः । किं कृत्वा, नीत्वा अतिक्रम्य । किं तत्, दिनं । किंविशिष्टः सन्, धर्मध्यानपर आज्ञापायविपाकलोकसंस्थानविचयैकाग्रचिन्तानिरोधलक्षणधर्मध्यानपरः । ध्यानोपरमे स्वाध्यायानुप्रेक्षाचिन्तनादिकमपि कार्यमिति परशब्देन प्रधानार्थेन सूच्यते । किंविशिष्टो भूत्वा, श्रितः अधिष्ठितः । कां, विविक्तवसतिं विविक्तां प्रासुकां अयोग्यजनरहितां निर्जनां वा वसतिं स्थानं । किं कृत्वा, लात्वा स्वीकृत्य । कं, उपवासं । किंवत्, यतिवत् यतिना तुल्यं यथा यतिर्भोजनानन्तरमेवोपवासं गृह्णाति विधिवत्सूरेश्च समीपं गत्वा पुनरुच्चारयति । सावद्यव्यापारं शरीरसंस्कारमब्रह्म च सदा त्यजति एवं प्रोषधे श्रावकोऽपि प्रवर्ततामित्यर्थः । किं कृत्वा, भुक्त्वा यथाविधि भोजनं कृत्वा । कथं, अतिथ्यशितोत्तरं अतिथेरशिताद्भोजनविधापनादनन्तरमतिथिं भोजयित्वेत्यर्थः । क्व, अर्धे । कस्य, पर्वपूर्वदिनस्य सप्तम्यास्त्रयोदश्याश्च अर्धे प्रहरद्वये वा किञ्चिन्न्यूनेऽधिकेऽपि वा । समेऽप्यसमेऽपि वांऽशेऽर्धशब्दस्य रूढत्वात् ३६।३७

ततः प्राभातिकं कुर्यात्तद्वद्यामान् दशोत्तरान् ।
नीत्वाऽतिथिं भोजयित्वा भुञ्जीतालौल्यतः सकृत् ॥ ३८ ॥

टीका—कुर्याद्विदध्यात् प्रोषधोपवासी । किं तत्, प्राभातिकं प्रभाते भवं

कर्मावश्यकादिकं । कस्मात, ततो यथोक्तविधिना प्रहरषट्कनयनादनन्तरं । ततश्च भुञ्जीत भोजनं कुर्यात् असौ । कस्मादलौल्यतः भोजने आसक्तिमकृत्वेत्यर्थः । कथं, सकृदेकवारं पारणकदिनेऽप्येकभुक्तं कुर्यादित्यर्थः । किं कृत्वा, नीत्वा लङ्घयित्वा । कान्, यामान् प्रहरान् । कति, दश । किंविशिष्टानुत्तरान् । अष्टावुपवासगोचराहोरात्रस्य द्वौ चोत्तरदिनस्य । किंवत्, तद्वत् पूर्वोक्तषट्प्रहरवत् ॥ ३८ ॥

पूजयोपवसन् पूज्यान् भावमय्यैव पूजयेत् ।
प्रासुकद्रव्यमय्या वा रागाङ्गं दूरमुत्सृजेत् ॥ ३९ ॥

टीका—पूजयेदर्चयेत् असौ । उपवसन्नुपवासतपश्चरन् । कान्, पूज्यान् परमेष्ठिश्रुतगुरून् । कया, पूजया आराधनया । किंविशिष्टया, भावमय्या सानुरागतद्गुणस्मरणलक्षणया भावपूजार्थत्वात् द्रव्यपूजायाः । भावपूजा च सामायिकप्रसक्तत्वेनोपवसतः सिद्धैव । तदशक्तौ वा पूज्यान् पूजया पूजयेत् । किंविशिष्टया, प्रासुकद्रव्यमय्या अक्षतमौक्तिकमालादिप्रकृतया । तथा दूरमत्यन्तं उत्सृजेत् त्यजेदसौ । किं तत्, रागाङ्गं इन्द्रियमनःप्रीतिसाधनं गीतनृत्यादिकं ॥ ३९ ॥

एतद्व्रतातिचारपरिहारार्थमाह—

ग्रहणास्तरणोत्सर्गाननवेक्षाप्रमार्जनान् ॥
अनादरमनैकाग्र्यमपि जह्यादिह व्रते ॥ ४० ॥

टीका—जह्यात् त्यजेत् श्रावकः । कान्, ग्रहणास्तरणोत्सर्गान् त्रीन् । किंविशिष्टान्, अनवेक्षाप्रमार्जनान् । तथा अनादरं चतुर्थं, अनैकाग्र्यं च पञ्चमं । क्व, इहास्मिन् प्रोषधोपवासाख्ये व्रते । अत्र ग्रहणं अर्हदादिपूजोपकरणपुस्तकादेरात्मपरिधानाद्यर्थस्य वाऽऽदानं । उपलक्षणात्तन्निक्षेपोऽपि आस्तरणं संस्तरोपक्रमणं । उत्सर्गो विण्मूत्रादीनां त्यागः । अवेक्षा जन्तवः सन्ति न सन्तीति वा चक्षुषा अवलोकनं । प्रमार्जनं मृदुनोपकरणेन प्रतिलेखनं । अवेक्षा च प्रमार्जनं च अवेक्षाप्रमार्जने ते न विद्येते येषु तान् । इह चानवेक्षया दुर-

वेक्षणमप्रमार्जनेन च दुष्प्रमार्जनं संगृह्यते नञः कुत्सार्थस्यापि दर्शनात्। यथा कुत्सितो ब्राह्मणोऽब्राह्मणः। अनादरः क्षुत्पीडितत्वादावश्यकेष्वनुत्साहः प्रोषधव्रत एव वा। तद्वदनैकाग्र्यमपि अन्यमनस्कत्वम् ॥ ४० ॥

अथातिथिसंविभागव्रतं लक्षयति—

व्रतमतिथिसंविभागः पात्रविशेषाय विधिविशेषेण।
द्रव्यविशेषवितरणं दातृविशेषस्य फलविशेषाय ॥ ४१ ॥

टीका—भवति। किं तत् व्रतं नियमेन सेव्यतया प्रतिपन्नत्वात्। तथा च सति अतिथ्यलाभेऽपि तद्दानफलभाक्त्वोपपत्तेः। किं नाम, अतिथिसंविभागः अतिथेः सम्यक् निर्दोषो विभागः स्वार्थकृतभक्ताद्यंशदानरूपः। एतदेव व्यक्तीकर्तुमाह—द्रव्यविशेषवितरणं वक्ष्यमाणलक्षण व शिष्टद्रव्यदानं। कस्मै, पात्रविशेषाय। कस्य कर्तुः, दातृविशेषस्य। केन, विधिविशेषेण। कस्मै, फलविशेषाय ॥ ४१ ॥

अतिथिशब्दव्युत्पादनमुखेनातिथिलक्षणमाह—

ज्ञानादिसिद्ध्यर्थतनुस्थित्यर्थान्नाय यः स्वयम्।
यत्नेनातति गेहं वा न तिथिर्यस्य सोऽतिथिः ॥ ४२ ॥

टीका—भवति। कोऽसौ, अतिथिः। यः किं, योऽतति सर्वदा गच्छति। किं तत्, गेहं दातृगृहं। केन, यत्नेन संयमाविराधनेन। कथं, स्वयं आह्वानादिना विना। किमर्थं, ज्ञानादीत्यादि-ज्ञानादीनां सिद्धिः साधनं सम्पूर्णीकरणं ज्ञानादिसिद्धिरर्थः प्रयोजनं यस्याः सा ज्ञानादिसिद्ध्यर्था सा चासौ तनुश्च शरीरं ज्ञानादिसिद्ध्यर्थतनुः तस्याः स्थितिर्यावदायुरवस्थानं सैवार्थः प्रयोजनं यस्य तत्तदर्थं तच्च तदन्नं च भोजनं तस्मै वा। अथवा सोऽतिथिर्भण्यते। उपलक्षणात्पर्वोत्सवौ च। नास्ति तिथिर्यस्येत्यतिथिरिति व्युत्पत्तेः। उक्तं च—“ तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना। अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ” ॥ ४२ ॥

पात्रस्वरूपसंख्यानिर्णयार्थमाह—

यत्तारयति जन्माब्धेः स्वाश्रितान्यानपात्रवत् ।
मुक्त्यर्थगुणसंयोगभेदात्पात्रं त्रिधा मतम् ॥ ४३ ॥

टीका—अस्ति भवति । किं तत्, पात्रं । कतिधा, त्रिधा त्रिभेदं । कस्मात्, मुक्त्येति-मुक्तेरर्थो निमित्तं कारणं, मुक्तिर्वाऽर्थः प्रयोजनं येषां ते मुक्त्यर्थास्ते च ते गुणाश्च सम्यग्दर्शनादयो मुक्त्यर्थगुणास्तेषां संयोगः संयुज्यमानत्वं तेन भेदो विशेषस्तस्मात् । यत्किं, यत्तारयति पारं प्रापयति । कान्, स्वाश्रितान् दानस्य कर्तृहेतुकर्त्रनुमन्तॄन् । कस्मात्, जन्माब्धेः संसारादर्णवादिव । किंवत्, यानपात्रवत् यानपात्रमम्भोधिस्थं यथा स्वाश्रितान् सांयात्रिकादीन् समुद्रात्तारयति तथा संसारादाश्रितान् यत्तारयति तत्पात्रमित्यर्थः ॥ ४३ ॥

एतदेव विशेषयन्नाह—

यतिः स्यादुत्तमं पात्रं मध्यमं श्रावकोऽधमम् ।
सुदृष्टिस्तद्विशिष्टत्वं विशिष्टगुणयोगतः ॥ ४४ ॥

टीका—स्यात् । किं तत्, पात्रं किंविशिष्टं, उत्तममुत्कृष्टं । किं तत्, यतिः संयुज्यमानरत्नत्रयः । तथा मध्यमं पात्रं स्यात् । किं तत्, श्रावकः संयुज्यमानसम्यग्दर्शनज्ञानविकलसंयमः । तथा अधमं पात्रं स्यात् । किं तत्, सुदृष्टिरसंयतसम्यग्दृष्टिः । स्याच्च । किं तत्, तद्विशिष्टत्वं तेषामुत्तम- मध्यमाधमपात्राणां विशेषः परस्परतः परेभ्यश्च भेदः । कस्मात्, विशिष्टगुणयोगतः गुणविशेषसम्बन्धात् ॥ ४४ ॥

दानविधेः प्रकारान् वैशिष्ट्यं चाह—

प्रतिग्रहोच्चस्थानांघ्रिक्षालनार्चानतीर्विदुः ।
योगान्नशुद्धीश्च विधीन् नवादरविशेषितान् ॥ ४५ ॥

टीका—विदुः जानन्ति पूर्वाचार्याः । कान्, विधीन् दानप्रयोगोपायान् । कति, नव । किमाख्यान्, प्रतिग्रहादीन् । किंविशिष्टान्, आदरविशेषितान् आदरेण यथायोग्यभुक्त्युपचारेण वैशिष्ट्यं नीतान् । तत्र प्रतिग्रहः स्वगृहद्वारे यतिं दृष्ट्वा प्रसादं कुरुतेत्यभ्यर्थ्य नमोऽस्तु तिष्ठतेति त्रिर्भणित्वा स्वीकरणं ।

उच्चस्थानं स्वगृहान्तः स्वीकृतयतिं नीत्वा निरवद्यानुपहतस्थाने उच्चासनं निवेशनं ॥ अंघ्रिक्षालनं च । अर्चा तथाक्षालितांघ्रेः संयतस्य गन्धाक्षतादिभिः पादपूजनं । आनतिः तथापूजितसंयतस्य पञ्चाङ्गप्रणामकरणं । एते पञ्च । तथा योगशुद्धयो मनोवाक्कायप्रसत्तयस्तिस्रः । एका चान्नशुद्धिः । तत्र मनःशुद्धिरार्तरौद्रवर्जनं । वाक्शुद्धिः परुषकर्कशादिवचोवर्जनं । कायशुद्धिः सर्वत्र संवृताचारतया प्रवर्तनं ॥ अन्नशुद्धिः चतुर्दशमलरहितस्याहारस्य यतनया शोधितस्य हस्तपुटेऽर्पणम् ॥ ४५ ॥

देयद्रव्यविशेषनिर्णयार्थमाह—

पिण्डशुद्ध्युक्तमन्नादिद्रव्यं वैशिष्ट्यमस्य तु ।
रागाद्यकारकत्वेन रत्नत्रयचयाङ्गता ॥ ४६ ॥

टीका—भवति । किं तत्, द्रव्यमर्थाद्देयं । किंविशिष्टमन्नादि आहारौषधावासपुस्तकपिच्छिकादि । किंविशिष्टं तत्, पिण्डशुद्ध्युक्तं पिण्डशुद्धौ पिण्डशुद्धिप्ररूपणार्थे पूर्वमनगारधर्मस्कन्धे पञ्चमाध्याये प्रतिपादितं । अस्य तु यथोक्तदेयद्रव्यस्य पुनर्भवति । किं तत्, वैशिष्ट्यं विशेषः । किं तत्, रत्नत्रयचयाङ्गता सम्यग्दर्शनादिवृद्धिकारणत्वं । केन, रागाद्यकारकत्वेन रागद्वेषासंयममदुःखचयाद्यजनकत्वेन ॥ ४६ ॥

दातृलक्षणं तद्वैशिष्ट्यं चाह—

नवकोटीविशुद्धस्य दाता दानस्य यः पतिः ।
भक्तिश्रद्धासत्त्वतुष्टिज्ञानालौल्यक्षमागुणः ॥ ४७ ॥

टीका-स दाता भण्यते पूर्वाचार्यैः । यः किं, यो भवति । किंविशिष्टः, पतिः स्वामी प्रयोक्ता । कस्य, दानस्य देयस्य दत्तिक्रियाया वा । किंविशिष्टस्य, नवकोटीविशुद्धस्य नवकोट्यः मनोवाक्कायैः प्रत्येकं कृतकारितानुमतानि । अथवा देयशुद्धिस्तत्कृते च दातृपात्रशुद्धी, दातृशुद्धिस्तत्कृते च देयपात्रशुद्धी, पात्रशुद्धिस्तत्कृते च देयदातृशुद्धी चेत्यार्षोक्ताः। नवकोटीभिर्विशुद्धमकृतपिण्डशुद्ध्युक्तदोषसम्पर्कं आर्षोक्तं तत्पक्षे तु नवकोट्यो विशुद्धाः सुप्रसिद्धा यत्रेति विग्रहः ।

किंविशिष्टः सन्, भक्तीत्यादि भक्त्यादयः सप्तगुणाः विशेषणानि परासाधारणानि यस्य स तथोक्तः । तत्र भक्तिः पात्रगुणानुरागः । श्रद्धा पात्रदानफले प्रतीतिः । सत्त्वं सत्त्वाख्यो मनोगुणः स्वल्पवित्तस्यापि स्वाढ्याश्चर्यकारिदानप्रवृत्त्यङ्गं । तुष्टिः दत्ते दीयमाने च प्रहर्षः । ज्ञानं द्रव्यादिवेदित्वं । अलौल्यं सांसारिकफलानपेक्षा । क्षमा दुर्निवारकालुष्यकारणोपत्तावपि कोपाभावः ।। तदुक्तं-भाक्तिकं तौष्टिकं श्राद्धं सविज्ञानमलोलुपम् । सात्त्विकं क्षमकं सन्तो दातारं सप्तधा विदुः ।। १ ।। किं च, सत्त्वादिगुणदातृकं दानमपि सात्त्विकादिभेदात् त्रिविधमिष्यते । तदुक्तं- आतिथेयं हितं यत्र यत्र पात्रपरीक्षणम् । गुणाः श्रद्धादयो यत्र तद्दानं सात्त्विकं विदुः ।। १ ।। यदात्मवर्णनप्रायं क्षणिकाहार्यविभ्रमम् ।। परप्रत्ययसम्भूतं दानं तद्राजसं मतम् ।। २ ।। पात्रापात्रसमावेक्षमसत्कारमसंस्तुतम् ।। दासभृत्यकृतोद्योगं दानं तामसमूचिरे ।। ३ ।। उत्तमं सात्त्विकं दानं मध्यमं राजसं भवेत् ।। दानानामेव सर्वेषां जघन्यं तामसं पुनः ।।

दानफलं तद्विशेषं च व्याचष्टे—

रत्नत्रयोच्छ्रयो भोक्तुर्दातुः पुण्योच्चयः फलम् ।
मुक्त्यन्तचित्राभ्युदयप्रदत्वं तद्विशिष्टता ।। ४८ ।।

टीका—भवति । किं तत्, फलं दानस्य साध्यं । कस्य, भोक्तुराहाराद्युपयोक्तुः । किं तत्, रत्नत्रयोच्छ्रयः सम्यग्दर्शनादीनामुद्गतिः तथा तत्फलं भवति । कस्य, दातुर्दायकस्य । किं तत्, पुण्योच्चयः, सुकृतराशिः । भवति । काऽसौ, तद्विशिष्टता तस्य दानस्य फलस्य वैशिष्ट्यं । किं तत्, मुक्त्यन्तेत्यादि चित्रा नानाप्रकारा इन्द्रचक्रिबलदेवतीर्थकरादिपदलक्षणाः विश्वविस्मयकराश्च अभ्युदयाश्चित्राभ्युदयाः, मुक्तिरनन्तज्ञानादिचतुष्टयप्राप्तिलक्षणं निःश्रेयसं अन्ते अवसाने फलोपभोगच्छेदे येषां ते मुक्त्यन्तास्ते च ते चित्राभ्युदयाश्च मुक्त्यन्तचित्राभ्युदयास्तान् प्रकर्षेणाप्रतिबन्धलक्षणेन ददाति सम्पादयतीति तत्प्रदं, तस्य भावस्तत्त्वम् ।। उक्तं च—पात्रदाने फलं मुख्यं मोक्षः सस्यं कृषेरिव ।। पलालमिव भोगास्तु फलं स्यादानुषङ्गिकम् ।। ४८ ।।

गृहव्यापारप्रभवपातकापनोदनसामर्थ्यं मुनिदानस्य दर्शयति—

पञ्चसूनापरः पापं गृहस्थः सञ्चिनोति यत् ।
तदपि क्षालयत्येव मुनिदानविधानतः ॥ ४९ ॥

टीका—यत्पापं सञ्चिनोति सम्बध्नाति गृहस्थः । किंविशिष्टः सन्, पञ्चसूनापरः, पेषणी कुट्टनी चुल्ली उदकुम्भी प्रमार्जनी चेति पञ्च क्रियाः सूना इति प्रसिद्धाः । सूना इव सूनाः प्राणघातस्थानसाधर्म्यात् । पञ्च सूनाः पराः प्रधानानि यस्य सः पञ्चसूनापरः । आसामवश्यम्भावित्वाद् गृहस्थस्य प्राधान्येनोपादानं । तेन ततोऽन्यान्यपि पापकर्माणि गुणभावेन गृहिणः संगृह्यन्ते । क्षालयत्येव अवश्यं स्फेटयति । गृहस्थः । किं तत्, तदपि पञ्चावश्यकार्यव्यापारहेतुकं पापं । अपिर्विस्मये समुच्चये वा । न केवलं तदेव पापं क्षालयति व्यापारान्तरप्रभवमपीत्यर्थः । कस्मात्, मुनिदानविधानतः मुनये उत्तमपात्राय दानं स्वपरोपकाराय स्वद्रव्यातिसर्जनं मुनिदानं तस्य विधानं विधिवत्प्रयोगः तस्मात्तेन वा ॥ ४९ ॥

दानस्य कर्त्रादीनां फलानि दृष्टान्तमुखेन स्पष्टयति—

यत्कर्ता किल वज्रजङ्घनृपतिर्यत्कारयित्री सती
श्रीमत्यप्यनुमोदका मतिवरव्याघ्रादयो यत्फलम् ।
आसेदुर्मुनिदानतस्तदधुनाऽप्याप्तोपदेशाब्दक-
व्यक्तं कस्य करोति चेतसि चमत्कारं न भव्यात्मनः ॥५०॥

टीका—किल एवं ह्यार्षे श्रूयते । यदासेदुः । के, ते मुनिदानस्य कर्त्रादिभावमापन्ना वज्रजङ्घमहाराजप्रभृतयः । किं, तत्फलं । कस्मात्, मुनिदानतः । तत्कस्य चेतसि चमत्कारं न करोतीति समुदायेनार्थकथनं । इयं तु प्रत्येकवाक्यपरिसमाप्तिरिति नीं पदद्वयेन । यत्किल वज्रजङ्घनृपतिरुत्पलखेटनगराधिपतिर्वज्रजङ्घो नाम नृपतिराससाद प्राप्तः । किं, तत्फलं । कस्मात्, मुनिदानतः । किंविशिष्टः सन्, कर्ता दानस्य स्वातंत्र्येण विधाता । यच्च

आससाद । काऽसौ, सती पतिव्रता । किंनाम्नी, श्रीमती पुण्डरीकिणीनाथस्य वज्रदन्तचक्रिणः पुत्री वज्रजङ्घनृपतेः पत्नी । किं तत्, फलं । कस्मात्, मुनिदानतः । किंविशिष्टा सती, कारयित्री स्वभर्तुर्दानं कुर्वतः प्रयोजयित्री । अपिः समुच्चये पूर्वत्रोत्तरत्र च चशब्दार्थे योज्यः । यच्च आसेदुः प्रापा । के, ते मतिवरव्याघ्रादयो मुनिदानतः फलं । मतिवरो वज्रजङ्घनृपतेर्मन्त्री आदिशब्दादानन्दो नाम तस्यैव पुरोहितोऽकम्पनाभिधानः सेनापतिर्धनमित्रनामा च श्रेष्ठी । पुनरादिशब्दात्सूकरो वानरो नकुलश्च गृह्यते । मतिवरश्च व्याघ्रश्च मतिवरव्याघ्रौ तावादी येषमानन्दाख्यपुरोहितादीनां तद्वनवासिसूकरादीनां च ते मतिवरव्याघ्रादय इति विग्रहः । किंविशिष्टाः सन्तः, अनुमोदका एष साधु करोतीति तद्दानस्यानुमन्तारः तत्कर्तृत्वकारयितृत्वानुमोदकत्वपरिणामद्वारायातसुकृतसंघातहेतुकं मुनिदानफलं कर्तृ कस्य भव्यात्मनश्चेतसि चमत्कारं न करोति ? सर्वस्यापि करोतीत्यर्थः । कदा, अधुनाऽपि । किं पुनस्तत्काले । किंविशिष्टं सत्, आप्तोपदेशाब्दकव्यक्तं आप्तानां परापरगुरूणामुपदेशो रहस्यवाक्यमाप्तोपदेशः स एवाब्दक आदर्शः स्वविषयार्थस्पष्टप्रतीतिनिमित्तत्वादाप्तोपदेशाब्दकस्तत्र तेन वा व्यक्तं प्रतीतियोग्यतां नीतम्॥५०॥

अधुना अतिथ्यन्वेषणविधिं श्लोकद्वयेनाह

कृत्वा माध्याह्निकं भोक्तुमुद्युक्तोऽतिथये ददे ।
स्वार्थं कृतं भक्तमिति ध्यायन्नतिथिमीक्षताम् ॥ ५१ ॥

टीका—ईक्षतामतिथिसंविभागव्रती श्रावकः अन्वेषयतु । कं, अतिथिं । किं कुर्वन्, ध्यायन् एकाग्रतया चिन्तयन् । किम्, इति, एतत् । किमेतदित्याह—ददे प्रयच्छाम्यहं । किं तत्, भक्तमाहारं । कस्मै, अतिथये प्रागुक्तलक्षणाय । किंविशिष्टं, कृतं साधितं । किमर्थं, स्वार्थं आत्मार्थं आत्मनो निमन्त्रणादौ सत्यात्मीयार्थमपि । स्वस्मै इदं स्वार्थमित्यस्य कृता पदेन विग्रहः । कीदृशो भूत्वा, एतद्ध्यायन्नतिथिमीक्षतामित्यत्राह—उद्युक्तः उद्यतः । किं कर्तुं, भोक्तुं भोजनं करिष्याम्यहमित्यध्यवसानाभिमुखः । किं कृत्वा, कृत्वा विधाय । किं

तत्, माध्यान्हिकं मध्याह्ने भवं कर्म स्नानदेवार्चनादिकं ॥ ५१ ॥

द्वीपेष्वर्धतृतीयेषु पात्रेभ्यो वितरन्ति ये ॥
ते धन्या इति च ध्यायेदतिथ्यन्वेषणोद्यतः ॥ ५२ ॥

टीका—ध्यायेच्च चिन्तयेत् । कोऽसौ, अतिथ्यन्वेषणोद्यतः श्रावकः । किं, इति एतत् । वर्तन्ते । के, ते गृहस्थाः । किंविशिष्टाः, धन्याः पुण्यवन्तः । ये किं, ये वितरन्ति यथाविधि प्रयच्छन्ति । केभ्यः, पात्रेभ्यः । केषु, द्वीपेषु किंविशिष्टेषु, अर्धतृतीयेषु जम्बूद्वीपे धातकीखण्डे पुष्करवरद्वीपस्य चार्धे अर्धतृतीयो येषां ते अर्धतृतीया इति विग्रहः ॥ ५२ ॥

भूम्यादीनां देयत्वं ग्रहणादौ च दानं नैष्ठिकस्य हिंसासम्यक्त्वोपघातहेतुत्वप्रकाशनेन निषेद्धुमाह—

हिंसार्थत्वान्न भूगेहलोहगोश्वादि नैष्ठिकः ।
दद्यान्न ग्रहसङ्क्रान्तिश्राद्धादौ च सुदृग्द्रुहि ॥ ५३ ॥

टीका—न दद्यान्न प्रयच्छेत् । कोऽसौ, नैष्ठिको दर्शनिकादिगृही । किं तत्, भूगेहलोहगोश्वादि भूश्च भूमिर्गेहं च गृहं लोहं च शस्त्रोपादानं गौश्चानड्वाही अश्वश्च घोटको भूगेहलोहगोश्वास्ते आदयो यस्य कन्याहेमतिलदध्यन्नादेर्बाह्यैः पुण्यार्थतया देयत्वेन समर्थितस्य द्रव्यस्य तद् भूगेहादिद्रव्यं नैष्ठिको न दद्यात् । कस्मात्, हिंसार्थत्वात् प्राणिवधनिमित्तत्त्वात् । एतस्योत्तरस्य च समर्थनं ज्ञानदीपिकायां विस्तरतोऽभिहितं प्रतिपत्तव्यं । न च दद्यान्नैष्ठिकः स्वद्रव्यं । कस्मिन्, ग्रहसंक्रान्तिश्राद्धादौ ग्रहःसूर्यचन्द्रमसोरुपरागः, संक्रान्तिः सूर्यस्य राश्यन्तरसंक्रमणं, श्राद्धं मृतपित्राद्युद्देशेन दानं, ग्रहश्च संक्रान्तिश्च श्राद्धं च तान्यादयो यस्य वारव्यतिपातादेर्बाह्यैः पुण्यार्थत्वेन समर्थितस्य पर्वणस्तद्ग्रहादि पर्व तस्मिन् । तस्य पुण्यार्थदानविषयत्वकल्पनायां दोषसमर्थनार्थमाह—किंविशिष्टे तत्र, सुदृग्द्रुहि सम्यक्त्वघातके । यद्यपि च नैष्ठिक इति वचनात्पाक्षिकस्यानुत्पन्नसम्यक्त्वावस्थतया भूम्यादिदानं न प्रतिषिध्यते

तथापि ग्रहणादौ तस्यापि दानमविधेयमेव सम्यक्त्वोपघातस्य तेनाप्यवश्य-परिहार्यत्वात् ॥ ५३ ॥

तद्व्रतातिचारपरिहारार्थमाह—

त्याज्याः सचित्तनिक्षेपोऽतिथिदाने तदावृतिः ।
सकालातिक्रमपरव्यपदेशश्च मत्सरः ॥ ५४ ॥

टीका—त्याज्याः तद्व्रतिना वर्जनीयाः । के ते, सचित्तनिक्षेपस्तदावृतिः कालातिक्रमपरव्यपदेशाभ्यां सह मत्सरश्चेत्यमी पञ्चातिचाराः । क, अतिथिदाने अतिथिसंविभागव्रते । तत्र सचित्तनिक्षेपः—सचित्ते सजीवे पृथिवीजलकुम्भोप (चुल्लि) भुवल्लिधान्यादौ निक्षेपो देयस्य वस्तुनः स्थापनं । तच्चादानबुद्ध्या तत्र निक्षेप्यमाणमतिचारः । तुच्छबुद्धिः खलु सचित्तनिक्षिप्तं किल संयता न गृह्णन्तीत्यभिप्रायेण देयं सचित्ते निक्षिपतीति तच्च । संयतेष्वगृह्णत्सु लाभोऽयं ममेति च मन्यते इति प्रथमः ॥ १ ॥ तदावृतिः तेन सचित्तेन पत्रपुष्पादिना तथाविधयैव बुद्ध्या आवृतिराच्छादनं द्वितीयः ॥ अथवा सचित्तनिक्षिप्तं तत्पिहितं च संयतस्याजानतः प्रयुज्यमानमतीचारः ॥ २ ॥ कालातिक्रमः साधूनामुचितस्य भिक्षासमयस्य लङ्घनं । स च यतीनयोग्ये काले भोजयतोऽनगारवेलाया वा प्रागेव पश्चाद्वा भुञ्जानस्य च तृतीयः स्यात् ॥ ३ ॥ परव्यपदेशः परस्यान्यस्य सम्बन्धीदं गुडखण्डादीति विशेषेणापदेशो व्याजाद्यदि वाऽयमत्र दाता दीयमानोऽप्ययमस्येति समर्पणं चतुर्थः ॥ ४ ॥ मत्सरः कोपः । यथा मार्गितः सन् कुप्यति, सदपि वा मार्गितं न ददाति प्रयच्छतोऽप्यादराभावो वा, अन्यदातृगुणासहिष्णुत्वं वा मत्सरः । यथाऽनेन तावच्छ्रावकेण मार्गितेन दत्तं किमहमस्मादपि हीनः इति परोन्नतिवैमनस्याद्ददाति । एतच्च मत्सरशब्दस्यानेकार्थत्वात्सङ्गच्छते ॥ तदुक्तं—मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि ॥ एते पूर्वे चाज्ञानप्रमादानामतिचाराः । अन्यथा तु भङ्गा एवेति विभावनीयम् ॥ ५४ ॥

प्रकृतार्थोपसंहारपुरस्सरमुक्तशेषं निर्दिशन् श्रावकस्य महाश्रावकत्वमाह -

एवं पालयितुं व्रतानि विदधच्छीलानि सप्तामला--
न्यागूर्णः समितिष्वनारतमनोदीप्राप्तवाग्दीपकः ।
वैयावृत्यपरायणो गुणवतां दीनानतीवोद्धरं--
श्चर्यां दैवसिकीमिमां चरति यः स स्यान्महाश्रावकः ॥५५॥

टीका-स्यात् भवेत् । कोऽसौ, स गृही । किंविशिष्टो, महाश्रावकः महानिन्द्रादीनां पूज्यः । शृणोति तत्त्वं गुरुभ्य इति श्रावकः महांश्चासौ श्रावकश्च महाश्रावकः । यः किं, यश्च ति अनुतिष्ठति । कां, चर्यां आचारं । किंविशिष्टां, दैवसिकीं दिवसे अहोरात्रे भवा दैवसिकी तां । पुनः किंविशिष्टां, इमां अनन्तराध्याये वक्ष्यमाणां । किं कुर्वन्, विदधत् आचरन् । कानि, शीलानि व्रतपरिरक्षणानि । कति, सप्त गुणव्रतत्रयशिक्षाव्रतचतुष्टयलक्षणानि । किंविशिष्टानि विदधत्, अमलानि निरतिचाराणि । कथं, एवमुक्तप्रकारेण । किं कर्तुं, पालयितुं पालयिष्याम्यहमित्यभिप्रायेण । कानि, व्रतानि सम्यग्दर्शनपूर्वाणि निरतिचाराण्यणुव्रतानि । किंविशिष्टः सन्, आगूर्णः उद्यतः । कासु, समितिषु श्रुतनिरूपितक्रमगेर्याभाषैषणादाननिक्षेपोत्सर्गलक्षणासु संयमरूपाणुव्रतनिष्ठ इत्यर्थः । अणुव्रतमहाव्रतानि हि समितिसहितानि संयमस्तद्रहितानि विरतिरिति सिद्धान्तः । तदुक्तं—अणुवयमहव्वयाइं समिदीसहिदायिं संजमो समिदिहिं विणा विरदि इति । पुनः किंविशिष्टः, अनारतमनोदीप्राप्तवाग्दीपकः आप्तानां परापरगुरूणां वाग्वचनमाप्तवाक् तज्जन्यश्रुतज्ञानमिह गृह्यते । कारणे कार्योपचारात् । आप्तवागेव दीपकः प्रदीपः स्वपरप्रकाशकत्वादाप्तवाग्दीपकः परमागमप्रदीपकः, अनारतं सततं मनसि चित्ते दीप्रो दीपनशीलोऽनारतमनोदीप्रस्तथाविध आप्तवाग्दीपको यस्य स तथोक्तः । पुनः किंविशिष्टो, वैयावृत्यपरायणो वैयावृत्त्यं निरवद्यवृत्त्या आपत्प्रतीकारः तत्र परायणस्तत्परः । केषां, गुणवतां गुणभाजां संयमविकल्पातिशयभाजां रत्नत्रयाराधकानां वा । पुनः

किं कुर्वन्, उद्धरन् दुःखाद्विमोचयन्। कान्, दीनान् अवृत्तिव्याधिशोकार्तान्। कथं, अतीव पाक्षिकाद्यपेक्षयाऽतिशयेन। एतेन सम्यग्दर्शनशुद्धत्वं व्रतभूषणभूषितत्वं निर्मलशीलनिधित्वं संयमनिष्ठत्वं जिनागमज्ञत्वं गुरुशुश्रूषकत्वं दयादिसदाचारपरत्वं चेति सप्तगुणयोगान्महाश्रावकत्वं कस्यचित्पुण्यकृतनः कालादिलब्धिविशेषवशाद्भवतीति तात्पर्यार्थोऽत्र प्रतिपत्तव्य इति भद्रम् ॥ ५५ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितश्चतुर्दशः
प्रक्रमाच्च **पञ्चमोऽध्यायः** समाप्तः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

इदानीमाहोरात्रिकमाचारं श्रावकस्योपदेष्टुकामः पूर्वं पौर्वाह्णिकीमितिकर्तव्यतां चतुर्दशभिः श्लोकैर्व्याकरोति——

ब्राह्मे मुहूर्ते उत्थाय वृत्तपंचनमस्कृतिः ।
कोऽहं को मम धर्मः किं व्रतं चेति परामृशेत् ॥ १ ॥

टीका—परामृशेत् चिन्तयेत् श्रावकः। किं, इति एतत्। तद्यथा—कोऽहं क्षत्रियो ब्राह्मणादिर्वा इक्ष्वाकुवंशोद्भवोऽन्यवंशोद्भवो वाहमित्यादि चिन्तयेत्। तथा को मम धर्मो जैनोऽन्यो वा श्रावकीयो यत्यादिसंबंधी वा--मे देवादिसाक्षिकं प्रतिपन्नो वृष इति चिंतयेत्। तथा किं व्रतं मूलगुणरूपमणुव्रतादिरूपं वा मम। चशब्दात् के गुरवो ममेति, कुत्र ग्रामे नगरादौ वा वसामीति, कोऽयं कालः प्रभातादिरिति चेत्यादि समुच्चीयते। स्ववर्णादिस्मृतौ हि तद्विरुद्धपरिहारं सुखेन करोति। कथम्भूतो भूत्वा, वृत्तपञ्चनमस्कृतिः अन्तर्जल्पेन बहिर्जल्पेनापि वा वृत्ता पठिता पञ्चनमस्कृतिः णमो अरिहंताणमित्यादिगाथारूपः पञ्चनमस्कारो येन स तथोक्तः। किं कृत्वा

तेनेत्याह--उत्थाय विनिद्रीभूय । क्व, मुहूर्ते नाडीद्वये । किंविशिष्टे, ब्राह्मे ब्राह्मी सरस्वती देवता अस्यति ब्राह्मस्तस्मिन्निशावसानघटिकाद्वय इत्यर्थः । तदुक्तं-ब्राह्मे मुहूर्ते उत्थाय सर्वकार्याणि चिन्तयेत् । यतः करोति सान्निध्यं तस्मिन् हृदि सरस्वती ॥ १ ॥ ततः—

अनादौ बम्भ्रमन् घोरे संसारे धर्ममार्हतम् ।
श्रावकीयमिमं कृच्छ्रात् किलापं तदिहोत्सहे ॥ २ ॥

टीका-किल एवं ह्यागमे श्रूयते आपं प्राप्तोऽहं । कं, धर्मं । किंविशिष्टं, आर्हतं अर्हता वीतरागसर्वज्ञेन प्रोक्तं । किंप्रयोक्तृकं, श्रावकीयं श्रावकाणामयं श्रावकीयस्तमुपासकोपासनीयमित्यर्थः । कीदृशम्, इमं इदानीमप्यंतःस्फुरंतं । कस्मादापं, कृच्छ्रात् जगत्यनन्तैकेत्यादिना प्रागुक्तात् । किं कुर्वन्, बम्भ्रमन् कुटिलं पर्यटन् । क्व, संसारे द्रव्यक्षेत्रकालभवभावपरिवर्तनरूपे आजवञ्जवभावे । किंविशिष्टे, घोरे भयङ्करे । पुनः किंविशिष्टे, अनादौ नास्ति आदिः पूर्वो यस्यासावनादिः तस्मिन् बीजाङ्कुरन्यायेन सन्तत्या वर्तमान इत्यर्थः । तत्तस्मात् उत्सहे प्रमादपरिहारेण वर्तेऽहं । क्व. इहास्मिन् अत्यन्तदुर्लभे धर्मे॥२॥

इत्यास्थायोत्थितस्तल्पाच्छुचिरेकायनोऽर्हतः ।
निर्मायाष्टतयीमिष्टिं कृतिकर्म समाचरेत् ॥ ३ ॥

टीका--समाचरेत् सम्यगनुतिष्ठेत् व्रतिकः । किं तत्, कृतिकर्म योग्यकालासनेत्यादिना प्राक्प्रबन्धेन सूचितप्रायं वन्दनाविधानं । किं कृत्वा, निर्माय कृत्वा । कां, इष्टिं पूजां किंविशिष्टम्. अष्टतयीं अष्टौ जलगन्धाक्षतादयोऽवयवा यस्याः सा अष्टतयी तामष्टविधामित्यर्थः । कस्य, अर्हतोः भगवतोऽर्हद्देवस्य । उपलक्षणात् श्रुतस्य गुरुचरणानां च । किंविशिष्टः सन्, एकायनः एकाग्रमनाः । कथम्भूतो भूत्वा, शुचिः शरीरचिंतां कृत्वा विधिवद्विहितशौचस्नानदन्तधावनादिक्रियः । एतच्चानुवादपरं लोकप्रसिद्धत्वान्मलोत्सर्गाद्यर्थस्य नोपदेशः । परमप्राप्ते शास्त्रस्यार्थवत्त्वादेवमुत्तरत्राप्यप्राप्त आमुष्मिकादिविषये उपदेशः फलवानिति चिन्त्यं । किंविशिष्टः सन्, उत्थितः उत्थीभूतः

कस्मात्, तल्पात् त्यक्तशयनीय इत्यर्थः । किं कृत्वा, आस्थाय प्रतिज्ञाय। कथम्, इत्येवमनादावित्यादिना पूर्वोक्तप्रकारेण ॥ ३ ॥ ततश्च—

समाध्युपरमे शान्तिमनुध्याय यथाबलम् ।
प्रत्याख्यानं गृहीत्वेष्टं प्रार्थ्य गन्तुं नमेत् प्रभुम् ॥ ४ ॥

टीका—नमेत् पञ्चाङ्गप्रणामेन नमस्येत कृतक्रियः श्रावकः । कं, प्रभुं अर्हद्देवं । किं कर्तुं, गन्तुं इष्टदेशान्तरं विहर्तुं । किं कृत्वा, प्रार्थ्य याचित्वा । किं तत्, इष्टं वांछितं पुनर्दर्शनसमाधिमरणादिकं । किं कृत्वा, गृहीत्वा प्रतिपद्य । किं तत्, प्रत्याख्यानं भोगोपभोगादिनियमविशेषं । कथं, यथाबलं शक्त्यनतिक्रमेण । किं कृत्वा, अनुध्याय अनुचिन्त्य । कां, शान्तिं येऽभ्यर्चिता मुकुटकुण्डलहाररत्नैरित्यादिप्रबंधेन श्रूयमाणां । क्व सति, समाध्युपरमे समाधेरवश्यकरणीयस्य धर्म्यध्यानस्य निवृत्तौ ॥ ४ ॥ ततश्च—

साम्यामृतसुधौतान्त-रात्मराजज्जिनाकृतिः ।
दैवादैश्वर्यदौर्गत्ये ध्यायन् गच्छेज्जिनालयम् ॥ ५ ॥

टीका—गच्छेत् व्रजेत् तथानुष्ठितावश्यकः श्रावकः । कं, जिनालयं अर्हच्चैत्यगृहं । किंविशिष्टः सन, सामेत्यादि साम्यं जीवितमरणादौ समतापरिणामस्तदेवामृतं प्रसक्तिप्रकर्षहेतुत्वात्तेन सुष्ठु संस्कारदार्ढ्यलक्षणप्रकर्षापादनेन अतिशयेन धौतः क्षालितो विशुद्धिमापादितः अन्तरात्मा स्वपरभेदज्ञानोन्मुखमन्तःकरणं तत्र राजन्ती दीप्यमाना जिनाकृतिः परमात्ममूर्तिर्यस्य सतथोक्तः । किं कुर्वन् गच्छेद्, ध्यायन् चिन्तयन् । के, ऐश्वर्यदौर्गत्ये ऐश्वर्यमर्थाद्याधिपत्यं दौर्गत्यं दारिद्र्यं ऐश्वर्यं च दौर्गत्यं च ऐश्वर्यदौर्गत्ये सम्भवत इति ध्यायन् । कस्मात्, दैवात् पुराकृतशुभाशुभकर्मविपाकात् । इदमत्रैदम्पर्यं यदीश्वरो महर्द्धिको राजा सामन्तादिर्वा भवति तदा पुण्यविपाकप्रभवा सम्पदियं न पौरुषेयी तदस्यां कथमात्मज्ञो मदमुपयायादिति भावयन् गच्छेत् । अथ दरिद्रस्तदा पापविपाकजनितमिदं दारिद्र्यदुःखं न केनापि च्छेत्तुं

शक्यं तदत्र को बुद्धिमान् विषादमासीदतीति भावयन् गच्छेदिति॥ ५॥

अनुवादमुखेन चैत्यालयव्रजनविधिमाह—

यथाविभवमादाय जिनाद्यर्चनसाधनम्।
व्रजन्कौत्कुटिको देशसंयतः संयतायते॥ ६॥

टीका—संयतायते संयतं यतिमिवात्मानमाचरति। कोऽसौ, देशसंयतः श्रावकः। किं कुर्वन्, व्रजन्गच्छन्। किंविशिष्टः सन्, कौत्कुटिकः पुरो युगमात्रप्रेक्षीत्यर्थः। किं कृत्वा, आदाय गृहीत्वा। किं तत्, जिनादीनामर्हच्छ्रुताचार्याणामर्चनसाधनं पूजाङ्गं जलगन्धाक्षतादिकं। कथं यथाविभवं स्वसम्पदनुसारेण॥ ६॥

दृष्ट्वा जगद्बोधकरं भास्करं ज्योतिरार्हतम्।
स्मरतस्तद्गृहशिरोध्वजालोकोत्सवोऽघहृत्॥ ७॥

टीका—भवति। कोऽसौ, तद्गृहशिरोध्वजालोकोत्सवः जिनचैत्यालयशिखरकेतनदर्शनानंदः। किंविशिष्टोऽघहृत् पापहरः। कस्य, तथा गच्छतः श्रावकस्य। किं कुर्वतः, स्मरतः स्मृतिविषयीकुर्वतः। किं तत्, ज्योतिः ज्ञानमयं वाङ्मयं वा तेजः। किंविशिष्टमार्हतं जैनं। किं कृत्वा, दृष्ट्वा आलोक्य। कं भास्करमादित्यं। किंविशिष्टं, जगद्बोधकरं जगतां दिवाचरप्राणिनां बोधं निद्रापनोदं करोतीत्येवंशीलं उद्यन्तमित्यर्थः। पक्षे बहिरात्मप्राणिनां मोहनिद्राप्रहरणशीलम्॥ ७॥

वाद्यादिशब्दमाल्यादिगन्धद्वारादिरूपकैः।
चित्रैरारोहदुत्साहस्तं विशेन्निसहीगिरा॥ ८॥

टीका—विशेत् प्रविशेदसौ। कं, तं जिनालयं। कया, निसहीगिरा निसहीति शब्दमुच्चारयन्नित्यर्थः। किंविशिष्टः सन्, आरोहदुत्साहः प्रवर्द्धमानधर्माचरणोद्योगः। कैः, वाद्यादीत्यादि वाद्यानां प्राभातिकतूर्याणामादिशब्देन स्वाध्यायस्तुतिमङ्गलगीतादीनां च शब्दैर्निनादैः। तथा माल्यादीनां चम्पकपुष्पा-

दिमालानां आदिशब्देन धूपचूर्णादीनां च गंधैरामोदैस्तथा द्वारस्य प्रवेशमुखस्य आदिशब्देन तोरणस्तम्भशिखरादीनां च रूपकैश्चेतनाचेतनप्रतिच्छन्दैः । किंविशिष्टैः, चित्रैर्नानाप्रकारैर्विस्मयकरैश्च ॥ ८ ॥

क्षालितांघ्रिस्तथैवान्तः प्रविश्यानन्दनिर्भरः ।
त्रिः प्रदक्षिणयेन्नत्वा जिनं पुण्याः स्तुतीः पठन् ॥ ९ ॥

टीका—प्रदक्षिणयेत् प्रदक्षिणीकुर्यादसौ । कं, जिनं स्थापनार्हन्तं । कथं, त्रिस्त्रीन् वारान् । किं कुर्वन्, पठन् निगदन । काः, स्तुतीः स्तवनवाक्यानि । किंविशिष्टाः, पुण्याः ज्ञानसंवेगादिगुणप्रव्यक्तीकरणेन अशुभकर्मनिर्जरणीः पुण्यास्रवणीश्च । किं कृत्वा, नत्वा त्रिःप्रणम्य जिनं । किंविशिष्टः सन्, आनन्दनिर्भरः प्रमोदपूरितसर्वांगः । किं कृत्वा, प्रविश्य आक्रम्य । किं तत्, अन्तः चैत्यालयमध्यदेशं । कथं, तथैव निसहीगिरैव । कथम्भूतो भूत्वा, क्षालिताङ्घ्रिः धौतपादः ॥ ९ ॥

सेयमास्थायिका सोऽयं जिनस्तेऽमी सभासदः ।
चिन्तयन्निति तत्रोच्चैरनुमोदेत धार्मिकान् ॥ १० ॥

टीका—अनुमोदेत साधु इमे अनुतिष्ठन्तीति मनसाऽभिनन्देदसौ । कान्, धार्मिकान् धर्मं चरतोऽनगारसागारभव्यजनान । कथमुच्चैरतिशयेन मुहुर्मुहुरित्यर्थः । क्व, तत्र चैत्यालये । प्रदक्षिणीकरणे वा । किं कुर्वन्, चिन्तयन परामृशन् । कथं, इति । किमिति, इयं चैत्यालयभूमिः सा आगमप्रसिद्धा आस्थायिका समवसरणभूमिः, तथा अयं प्रतिमार्पितो जिनः स आगमप्रसिद्धोऽष्टमहाप्रातिहार्यादिविभूतिभूषितोऽर्हन्, अमी आराधकभव्यास्ते आगमप्रसिद्धाः सभासदः सभ्या यत्यादयो द्वादश साक्षादर्हद्देवसेवावहिताः ।१०।

अथेर्यापथसंशुद्धिं कृत्वाऽभ्यर्च्य जिनेश्वरम् ।
श्रुतं सूरिं च तस्याग्रे प्रत्याख्यानं प्रकाशयेत् ॥ ११ ॥

टीका—प्रकाशयेत् प्रतिपादयेदेष महाश्रावकः । किं तत्, प्रत्याख्यानं

प्रागगृहे गृहीतं । क्व, अग्रे । कस्य, तस्य सूरेः । किं कृत्वा, अभ्यर्च्य अभिमुख पूजयित्वा । कं, जिनेश्वरं श्रुतं सूरिं च । किं कृत्वा, कृत्वा विधाय । कां, ईर्यापथसंशुद्धिं । कथं, अथ प्रणामपूर्वकपुण्यस्तुतिपाठविशेषप्रदक्षिणीकरणानंतरमिति समन्वयः । अयमत्र विशेषः–ईर्या ईरणं गमनं पन्था मार्गो यस्य तदीर्यापथं संयमविराधनं तस्य संशुद्धिः सम्यक् शोधनं प्रतिक्रमणमित्यर्थः । अभ्यर्च्य " जावरहंताणं भयवंताणं णमोकारं करोमि " इति वचनात् । प्रतिक्रमणानन्तरं नमोर्हऽद्भ्य इत्यनेन " जयंति निर्जिताशेषसर्वथैकान्तनीतयः । सत्यवाक्याधिपाः शश्वद्विद्यानन्दा जिनेश्वराः " इत्यादिना वाचनिकनमस्कारेण जलादिपूजाष्टकेन वा अभिमुखं पूजयित्वा । एष क्रमः श्रुतसूर्योरपि यथास्वं कल्प्यः । स एष जघन्येन वन्दनाविधिः प्रकर्षवृत्याऽस्य प्रथममेव गृहेऽनुष्ठानोपदेशात् ॥ ११ ॥

ततश्चावर्जयेत्सर्वान्यथार्हं जिनभाक्तिकान् ।
व्याख्यातः पठतश्चार्हद्वचः प्रोत्साहयेन्मुहुः ॥ १२ ॥

टीका—ततश्च प्रत्याख्यानप्रकाशनावसानक्रियाकलपनिवर्तनानन्तरं आवर्जयेदनुरञ्जयेदसौ । कान्, जिनभाक्तिकान् अर्हद्देवाराधकान् । किंविशिष्टान्, सर्वान् उत्तमादिभेदभिन्नान् । कथं, यथार्हं यथायोग्यप्रतिपत्त्या । तत्र मुनीन्नमोऽस्त्विति आर्यिका वंदे इति श्रावकानिच्छामीत्यादिप्रसिद्धविनयकर्मणोपचरेदित्यर्थः । उक्तं च-अर्हद्रूपे नमोऽस्तु स्याद्विरतौ विनयक्रिया । अन्योन्यं क्षुल्लके चाहमिच्छाकारवचः सदा ॥ तथा प्रोत्साहयेत् प्रकर्षेण उद्योगवतः कुर्यादसौ । कान्, पुरुषान् । किं कुर्वतो, व्याख्यातः पदपदार्थादिसमर्थनलक्षणेन विशेषेण आ शिष्यबोधोत्पत्तेर्वर्णयत उपाध्यायादीनित्यर्थः । किं तद्व्याख्यातः, अर्हद्वचः परमागमयुक्त्यागमशब्दागमादिभेदं जिनप्रवचनं । न केवलं व्याख्यातः पठतश्च अधीयानान् शिष्यादीनित्यर्थः । कथं, मुहुः पुनः पुनः ॥ १२ ॥

स्वाध्यायं विधिवत्कुर्यादुद्धरेच्च विपद्धतान् ।
पक्वज्ञानदयस्यैव गुणाः सर्वेऽपि सिद्धिदाः ॥ १३ ॥

टीका—कुर्यादसौ । कं, स्वाध्यायं श्रुताध्ययनं यथोचितं वाचनादिरूपं वा । किंवत्, विधिवत् शास्त्रोक्तविधानेन व्यंजनशुद्ध्यादिलक्षणाष्टविधवचनेन । तथा उद्धरेत् विपदो विमोचयेदसौ । कान्, विपद्धतान् शारीरमानसासातशाततिशक्तीन् दीनानित्यर्थः । यतो भवन्ति । के ते, गुणाः काठिन्यत्यागशौर्यसौन्दर्यादयः । किंविशिष्टाः, सिद्धिदाः वाञ्छितार्थसंपादका मुक्तिप्रदा वा । किं केचिन्नेत्याह, सर्वेऽपि निःशेषाः । कस्य, पक्वज्ञानदयस्यैव पुंसः ज्ञानं तत्त्वावबोधः दया सर्वप्राणिषु करुणा दुःखोच्छित्त्याभिलाषलक्षणा, ज्ञानं च दया च ज्ञानदये, पक्वे परिणते सात्मीभूते ज्ञानदये यस्य स पक्वज्ञानदयस्तस्यैव । न तु बहिर्द्योतिज्ञानस्य कादाचित्कानुकंपस्य चैवेत्येवशब्दार्थः ॥ १३ ॥

एवं विधेयमाचरणमुपदिश्य निषिद्धं तदुपदेष्टुमाह—

मध्येजिनगृहं हासं विलासं दुःकथां कलिम् ।
निद्रां निष्ठ्यूतमाहारं चतुर्विधमपि त्यजेत् ॥ १४ ॥

टीका—त्यजेदसौ हास्यादीन् सप्त । क्व, मध्येजिनगृहं जिनगृहमत्र महाश्रावकापेक्षया सकलश्चैत्यालयः इतरापेक्षया तदेकदेशो गन्धकुटीमात्रं । जिनगृहस्य मध्ये मध्येजिनगृहं । पारे मध्ये तया वेत्यनेनाव्ययीभावः । हासो हास्यं विलासः शृंगारचेष्टाविशेषः । दुःकथा दुष्टा चित्तकालुष्यकारिणी कथा कामक्रोधादिकथा राजादिकथा वा । कलिः कलहः । निद्रा स्वापः । निष्ठ्यूतं मुखश्लेष्मादिनिरसनं । आहारं चतुर्विधं खाद्यस्वाद्यलेह्यपानलक्षणम् ॥ १४ ॥

एवं प्राभातिकं धर्मकर्मोपदिश्यानन्तरविधेयमर्थार्जनादिविधिमभिधत्ते—

ततो यथोचितस्थानं गत्वाऽर्थेऽधिकृतान् सुधीः ।
अधितिष्ठेद्व्यवस्येद्वा स्वयं धर्माविरोधतः ॥ १५ ॥

टीका—ततः प्राभातिकधर्मानुष्ठाननिष्ठापनानन्तरं अधितिष्ठेत् सनाथी

कुर्यात् । कोऽसौ, सुधीः लोकद्वयहिताहितविचारचतुरः श्रावकः । कान्, अर्थेऽधिकृतान् अर्थस्यार्जने रक्षणे वर्द्धने च नियुक्तान् । किं कृत्वा, गत्वा प्राप्य । किं तत्, स्थानं प्रदेशं । किंविशिष्टं, यथोचितं यद्यद्न्यायार्थार्जनादियोग्यं तत्तेन गम्यमित्यर्थः । वा पक्षांतरे । तादृक्सामग्र्यभावे । पुनः सुधीः स्वयमात्मना अर्थे व्यवस्येत् तदर्जनादौ व्याप्रीयेत । कस्मात्, धर्माविरोधतः प्रतिपन्नजिनधर्मानुपघातेन । स च राज्ञां दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमनीचयोश्च माध्यस्थ्येन न्यायदर्शनात् नियोगिनां च राजार्थप्रजार्थसाधनेन, वणिजां च कूटतुलामानादिपरिहारेण, वनजीविकादिपरिहारेण च बोद्धव्यं ॥ १५ ॥

पौरुषस्य वैफल्यसाफल्यादौ विषादहर्षपरिहारार्थमाह—

निष्फलेऽल्पफलेऽनर्थफले जातेऽपि पौरुषे ।
न विषीदेन्नान्यथा वा हृष्येल्लीला हि सा विधेः ॥ १६ ॥

टीका—न विषीदेत् न विषादं गच्छेदसावर्थानुबंधपरः । क्व सति, पौरुषे पुरुषकारे । किंविशिष्टे, जाते निष्पन्ने । कीदृशे, निष्फले चिकीर्षितप्रयोजनवन्ध्ये । तथा अल्पफले सम्भावितार्थलाभान्न्यूनार्थलाभे । तथाऽनर्थफले अनर्थोऽर्थनाशादिलक्षणपुरुषार्थभ्रंशः फलं साध्यं यस्य सोऽनर्थफलस्तस्मिन् । अपिः समुच्चये । न वा हृष्येत् हर्षं गच्छेदसौ । क्व सति, पौरुषे जाते सति । कथं, अन्यथा सफले बहुफलेऽर्थानुबन्धफलेऽपीत्यर्थः । कुत इत्याह-हि यस्मात् वर्तते । काऽसौ, सा पौरुषस्य नैष्फल्यसाफल्यादिजननलक्षणा लीला निरंकुशप्रवृत्तिः । कस्य, विधेः पुरार्जितपापपुण्यकर्मणः ॥ १६ ॥

अथ प्राणयात्राविध्यर्थं नवश्लोकीमाह—

कदा माधुकरी वृत्तिः सा मे स्यादिति भावयन् ।
यथालाभेन सन्तुष्ट उत्तिष्ठेत तनुस्थितौ ॥ १७ ॥

टीका—ततश्च उत्तिष्ठेत अर्थचिन्तातो विरम्योद्यमं कुर्यादसौ । क्व, तनुस्थितौ शरीरस्वास्थ्यानुवृत्तिनिमित्तप्रवृत्तौ । किंविशिष्टः सन्, सन्तुष्टः धृतिं

गतः । केन, यथालाभेन यो यो लाभो मूलधनादधिकं धनं तेन । किं कुर्वन्, भावयन् चित्ते धारयन् । किं, इति तत् । किमेतदित्याह, कदा कस्मिन्काले स्याद्भविष्यति । काऽसौ, सा सूत्रोक्ता वृत्तिः अर्थात् भिक्षा । कस्य, मे मम । किंविशिष्टा, माधुकरी मधुकराणां भ्रमरादीनामियं माधुकरी तत्संबंधिनीव । पुष्पाणामिव दातॄणामनुपपीडनेनात्मप्रीणनहेतुत्वात् ॥ १७ ॥

नीरगोरसधान्यैधःशाकपुष्पाम्बरादिभिः ।
क्रीतैः शुद्ध्यविरोधेन वृत्तिः कल्प्याऽघलाघवात् ॥ १८ ॥

टीका—कल्प्या समाश्रया श्रावकेण । काऽसौ, वृत्तिः स्वास्थ्यानुवृत्तिः । कस्मात्, अघलाघवात् पापाल्पत्वात् । तदाश्रित्येत्यर्थः । कैः कल्प्या, नीरादिभिः । किंविशिष्टैः, क्रीतैः मूल्यदानेन गृहीतैः । केन, शुद्ध्यविरोधेन स्वप्रतिपन्नसम्यक्त्वव्रतानुपघातेन । तत्र नीरं जलं गोरसः क्षीरादिः धान्यं तण्डुलादिः एधांसि इन्धनानि शाकं पत्रादिहरितकं पुष्पाम्बरादि कुसुमवस्त्रखट्वापट्टकतृणादि ॥ १८ ॥

सधर्मिणोऽपि दाक्षिण्याद्विवाहादौ गृहेऽप्यदन् ।
निशि सिद्धं त्यजेद्दीनैर्व्यवहारं च नावहेत् ॥ १९ ॥

टीका—त्यजेदसौ । किं तत्, सिद्धं निष्पन्नमन्नं । क्व, निशि रात्रौ तदा ह्यन्नपाके त्रसघातपातौ परिहर्तुमशक्यौ । किं कुर्वन्, अदन् भुञ्जानः । क्व, गृहे । कस्य, सधर्मिणोऽपि न परं पुत्रादेः । किं तदासीनसाधर्मिकस्यापि । कस्मात्, दाक्षिण्यात् उपरोधवशात् । क्व, विवाहादावपि न परमिष्टभोज्यादौ । तथा नावहेत् न कुर्यात् । कं, व्यवहारं दानप्रतिग्रहादिलक्षणं कर्म । कैः सह, हीनैः सर्वधर्मधनादिना रहितैरल्पैर्वा गृहिभिः सह ॥ १९ ॥

उद्यानभोजनं जन्तुयोधनं कुसुमोच्चयम् ।
जलक्रीडान्दोलनादि त्यजेदन्यच्च तादृशम् ॥ २० ॥

टीका—त्यजेदसौ । किं तत्, उद्यानभोजनं उद्यानिकायां जेमनं । तथा

जन्तुयोधनं पदातिकुक्कुटमेषादीनां परस्परसम्प्रहारं। तथा कुसुमोच्चयं पुष्पावचयं। तथा जलक्रीडां शृङ्गारादिभिः सहर्षस्पर्द्धं जलव्यात्युक्षीं तथा आन्दोलनं दोलाखेलनकर्म। आदिशब्देन चैत्रासितप्रतिपदादिषु भस्मव्यतिकारि परिहासादि। किं बहुना, अन्यच्च परमपि तादृशं द्रव्यभावहिंसाबहुलं। कौमुदीमहोत्सवकुद्दननाटकावलोकनसंग्रामदर्शनरासक्रीडादिकम् ॥ २० ॥

यथादोषं कृतस्नानो मध्यान्हे धौतवस्त्रयुक्।
देवाधिदेवं सेवेत निर्द्वन्द्वः कल्मषच्छिदे ॥ २१ ॥

टीका-सेवेत आराधयेदसौ स्नपनादिभिः। कं, देवाधिदेवं देवैरिंद्रादिभिरधिकमाचार्यादिभ्योऽतिरिक्तं दीव्यते स्तूयते आराध्यत इति देवाधिदेवो भगवानर्हन्। किंविशिष्टः सन्, निर्द्वन्द्वः समस्तव्याक्षेपमुक्तः। किमर्थं, कल्मषच्छिदे प्राचीनतात्कालीनपापच्छेदार्थं। कथम्भूतो भूत्वा, यथादोषं दोषानुसारेण मध्यान्हे अनगारभ्रामरीवेलाप्रत्यासन्नसमये कृतस्नानः कृतं विहितं स्नानं यथोचितमङ्गप्रक्षालनादिकं येन स तथोक्तः। तथा धौतवस्त्रयुक् धौते क्षालिते जलादिना निर्मलीकृते वस्त्रे परिधानोत्तरीये युनक्ति स्वांगे सम्बध्नातीति धौतवस्त्रयुक् ॥ २१ ॥

जिनस्नपनाद्युपास्तिविधिमाह—

आश्रुत्य स्नपनं विशोध्य तदिलां पीठ्यां चतुष्कुम्भयुक्-
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्येष्टदिक्।
नीराज्याम्बुरसाज्यदुग्धदधिभिः सिक्त्वा कृतोद्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः सम्पूज्य नुत्वा स्मरेत् ॥२२॥

टीका—स्मरेत् यथाशक्ति जपेत् ध्यायेत्। कोऽसौ, माध्यान्हिकक्रियाकल्पोद्यतः श्रावकः। कं, जिनपतिं जिनेन्द्रं। किं कृत्वा, नुत्वा नित्यवन्दनादिविधिना वन्दित्वा। किं कृत्वा, सम्पूज्य जलादिभिरष्टाभिः सम्यगर्चयित्वा। किंविशिष्टं सन्तं, सिक्तमभिषिक्तं। कैः, कुम्भजलैः पूर्वस्थापितकलशाम्भो-

भिः । तथा गन्धसलिलैः सुरभिद्रव्यमिश्रोदकैः । कथं कृत्वा, कृतोद्वर्तनं एलादिचूर्णकल्ककषायैरुद्वर्त्य कृतनन्द्यावर्ताद्यवतारणं । किं कृत्वा, सिक्त्वा अभिषिच्य । कैः, अम्बुरसाज्यदुग्धदधिभिः अम्बूनि तीर्थोदकानि, रसा इक्षु-द्राक्षाम्रादिनिर्यासाः, आज्यानि हैयङ्गवीनादिघृतानि, दुग्धानि गव्यादिक्षीराणि, दधीनि माहिषादीनि—अम्बूनि, च रसाश्च आज्यानि च दुग्धानि च दधीनि चाम्बुरसादीनि पञ्च स्नानीयद्रवद्रव्याणि तैः क्रमेण जिनपतिमभिषिच्येति संबंधः । किं कृत्वा, नीराज्य पूजापुरःसरं मृत्सागोमयभूतिपिण्डदूर्वादर्भपुष्पाक्षतसचन्दनोदकैर्नीराजनं प्रापय्य । कथं यथा भवति, इष्टदिक् इष्टा यज्ञांशं प्रापिता जिनयज्ञमभिवर्द्धयन्तो वाऽनुमोदिता दिशस्तत्स्था दिक्पाला दशेन्द्रादयो यत्र नीराजनकर्माणि तदिष्टदिक् । अथवा इष्टा दिशो येन सोऽयमिष्टदिग्यष्टा । किं कृत्वा, न्यस्य स्थापयित्वा । कस्यां, पीठ्यां स्नपनपीठस्योपरि । किंविशिष्टायां, चतुष्कुंभयुक्कोणायां चत्वारः कुंभयुजः पूर्णकलशोपेताः कोणा यस्याः सा चतुष्कुंभयुक्कोणा तस्यां । पुनः किंविशिष्टायां, सकुशश्रियां दर्भैश्चन्दननिर्मितश्रीकाराक्षरेण च सहितायां । श्रियामित्युपलक्षणं तेन ह्रीकारोऽपि लेख्यः । अन्ये तु अक्षतनिर्मितं श्रीकारमेवाहुः । तदुक्तं । "निस्तुषनिर्व्रणनिर्मलजलार्द्रशालीयतण्डुलालिखितं । श्रीकामः श्रीनाथं श्रीवर्णं स्थापयाम्युच्चैः" ॥ किं कृत्वा, विशोध्य रत्नाम्बुकुशाग्निना सन्तर्पणविधिभिः शोधयित्वा । कां, तदिलां स्नपनभूमिं । किं कृत्वा, आश्रुत्य कर्तव्यतया प्रतिज्ञाय । किं तत्, स्नपनमभिषेकं । अत्र आश्रुत्य स्नपनमिति प्रस्तावना, विशोध्येत्यादि पुराकर्म, न्यस्येति स्थापना, अन्तमाप्येति सन्निधापन, इष्टदिगित्यादि पूजेति प्रतिपत्तव्यम् । षड्विधं हि देवसेवनमाहुः । तद्यथा—प्रस्तावना पुराकर्म स्थापना सन्निधापनम् । पूजा पूजाफलं चेति षड्विधं देवसेवनम् ॥ १ ॥ एतज्जिनस्नपनादिविधानसूचनामात्रं विस्तरतस्त्वेतत्पूर्वाचार्यकृतस्नानशास्त्रेप्यस्मत्कृतनित्यमहोदयाख्य-

स्नानशास्त्रे च द्रष्टव्यम् ॥ २२ ॥

यज्ञान्तरोपदेशार्थमाह—

सम्यग्गुरूपदेशेन सिद्धचक्रादि चार्चयेत् ।
श्रुतं च गुरुपादांश्च को हि श्रेयसि तृप्यति ॥ २३ ॥

टीका—अर्चयेच्चासौ। किं तत्, सिद्धचक्रादि सिद्धचक्रं लघु बृहद्वा आदिशब्देन पार्श्वनाथयन्त्रं गणधरवलयं सारस्वतयन्त्रमन्यद्वा सम्यक्त्वसंयमाविरोधेन दृष्टादृष्टफलप्रसाधकत्वेन जिनशासने प्रसिद्धं। एतच्च रहस्यभावात् पदस्थध्यानप्ररूपणावसरे प्रपंचयिष्यते। केन तत्पूजयेत्, सम्यग्गुरूपदेशेन अन्यथा नैष्फल्यप्रत्यवायबाहुल्यसम्भवात्। तथा श्रुतमर्चयेत्। गुरोश्च दीक्षकाचार्यस्य पादान् तृतीयोऽपि चशब्दस्त्रयाणामपि पूज्यानां तुल्यकक्षतासूचनार्थं। कुत एतद्यज्ञान्तरप्रदर्शनं? जिनयज्ञेनैव सर्वमनोरथपरिपूर्तिसंसिद्धेरिति शङ्कायामिदमाह—को हीत्यादि। हि यस्मात् कस्तृप्यति तृप्तमात्मानं मन्यते। कस्मिन्, श्रेयसि अभ्युदयनिःश्रेयसाधनार्थे कर्मणि ॥ २३ ॥

ततः पात्राणि सन्तर्प्य शक्तिभक्त्यनुसारतः ।
सर्वांश्चाप्याश्रितान् काले सात्म्यं भुञ्जीत मात्रया ॥ २४ ॥

टीका—ततो जिनयज्ञादिनिर्वर्तनानन्तरं पात्रसन्तर्पणादि कृत्वा भुञ्जीत अश्नीयादसौ। किं तत्, सात्म्यं वस्तु। सात्म्यलक्षणं यथा "पानाहारादयो यस्य विरुद्धाः प्रकृतेरपि। सुखित्वायावकल्पंते तत्साम्यमिति कथ्यते।" कया भुञ्जीत, मात्रया सुखजरणलक्षणया यदाह—"सायं प्रातर्वा वन्हिमनवसादयन् भुञ्जीत" इति। अपि च—"गुरूणामर्धसौहित्यं लघूनां नातितृप्तता। मात्रप्रमाणं निर्दिष्टं सुखं तावद्विजीर्यति॥" क मात्रया सात्म्यं भुञ्जीत? काले बुभुक्षाकाले। भोजनकालः तद्विस्तरशास्त्रं त्विदं—"प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे, विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति ॥ तथाऽग्नावुद्रिक्ते विशदकरणे देहे च सुलघौ, प्रयुञ्जीताहारं विधिनियमितं कालः स हि मतः।"

किं कृत्वा, सन्तर्प्य सम्यक् प्रीणयित्वा । कानि, पात्राणि प्रागुक्तलक्षणानि । कथं, ततस्तदनन्तरं । कस्मात्, शक्तिभक्त्यनुसारतः शक्तिभक्त्योरनतिक्रमेण । न केवलं पात्राणि सन्तर्प्य सर्वानप्याश्रितांश्च तिरश्चोऽपि स्वयंपरिगृहीतान् सन्तर्प्य सन्तोष्येत्यर्थः । कालविशेषोपदेशेन च माध्यान्हिकदेवपूजाभोजनयोर्नास्ति कालनियम इति बोधयति । तीव्रबुभुक्षायां हि मध्याह्नादर्वागपि गृहीतप्रत्याख्यानं तिरयित्वा देवपूजादिपूर्वकं भोजनं कुर्वन् न दुष्यति॥२४॥

लोकद्वयाविरोधीनि द्रव्यादीनि सदा भजेत् ।
यतेत व्याध्यनुत्पत्तिच्छेदयोः स हि वृत्तहा ॥ २५ ॥

टीका--भजेत् सेवेतायं । कानि, द्रव्यादीनि द्रव्यक्षेत्रकालभावकर्मसहायादीनि । किंविशिष्टानि, लोकद्वयाविरोधीनि इहलोके परलोके च पुरुषार्थानुपघातकानि । क, सदा सर्वदा तथा यतेत तात्पर्यं कुर्यात् । कयोः, व्याध्यनुत्पत्तिच्छेदयोः व्याधेः ज्वरादिरोगस्यानुत्पत्तावप्रादुर्भावे छेदे च निवर्तने । कुत इत्याह--हि यस्मात् भवति । कोऽसौ, स व्याधिः । कथम्भूतो, वृत्तहा संयमस्य हन्ता ॥ २५ ॥

तदुत्तरकरणीयनिर्णयार्थमाह—

विश्रम्य गुरुसब्रह्मचारिश्रेयोऽर्थिभिः सह ।
जिनागमरहस्यानि विनयेन विचारयेत् ॥ २६ ॥

टीका--ततश्च विचारयेत् इदमित्थं भवति न वेति सम्प्रधारयेदसौ । गुरुमुखात् श्रुतान्यपि शास्त्ररहस्यानि परिशीलनाविकलानि न चेतसि सुदृढप्रतिष्ठानि भवन्तीति मनसि कृत्वा । कानि, जिनागमरहस्यानि अर्हत्सिद्धान्तस्यैदम्पर्याणि । केन, विनयेन प्रश्रयेण । कथं, सह । कैः गुर्वादिभिः । किं कृत्वा, विश्रम्य भोजनश्रममपनीय । गुरवोऽत्र शास्त्रोपदेष्टारः । सब्रह्मचारिणः सहाध्यायिनः । श्रेयोऽर्थिन आत्महितकामाः ॥ २६ ॥ ततश्च—

सायमावश्यकं कृत्वा कृतदेवगुरुस्मृतिः ।

न्याय्ये कालेऽल्पशः स्वप्याच्छक्त्या चाब्रह्म वर्जयेत् ॥२७॥

टीका—स्वप्यात् शयीतासौ । कियत्, अल्पशः अल्पं । क्व, काले । किंविशिष्टे, न्याय्ये न्यायादनपेते । न्याय्यश्च कालो रात्रेः प्रथमयामोऽर्द्धरात्रं वा शरीरसात्म्येन अल्पश इति च विशेषणमिति विधिः । सविशेषेण हि विधिनिषेधौ विशेषणमुपसंक्रामत इति न्यायात् । स्वप्यादिति च विशेष्यं । न च तत्र विधिर्दर्शनावरणीयकर्मोदयेन स्वापस्य स्वतः सिद्धत्वात् । अल्पमपि च प्रशस्तं यथा भवति तथा स्वप्यादिति शसा द्योत्यते । तेन रोगमार्गश्रमादौ बह्वपि स्वप्यादिति विधिः । किंविशिष्टः सन्, कृतदेवगुरुस्मृतिः कृता देवस्यार्हतो गुरूणां च तदुपदेष्टॄणां च स्मृतिर्मनस्यारोपणं येन स तथोक्तः । किं कृत्वा, कृत्वा । किं तत्, आवश्यकं देवार्चनं भूमिकौचित्त्येन च सामयिकादिषट्कं । कदा, सायं संध्यासमये । तथा वर्जयेदसौ । किं तत्, अब्रह्म मैथुनं । कया, शक्त्या आत्मनः संयमसामर्थ्येन । उपलक्षणं चैतत् तेन यावन्न सेव्या विषयास्तावत्ताना प्रवृत्तितो व्रतयेदिति वचनाद्भोगादिनियमं विना क्षणमपि स्थातुं न युक्तमिति स्मारयति ॥ २७ ॥

अथ परिणतायां रात्रौ निद्राच्छेदे सति निर्वेदादिभावनां कुर्यादित्युपदेशार्थं सप्तदश श्लोकानाह—

निद्राच्छेदे पुनश्चित्तं निर्वेदेनैव भावयेत् ।
सम्यग्भावितनिर्वेदः सद्यो निर्वाति चेतनः ॥ २८ ॥

टीका—भावयेत् संस्कुर्यादसौ । किं तत्, चित्तं मनः । केन, निर्वेदेन संसारशरीरविषयवैराग्येण । न पुनरर्थादिचिन्तयेत्येवशब्दार्थः । क्व सति, निद्राच्छेदे स्वापनिवृत्तौ । पुनःशब्दो विशेषार्थः । यतो निर्वाति प्रशमसुखमनुभवति । कोऽसौ, चेतन आत्मा । कथं, सद्यस्तत्क्षण एव । किंविशिष्टः सन्, सम्यग्भावितनिर्वेदः यथावदभ्यस्तवैराग्यः ॥ २८ ॥

संसारनिर्वेदार्थमाह—

दुःखावर्ते भवाम्भोधावात्मबुद्ध्याऽध्यवस्यता।
मोहाद्देहं हहाऽऽत्माऽयं बद्धोऽनादि मुहुर्मया ॥ २९ ॥

टीका--हहा कष्टं। बद्धो ज्ञानावरणादिकर्मपरतंत्रीकृतः। कोसौ,अवयं स्वसंवेदनवेद्य आत्मा जीवः। केन, मया आत्मना। कथं, मुहुर्वारंवारं। कथं, अनादि आदिरहितं। किं कुर्वता, अध्यवस्यता निश्चिन्वता। कं, देहं। कया, आत्मबुद्ध्या देह एवाहमिति संकल्पेन। कस्मात्, मोहात् अविद्यासंस्कारात्। क्व, भवाम्भोधौ संसारसागरे। किंविशिष्टे, दुःखावर्ते दुःखानि नारकादिभववेदना आवर्ता जलभ्रमणानीव अनियतोत्थायत्वाद् दुर्निवारत्वाच्च यत्र स दुःखावर्तस्तस्मिन् ॥ २९ ॥

तदिदानीं किं करोमीत्याह--

तदेनं मोहमेवाहमुच्छेत्तुं नित्यमुत्सहे।
मुच्येतैतत्क्षये क्षीणरागद्वेषः स्वयं हि ना ॥ ३० ॥

टीका--तत्तस्मादुत्सहे प्रयतेऽहं। किं कर्तुमुच्छेत्तुं क्षपयितुं। कं, एनं प्रतीयमानं मोहमज्ञानं। न देहादिकमित्येवशब्दार्थः। कथं, नित्यं सन्ततं हि यस्मात् मुच्येत मुक्तो भवेत्। कोऽसौ, ना पुरुषो न प्रधानादिकं। किंविशिष्टः सन्, क्षीणरागद्वेषः। कथं, स्वयमात्मना प्रयत्नमन्तरेणैव। क्व सति, एतत्क्षये मोहापगमे सति मोहमूलत्वाद्रागद्वेषयोः ॥ ३० ॥

इदानीं बन्धमूलामनर्थपरम्परां परामृशन् पुनर्बंधानुबन्धिनं विषयसेवाभिनिवेशं संहर्तुं प्रतिज्ञां करोति--

बन्धाद्देहोऽत्र करणान्येतैश्च विषयग्रहः।
बन्धश्च पुनरेवातस्तदेनं संहराम्यहम् ॥ ३१ ॥

टीका--भवति। कोऽसौ, देहः शरीरं। कस्मात्, बन्धात् पुण्यपापात्मककर्मविपाकात्। अत्र च देहे भवन्ति। कानि, करणानि स्पर्शनादीन्द्रियाणि। भवति। कोऽसौ, विषयग्रहः। स्पर्शाद्यर्थपरिच्छेदग्रहः। कैः, एतैः

करणैः । तथा भवति । कोऽसौ, बन्धः शुभाशुभकर्मपुद्गलादानं । कस्मात्, अतः विषयग्रहात् । कथं, पुनरेव भूयोऽपि । यत एवं तत्तस्मात् संहरामि निर्मूलयाम्यहं । कं, एनं बन्धमूलं विषयग्रहम् ॥ ३१ ॥

विषयेष्वपि योऽपदभिलाषस्थात्यन्तं दुर्निवारत्वात् तन्निग्रहोपायमनुचिन्तयन्नाह—

ज्ञानिसङ्गतपोध्यानैरप्यसाध्यो रिपुः स्मरः ।
देहात्मभेदज्ञानोत्थवैराग्येणैव साध्यते ॥ ३२ ॥

टीका—साध्यते निगृह्यते । कोऽसौ, स्मरः मैथुनसंज्ञासंस्कारोद्बोधः । किंविशिष्टो, रिपुः ऐहिकामुत्रिकपुरुषार्थभ्रंशहेतुतयाऽपकर्ता । केन कर्त्रा करणेन वा, देहेत्यादि देहश्चौदारिकादिशरीरत्रयं आत्मा जीवानंदमयः पुमान् देहश्च आत्मा च देहात्मानौ तयोर्भेदेन पृथक्त्वेन भेदस्य वा ज्ञानं प्रतिपत्तिस्तस्मादुत्था उत्थानमुद्भवो यस्य तद्देहात्मभेदज्ञानोत्थं तच्च तद्वैराग्यं च भवाङ्गभोगनिर्वेद उपेक्षा वा तेनैवापदीर्ष्यादिसमुत्थेन वैराग्येणात्मावमाननलक्षणेन । किंविशिष्टोऽसौ, असाध्यः साधयितुमशक्यो व्यभिचारदर्शनात् । कैः, ज्ञानिसंगतपोध्यानैः ज्ञानिनामात्मदर्शिनां संगः संसर्गो ज्ञानिसंगः, तपः कायक्लेशादिलक्षणमाचरणं, ध्यानं पदपदार्थादिचिन्तनं, ज्ञानिसङ्गश्च तपश्च ध्यानं च ज्ञानिसङ्गतपोध्यानानि तैर्व्यस्तैः समस्तैर्वा बाह्यलोकानां कन्दर्पशत्रुनिग्रहकरत्वेन प्रसिद्धैः । अपिर्विस्मये ॥ ३२ ॥

आत्मदेहान्तरज्ञानार्थितया सन्यस्तसमस्तसङ्गानां प्राचां श्लाघापूर्वकमात्मानं कलत्रमात्रत्यागेऽप्यसमर्थं गर्हमाणः प्राह—

धन्यास्ते येऽत्यजन् राज्यं भेदज्ञानाय तादृशम् ।
धिङ्मादृशकलत्रेच्छातंत्रगार्हस्थ्यदुःस्थितान् ॥ ३३ ॥

टीका—ते भरतसगरादयो भवन्ति । किंविशिष्टाः, धन्याः तपःश्रुताभ्यासात्मसात्कृत—सुकृतविशेषफलोपभोगान्ते, सुदुस्त्यजसाम्राज्यलक्ष्मीपरित्या-

गितया महतामपि श्लाघ्या ये किं, ये अत्यजन् जरत्तृणमिव त्यक्तवन्तः । किं तत्, राज्यं । किंविशिष्टं, तादृशं पूजार्थाज्ञैश्वर्यवीर्यपरिजनकामभोगादिभिर्भुवनत्रयातिशायि । कस्मै, भेदज्ञानाय देहात्मव्यतिरेकबोधार्थं । इदानीमात्मदृष्टान्तेन विषयाभिलाषपरतंत्रतया दोषभूयिष्टं गार्हस्थ्यं जानतोऽपि त्यक्तुमशक्तांस्तिरस्कुर्वन्नाह—धिगित्यादि । धिग् निन्दामीत्यर्थः । कान्, मादृशः अहमिव दृश्यन्ते विषयाशावशवर्तितयोपलभ्यन्त इति मादृशः । मया सदृशानाविर्भूततत्त्वज्ञानत्वेऽपि विषयोपभोगपरित्यागासमर्थान् । किंविशिष्टान्, यतः कलत्रेच्छेत्यादि । कलत्रस्य भार्याया इच्छा मनोरथः छन्द इति यावत् कलत्रेच्छा सैव तन्त्रं प्रधानं यत्र तत्कलत्रेच्छातन्त्रं अथवा कलत्रे इच्छा अभिलाषः कलत्रेच्छा तस्यां तन्त्रमायत्तं कलत्रेच्छातन्त्रं तदधीनवृत्ति गृहस्थस्य नित्यनैमित्तिकानुष्ठानस्थस्य द्वितीयाश्रमिणो भावः कर्म वा गार्हस्थ्यं । कलत्रेच्छातन्त्रं च तद्गार्हस्थ्यं च कलत्रेच्छातन्त्रगार्हस्थ्यं तेन दुःस्थिता दुरवस्था विविधदुराधिबाधाकुलितास्तान् । हेतुपरत्वेनायं निर्देशः ॥ ३३ ॥

स्वयमभिलाष्यमाणाया उपशमश्रियः स्त्रियाश्चात्माकर्षणविषये बलाबलं चिन्तयति—

इतः शमश्रीः स्त्री चेतः कर्षतो मां जयेन्न का ।
आ ज्ञातमुत्तरैवात्र जेत्री या मोहराट्चमूः ॥ ३४ ॥

टीका-कर्षतः स्वस्याभिमुखं नयतो द्वे । कं, मां अतीन्द्रियैन्द्रियकसुखविशेषज्ञं । तत्र तावत् कर्षति । काऽसौ, शमश्रीः प्रशमसुखसम्पत् । कं, मां । क्व, इतः अस्मिन्नेकस्मिन्पक्षे । तथा कर्षति स्त्री मां । क्व, इतोऽन्यस्मिन्पक्षे नुर्वितर्के । अनयोः का कतरा जयेत् मदाकर्षणे बलवती भवेत् । संशयोऽत्र मे । अथवा आ स्मृतमाप्तोपदेशबलादनुभूतमेतयोर्बलाबलम् । सम्प्रत्यपि ज्ञानं निश्चितं । यदि वा आ संतापप्रकोपयोर्व्याख्येयः । आद्यपक्षे भविष्यति । कासौ, अत्र एतयोर्मध्ये उत्तरैव स्त्री, न शमश्रीः । किंविशिष्टा,

जेत्री मदाकर्षणे शमश्रियोऽभिभावित्री न स्त्रियाः शमश्रीः । या किं, या निश्चिता मया । किंविशिष्टा, मोहराट्चमूः मोहोऽत्र चारित्रावरणोदयः स एव राड् राजा अधृष्यभावत्वात् मोहराजश्चमूः सेना । यथा राजा प्रतापित्वेव प्रतिपक्षं सेनया जयति तथा मोहः स्त्रियेति भावः ॥ ३४ ॥

कलत्रदुस्त्यजत्वं भावयंति--

चित्रं पाणिगृहीतीयं कथं मां विष्वगाविशत् ।
यत्पृथग्भावितात्माऽपि समवैम्यनया पुनः ॥ ३५ ॥

टीका—चित्रं यस्याः खलु पाणिर्गृह्यते सा कथं सर्वात्मना ग्राहकात्मानं प्रविशतीति विस्मयो मे । कथं केन प्रकारेण आविशत् प्रविष्टा । काऽसौ, इयं दृश्यमाना पाणिगृहीती परिणीतस्त्री । कं, मां परिणेतारं । कथं, विष्वक् समन्तात् । मामात्ममयं कृतवतीत्यर्थः । अत्रोपपत्तिमाह-यद्यस्मात् । समवैमि तादात्म्यं प्रतिपद्ये अहं । कथं, सह । कया, अनया अहमेवेयमियमेवाहमित्यभेदाध्यवसायपरिणतो भवामीत्यर्थः। कथं, पुनर्भूयः। किंविशिष्टोऽपि सन्, पृथग्भावितात्माऽपि पृथगेतस्या भेदेन इयमन्या अहमन्य इति कोऽनया सह ममाभेदप्रत्यय इति तत्त्वज्ञानेन भावितो मुहुर्मुहुश्चिन्तित आत्मा अहंकारास्पदमन्तस्तत्त्वं येन स तथोक्तः। किं पुनर्मोहवशादभेदभावनापरिगत इत्यपिशब्दार्थः।३५

स्त्रीनिवृत्तिमात्मनो निरूप्य वित्तमुपपत्त्या प्रतिक्षिपन्नाह—

स्त्रीतश्चित्त निवृत्तं चेन्ननु वित्तं किमीहसे ।
मृतमण्डनकल्पो हि स्त्रीनिरीहे धनग्रहः ॥ ३६ ॥

टीका—चेदिति पराभिप्रायद्योतने । हे चित्त अंतःकरण । यदि निवृत्तं विवेकबलाद्व्यावृत्तं । किं तत् कर्तृ, त्वं । कस्मात्, स्त्रीतः स्त्रियाः सकाशात् स्त्रियं नेच्छामीत्यभिप्रैषि यदि त्वमित्यर्थः । ननुरमर्षे न मृष्याम्यहमिमं त्वदभिप्रायमित्यर्थः । तदा किमिति प्रश्नाक्षेपे तदा किमीहसे किं वाञ्छसि त्वं हे चित्त । किं तद्वित्तं धनं । स्त्रीनिवृत्तस्य धनमिच्छतः किमनुपपन्नमित्यत्राह—हि

यस्माद् भवति । कोऽसौ, धनग्रहः द्रविणार्जनरक्षणावर्धनाभिनिवेशो धनस्वीकारो वा । किंविशिष्टो, मृतमण्डनकल्पः मृतस्य मण्डनमिव । क, स्त्रीनिरीहे स्त्रियां निःस्पृहे । यथा मृतकशरीरे क्रियमाणं मण्डनं तद्भोक्तुरभावान्निष्फलं तथा स्त्रियादिविषयविमुखस्य परिगृह्यमाणं धनमिति भावः । धनस्य हि विषयसुखसाधनं फलत्वेन प्रसिद्धं । तत्र च कामिन्य आलम्बनविभावत्वेन मुख्याः सौधोद्यानादयश्चोद्दीपनविभावत्वेन गौणाः । यस्य च नास्ति स्त्रियामभिलाषस्तस्य किमितरविषयैरिति ॥ ३६ ॥

एवं निर्वेदं भावयतः परमसामायिकभावनार्थं सप्तश्लोकीमाह—

इति च प्रतिसन्दध्यादुद्योगं मुक्तिवर्त्मनि ।
मनोरथा अपि श्रेयोरथाः श्रेयोऽनुबन्धिनः ॥ ३७ ॥

टीका—प्रतिसन्दध्यात् पुनः संयोजदेदसौ । कं, उद्योगमुत्साहं । क, मुक्तिवर्त्मनि मोक्षमार्गे । कथं, इति वक्ष्यमाणेन प्राणकायबलास्थिरत्वाद्यनुचिन्तनलक्षणेन प्रकारेण । चः समुच्चये । न केवलं संसारादिनिर्वेदं तथा भावयेदित्थं मोक्षमार्गेऽभियोगं च प्रतिसन्दध्यादित्यर्थः । अनाचरणतो मनोरथाः स्वप्नराज्यसमाः इति विप्रतिपन्नं बोधयितुमिदमाह—यतो भवन्ति । के, मनोरथाः अशक्यप्राप्त्यर्थविषयाभिलाषाः । किं पुनस्तदर्थानुष्ठानप्रवृत्तय इत्यपिशब्दार्थः । कीदृशा भवन्ति, श्रेयोऽनुबन्धिनो भवे भवे अभ्युदयसम्पादिनः प्रभूतपुण्यबन्धनत्वात् । किमाश्रितास्ते तथा भवन्तीत्याह—श्रेयोरथाः श्रेयो निःश्रेयसं रथः स्यंदनो येषां ते श्रेयोरथाः मोक्षारूढा इत्यर्थः । तदुक्तं—यत्र भावः शिवं धत्ते द्यौः कियद्दूरवर्तिनीति ॥ ३७ ॥

तत्रायुःकायमयत्वाज्जीवितस्य तदपायानुध्यानमुखेन जीवितव्योच्छेदं भावयन्प्रौढ्योक्त्या स्वार्थसिद्धिभ्रंशं भावयति—

क्षणे क्षणे गलत्यायुः कायो ह्रसति सौष्ठवात् ।
ईहे जरां नु मृत्युं नु सध्रीचीं स्वार्थसिद्धये ॥ ३८ ॥

टीका—गलति क्षीयते एकदेशेनापगच्छति। किं तत, आयुः भवधारण-कारणं कर्म। क्व, क्षणे क्षणे प्रतिक्षणं। तथा ऱ्हसति देशतश्च्यवति। कोऽसौ, कायः शरीरं। कस्मात्, सौष्ठवात् स्वार्थक्रियाकरणसामर्थ्यात्। क्षणे क्षणे इत्यत्रापि योज्यं। नुर्वितर्के। किमर्थं—तत्कमीहे वाञ्छाम्यहं। कां, जरां सर्वांगशक्तिक्षपणलक्षणां विस्रंसां। किं वा—मृत्युं निःशेषायुःक्षयलक्षणं मरणं। किंविशिष्टां, सध्रीचीं आत्मनः सहायभूतां. कस्यै, स्वार्थसिद्धये स्वाभि-प्रेतार्थनिष्पत्त्यर्थं। पुरुषार्थसाधकेष्वायुः कायश्च प्रधानं कारणं। तच्च प्रति-क्षणं विशरारुतया निश्चितं चेत्सर्वथा पुरुषार्थभ्रंशहेतुतया प्रसिद्धाभ्यां जरामृ-त्युभ्यां तत्संभाव्येतेति वक्रभणित्या चोदयति ॥ ३८ ॥

जिनधर्मसेवासहचारिणीरापदोऽभिनन्द्य तद्विरहभाविनीः सम्पदोऽपि प्रतिक्षिपन्संगत्यागे दार्ढ्यं भावयति—

क्रियासमभिहारोऽपि जिनधर्मजुषो वरम् ।
विपदां सम्पदां नासौ जिनधर्ममुचस्तु मे ॥ ३९ ॥

टीका—वरं भवतु सोऽपि श्लाघ्य इत्यर्थः। कोऽसौ, क्रियासमभिहारः पौनःपुन्यं भृशत्वं वा। वरं सकृद्भवनं मंदत्वं चेत्यपिशब्दार्थः। कासां, विपदां शारीरमानसदुःखानां परिषहोपसर्गाणां वा। कस्य, मे मम। किंवि-शिष्टस्य सतो, जिनधर्मजुषः जिनोक्तं जिनानुष्ठितं वा धर्मं शुद्धचिदानंद-रूपात्मपरिणतिलक्षणं प्रीत्या सेवमानस्य। न तु न पुनर्वरं। कोऽसौ, असौ क्रियासमभिहारः। कासां, संपदां सर्वेन्द्रियार्थसुखसाधनानां विभूतीनां कस्य, मे। किंविशिष्टस्य सतो, जिनधर्ममुचो यथोक्तजिनधर्मरहितस्य ॥३९॥

श्रमणकर्माभ्यासेन अन्यगम्यं सर्वत्र साम्यं कामयते—

लब्धं यदिह लब्धव्यं तच्छ्रामण्यमहोदधिम् ।
मथित्वा साम्यपीयूषं पिबेयं परदुर्लभम् ॥ ४० ॥

टीका—लब्धं प्राप्तं तन्मया कलत्रसंपदादिकं । यत् किं, यल्लब्धव्यं प्राप्तव्यं मया धन्यैर्वा । क्व, इह नृजन्मनि गृहाश्रमे वा । यत एवं कृतार्थोऽस्मि तत्तस्मात्पिबेयं अध्यात्ममनुभवेयं अहं । किं तत, साम्यपीयूषं सर्वत्र समत्वममृतमिव । किं कृत्वा, मथित्वा अभ्यस्य विलोड्य च । कं, श्रामण्यमहोदधिं श्रमणानां यतीनां कर्म मूलोत्तरगुणाचरणलक्षणं श्रामण्यं महोदधिरिव अनर्घ्यरत्नोत्पत्तिनिमित्तत्वात् दुरवगाहत्वात् दुर्गमपारत्वाच्च । इयमत्र भावना—यथा किल सुरासुरैः क्षीरोदधिं विलोड्य तत उद्धृतममृतं पीतमिति श्रूयते तथा श्रामण्यं भावयित्वा उपेक्षालक्षणं चारित्रमहमात्मनि परिणमयितुमर्हामि । कीदृशं द्वयमपि, परदुर्लभं परैर्जिनमार्गानभिज्ञैः सुरासुरभिन्नैश्च लोकैर्लब्धुमशक्यं जिनसमयाभिज्ञैरपि वा परमत्यर्थं दुर्लभं कतिपयैरेव तैरपि प्राप्यमित्यर्थः ॥ ४० ॥

तदेव भूयो भावयति—

पुरेऽरण्ये मणौ रेणौ मित्रे शत्रौ सुखेऽसुखे ।
जीविते मरणे मोक्षे भवे स्यां समधीः कदा ॥ ४१ ॥

टीका—कदा कस्मिन्काले । स्यां भवेयं भवितुमर्हाम्यहं भविष्यामीति वा । किंविशिष्टः, समधीः तुल्यमनाः । क्व क्व, पुरे प्रीतिकारणे चातुर्वर्ण्यसमृद्ध्यधिष्ठाननगरे । तथा तद्विपरीते अरण्ये अटव्यां । एतयोर्द्वयोरपि रागद्वेषनिबन्धनयोरुपेक्षापरिणतः कदा भविष्यामीत्यर्थः । एवमुत्तरत्रापि योज्यं । तथा मणौ वज्रादिरत्ने. रेणौ रजसि । तथा मित्रे सुहृदि शत्रौ चापकर्तरि । तथा सुखे आल्हादनाकारे असुखे च दुःखे देहमनस्तापरूपे । तथा जीविते पुरुषार्थसिद्धिहेतावायुषि मरणे च तद्विपरीते । तथा मोक्षे अनन्तसुखस्वरूपे भवे च तद्विपरीते । अयमत्र विशेषः—पुरारण्यादिषु तुल्यमतित्वमन्यस्यापि भवेत् । असौ तु परमवैराग्योपगतो मोक्षभवयोरपि निर्विशेषमतित्वमर्थयते । 'मोक्षे भवे च सर्वत्र निस्स्पृहो मुनिसत्तम' इति श्रुतेः ॥ ४१ ॥

यतिधर्मचर्याकाष्ठाधिरोहणमाशंसति—

मोक्षोन्मुखक्रियाकाण्डविस्मापितबहिर्जनः ।
कदा लप्स्ये समरसस्वादिनां पंक्तिमात्मदृक् ॥ ४२ ॥

टीका—कदा कस्मिन्काले । लप्स्ये प्राप्स्याम्यहं । कां, पंक्तिं लक्षणया सजातीयत्वं । केषां, समरसस्वादिनां समरसं ध्यातृध्येयध्यानानामेकीभावे सत्यानन्दं स्वादयन्त्यभीक्ष्णं भूयोभूयोऽनुभवन्तीति समरसस्वादिनो घटमानयोगा निष्पन्नयोगा वा मुमुक्षवः समरसस्वादिनस्तेषां । किंविशिष्टः सन्, आत्मदृक् आत्मदर्शी भवन् । कथंभूतो भूत्वा, मोक्षोन्मुखेत्यादि—मोक्षे अनन्तज्ञानादिचतुष्टयाविर्भावस्वभावे निःश्रेयसि उन्मुखा अभिमुखा उद्यतास्तेषां क्रियाकाण्डगुरुकुलोपासनक्लेशातापनादियोगकायक्लेशादि तेन विस्मापितोऽनन्यसम्भाव्यतया विस्मयं नीतो बहिर्जनो बहिरात्मलोको येन स तथोक्तः ॥ ४२ ॥

योगपरमकाष्ठामभिकांक्षति—

शून्यध्यानैकतानस्य स्थाणुबुद्ध्याऽनडुन्मृगैः ।
उद्घृष्यमाणस्य कदा यास्यन्ति दिवसा मम ॥ ४३ ॥

टीका—कदा कस्मिन् योगाभ्याससमये । यास्यन्ति गमिष्यन्ति । के, दिवसा अहोरात्राः । कस्य, मम तत्त्वज्ञानवैराग्यसम्पन्नस्य । किंविशिष्टस्य सतः, शून्यध्यानैकतानस्य निर्विकल्पसमाधिपरिणतस्य । पुनः किं क्रियमाणस्य, उद्घृष्यमाणस्य स्कन्धशृङ्गकण्डूयनगोचरीक्रियमाणस्य । कैः, अनडुन्मृगैः अनड्वाहः उत्कृष्टपशवः मृगा अरण्यचारिणो हरिणाः अनड्वाहश्च मृगाश्च अनडुन्मृगास्तैः । कया, स्थाणुबुद्ध्या स्थाणुः सीमाद्यर्थं ऊर्ध्वस्थितकाष्ठविशेषः स्थाणुरिति बुद्धिः कल्पना स्थाणुबुद्धिस्तया । यदा हि पुराद्बहिरहं कायोत्सर्गेण स्थास्यामि तदा स्वैरचारिणो वृषभादयः स्कन्धादिकण्डूत्याकुलितास्तत्कण्डूयनाय मां स्थाणुरयमिति मन्यमानाः स्कन्धादिभिरुद्घर्षिष्यन्ति । एव-

मरण्ये हरिणादयोऽपि। अहं पुनः पुरारण्ययोर्मुक्ताग्रहत्वेन तिष्ठन् शुद्धचिदानन्दमयं स्वात्मानमेवाधिवत्स्यामीति मनोरथोऽस्य महात्मनो लक्ष्यत इति॥४३॥

महानिशायां पुराद्बहिः प्रोषधोपवासव्रतान् कायोत्सर्गस्थितानुपसर्गजयेन योगादचलितान् प्राच्यश्रावकान् प्रशंसयति—

धन्यास्ते जिनदत्ताद्या गृहिणोऽपि न येऽचलन् ।
तत्तादृगुपसर्गोपनिपाते जिनधर्मतः ॥ ४४ ॥

टीका—वर्तन्ते । के, ते प्रसिद्धाः जिनदत्ताद्याः जिनदत्तो नाम श्रेष्ठी आद्यः प्रथमो येषां वारिषेणकुमारादीनां ते जिनदत्ताद्याः प्रोषधोपवासव्रतिनः। किंविशिष्टाः, धन्या सुकृतिनः तेभ्योऽहं स्पृहयामीत्यर्थः। ये किं, ये नाचलन् न चलिताः । कस्मात्, जिनधर्मतः जिनोक्ताज्जिनसेविताद्वा सामायिकात । किंविशिष्टाः सन्तो, गृहिणो द्वितीयाश्रमिणः । किं पुनरुत्तराश्रमिण इत्यपिशब्दार्थः। क्व सति, तदित्यादि। ते श्रुतप्रसिद्धास्तादृशोऽनन्यसदृशा उपसर्गाः शस्त्रप्रहारादयस्तेषां उप समीपे निपतनं नियतमवश्यम्भावि पतनं तत्तादृगुपसर्गोपनिपातस्तस्मिन् ॥ ४४ ॥

व्रतिकप्रतिमामुपसंहरंस्तदनुष्ठायिनः फलविशेषमाह—

इत्याहोरात्रिकाचारचारिणि व्रतधारिणि ।
स्वर्गश्रीः क्षिपते मोक्षश्रीर्षयेव वरस्रजम् ॥ ४५ ॥

टीका—क्षिपते मुंचति। काऽसौ, स्वर्गश्रीः यथास्वं सौधर्मादिकल्पलक्ष्मीः। कां, वरस्रजं वरोऽभिमतः पतिर्वरणं वा तत्स्वीकरणं वरार्था स्रक् माला वरस्रक् तां वरमालामित्यर्थः। क्व, व्रतधारिणि व्रतानि प्रागुक्तानि धारयत्यात्मनि निरतिचारतया स्थिरीकरोत्यभीक्ष्णमिति व्रतधारी व्रतिकप्रतिमारूढः श्रावकस्तस्मिन्। किंविशिष्टे, इत्येवमुक्तप्रकारेण। आहोरात्रिकमहोरात्रभवमाचारं ब्राह्ममुहूर्तोत्थानादिकं चरत्यनुतिष्ठतीत्येवंशीलस्तच्चारी तस्मिन्। अत्रोत्प्रेक्षामाह—मोक्षश्रीर्षयेवेति। मोक्षश्रियामीर्षाऽक्षान्तिर्मोक्षश्रीर्षा तया। इयमत्र

भावना—यथा काचिन्महाकुलीनकन्या पित्रादिभिरनुज्ञाता अभीष्टपताविमं नान्या स्वीकुर्यादिति बुद्ध्या वरमालां क्षिपति तथा तत्ताहृङ्महाश्रावके मोक्षश्रीर्षया स्वर्गश्रीरिति भद्रम् ॥ ४५ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासंज्ञायामादितश्चतुर्दश:
प्रक्रमाच्च षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

अथ सामायिकादिप्रतिमानवकस्वरूपनिरूपणार्थमुपक्रमते । तत्र यद्व्रतिकप्रतिमायां सामायिकं शीलतया निर्दिष्टं तदेवेह व्रतत्वेन प्रतिपद्यमानं प्रतिमारूपतां यातीति प्ररूपयन्नाह—

सुदृङ्मूलोत्तरगुणग्रामाभ्यासविशुद्धधीः ।
भजंस्त्रिसन्ध्यं कृच्छ्रेऽपि साम्यं सामायिकी भवेत् ॥ १ ॥

टीका—भवेत् भवितुमर्हति । कोऽसौ, व्रतिकः । कीदृशः, सामायिकी सामायिकप्रतिमावान् । किं कुर्वन्, भजन् सेवमानः । किं, तत्साम्यं मोहक्षोभविहीनमात्मपरिणामं । कथं, त्रिसन्ध्यं सन्ध्यात्रये । क्व सति, कृच्छ्रेऽपि परीषहोपसर्गसन्निपातेऽपि । कथम्भूतो भूत्वा, सुदृगित्यादि-दृक्सम्यक्त्वं मूलोत्तरगुणग्रा : प्रागुक्तलक्षणः दृक् च मूलोत्तरगुणग्रामश्च दृङ्मूलोत्तरगुणग्रामौ प्रशस्तौ निरतिचारौ दृङ्मूलोत्तरगुणग्रामौ सुदृङ्मूलोत्तरगुणग्रामौ । तयोरभ्यासोऽसकृत्प्रवृत्तिः तेन विशुद्धा प्रतिबन्धकापायात् प्रकृतसंयमानुष्ठानसाधनसामर्थ्यं प्राप्ता धीर्ज्ञानं यस्य स तथोक्तः ॥ १ ॥

व्यवहारसामायिकविध्युपदेशपुरःसरं निश्चयसामायिकं विधेयतयोपदिशति—

कृत्वा यथोक्तं कृतिकर्म सन्ध्यात्रयेऽपि यावन्नियमं समाधेः ।
यो वज्रपातेऽपि न जात्वपैति सामायिकी कस्य स न प्रशस्यः ।२।

टीका—स कस्य सामायिकार्थिनः शक्रादेर्वा न प्रशस्यः सर्वस्यापि श्लाघ्य इत्यर्थः । यः किं, यो नापैति न प्रच्यवते । कस्मात्, समाधेः रत्नत्रयैकाग्र्यलक्षणाद्योगात् । कदा, जातु कदाचिदपि । क्व सति, वज्रेऽपि पतति सति । किं पुनरन्यत्रोपसर्गकारणे । कियत्कालमित्याह—यावन्नियमं प्रतिज्ञावधि । एतन्निश्चयसामायिकं । किं कृत्वा, अनुष्ठाय । किं तत्, कृतिकर्म । किंविशिष्टं, यथोक्तं आवश्यकाध्याये योग्यकालेत्यादिप्रबन्धेन व्याख्यातं वंदनाकर्म । क्व, सन्ध्यात्रयेऽपि तिसृष्वपि सन्ध्यासु शक्त्याऽन्यदाऽपि । साम्यभावनानुज्ञानार्थो वा अपिशब्दः । एतद्व्यवहारसामायिकम् । २ ॥

निश्चयसामायिकशिखराधिरूढाय श्लाघते—

आरोपितः सामयिकव्रतप्रासादमूर्धनि ।
कलशस्तेन येनैषा भूरारोहि महात्मना ॥ ३ ॥

टीका—आरोपितः स्थापितः । कोऽसौ, कलशः । केन, तेन । क्व, सामायिकेत्यादि—समयः केशबन्धादिनियमितः कालस्तत्र भवं सामायिकं साम्यभावनं तदेव व्रतं सामायिकव्रतं तदेव प्रासादो देवगृहं दुरासदत्वात् दुरारोहत्वादिष्टसिद्धिनिबन्धनत्वाच्च तस्य मूर्धनि शिखराग्रे । येन किं कृतं, येन महात्मना गणधरचक्रधरेन्द्रादीनां स्पृहणीयेन आरोहि आरूढा । काऽसौ, एषा भूर्व्यवहारसामायिकपूर्वा निश्चयसामायिकप्रतिमा ॥ ३ ॥

स प्रोषधोपवासी स्याद्यः सिद्धः प्रतिमात्रये ।
साम्यान्न च्यवते यावत्प्रोषधानशनव्रतम् ॥ ४ ॥

टीका—स्याद्भवेत् । कोऽसौ, स श्रावकः । किंविशिष्टः, प्रोषधोपवासी प्रोषधोपवासप्रतिमावान् । यः किं, यो न च्यवते न भ्रश्यति । कस्मात्साम्यात् भावसामायिकात् । प्रोषधोपवासशीले तु तदुपरमे नामादिसामायिक-

पञ्चकस्याप्यनुचरणात् । कियत्कालं, यावत्प्रोषधानशनव्रतं प्रोषधोपवास प्रति-ज्ञाविषयीकृतान् षोडश यामान् । किंविशिष्टः सन्, सिद्धः निष्पन्नः प्रतीतो वा । क्व, प्रतिमात्रये दर्शनव्रतसामायिकप्रतिमासु ॥ ४ ॥

प्रोषधोपवासिनो निष्ठाकाष्ठां निर्दिशति—

त्यक्ताहाराङ्गसंस्कारव्यापारः प्रोषधं श्रितः ।
चेलोपसृष्टमुनिवद्भाति नेदीयसामपि ॥ ५ ॥

टीका—भाति प्रतिभासते । कोऽसौ, प्रोषधं श्रितः प्रोषधोपवासनिष्ठः ॥ किंवत्, चेलोपसृष्टमुनिवत् उपसर्गवशाद्वस्त्रेण वेष्टितो निर्ग्रन्थो यथा ब्रह्म-चर्यधारणशरीरादिममत्ववर्जनयोगात् । केषां, नेदीयसां पार्श्ववर्तिलोकानां बान्धवादीनां वा । विशेषतोऽन्येषामित्यपिशब्दार्थो विस्मये वा अपिशब्दः । किंविशिष्टः सन्, त्यक्तेत्यादि—आहारोऽशनादिश्चतुर्विधः अङ्गसंस्कारः स्नानोद्वर्तनवर्णकविलेपनपुष्पगन्धविशिष्टवस्त्राभरणादि व्यापारः साहचर्यात्साव-द्यारम्भः आहारश्चाङ्गसंस्कारश्च व्यापारश्चाहाराङ्गसंस्कारव्यापारास्त्यक्ताः सर्वा-त्मना प्रत्याख्यातास्ते त्रयो येन। एतेन आहारादित्रयवर्जनाद्ब्रह्मचर्यधारणाच्च चतुर्विधं प्रोषधव्रतमुक्तम् ॥ ५ ॥

सामायिकप्रोषधोपवासयोः प्रतिमाभावे युक्तिमाह—

यत्प्राक्सामायिकं शीलं तद्व्रतं प्रतिमावतः ।
यथा तथा प्रोषधोपवासोऽपीत्यत्र युक्तिवाक् ॥ ६ ॥

टीका—अस्ति । काऽसौ, युक्तिवाक् समाधानवचनं । क्व, अत्र सामायि-कप्रोषधोपवासयोः प्रतिमाभावविप्रतिपत्तौ । कथं, इति । किमिति, भवति । कोऽसौ, प्राक् शीलतया अभ्यस्तः प्रोषधोपवासोऽपि । किं, व्रतं । कस्य, प्रतिमावतः चतुर्थसंयमविशेषपदमनुतिष्ठतः श्रावकस्य । कथं, तथा । यथा किं, यथा भवति । किं तत्, सामायिकं । किं भवति, व्रतं सस्यवद्रक्षणीय-त्वात् । कस्य, प्रतिमावतः तृतीयसंयमविशेषपदमनुतिष्ठतः श्रावकस्य । यत्

किं, यत्सामायिकं भवति। किं, शीलं सस्यस्य वृत्तिरिव मुख्यतया रक्षणीयस्य व्रतस्य रक्षणकारणत्वात्। क्व, प्राक् व्रतप्रतिमानुष्ठानसमये॥ ६॥

परमकाष्ठाप्रतिपन्नान् प्रोषधोपवासिनः प्रशंसति—

निशां नयन्तः प्रतिमायोगेन दुरितच्छिदे।
ये क्षोभ्यन्ते न केनापि तान्नुमस्तुर्यभूमिगान्॥ ७॥

टीका—नुमः स्तुमो वयं। कान् तान्, तुर्यभूमिगान् चतुर्थीं संयमविशेषपदवीमारूढान्। ये किं, ये न क्षोभ्यन्ते समाधेर्न प्रच्याव्यन्ते। केन, केनापि परिषहेणोपसर्गेण वा। किं कुर्वन्तः, नयन्तो लङ्घयन्तः। कां, निशां पर्वरात्रिं। केन, प्रतिमायोगेन संयतवत् कायोत्सर्गावस्थानेन। कस्यै, दुरितच्छिदे अशुभकर्मनिर्जरणार्थं॥ ७॥

अथ सचित्तविरतस्थानं चतुःश्लोक्या व्याचष्टे—

हरिताङ्कुरबीजाम्बुलवणाद्यप्रासुकं त्यजन्।
जाग्रत्कृपश्चतुर्निष्ठः सचित्तविरतः स्मृतः॥ ८॥

टीका—स्मृतः। सूत्रज्ञैराम्नातः। कोऽसौ, सचित्तविरतश्रावकः। किं कुर्वन्, त्यजन् वर्जयन् अभक्षयन्नित्यर्थः। किं तत्, हरिताङ्कुरबीजाम्बुलवणादि अङ्कुरः प्ररोहः बीजं प्ररोहणद्रव्यं अम्बु जलं लवणं सैन्धवादि आदिशब्देन कन्दमूलफलपत्रकरीरादि, अंकुरश्च बीजं च अंकुरबीजमुपलक्षणात् त्वक्पत्रादि, हरितमम्लानाद्रावस्थं। हरितं च तदंकुरबीजं च हरितांकुरबीजं तच्चाम्बुलवणादि च हरितांकुरबीजाम्बुलवणादि। किंविशिष्टमप्रासुकमनग्निपक्वमित्यर्थः। अत्र च द्वितीयपादे नवाक्षरत्वं न दोषाय अनुष्टुभि नवाक्षरस्यापि पादस्य शिष्टप्रयोगे क्वापि क्वापि दृश्यमानत्वात्। यथा—ऋषभाद्या वर्द्धमानान्ता जिनेन्द्रा दश पंच चेत्यादिषु। अथवा हरिताङ्कुरबीजाब्लवणाद्यप्रासुकं त्यजन्निति पाठः। अत्र आपो जलं। किंविशिष्टोऽसौ, जाग्रत्कृपो यतः जाग्रती नित्यं हृदि स्फुरन्ती कृपा अनुकम्पा यस्य स जाग्रत्कृपो

दयामूर्तिरित्यर्थः । कथम्भूतो भूत्वा, हरिताङ्कुरादिकमभक्षयन्सचित्तविरतः स्मृतः। चतुर्निष्ठः चतसृषु पूर्वोक्तप्रतिमासु निष्ठा निर्वाहो यस्य स चतुर्निष्ठः॥८॥

जाग्रत्कृप इति समर्थयते—

पादेनापि स्पृशन्नर्थवशाद्योऽतिऋतीयते ।

हरितान्याश्रितानन्तनिगोतानि स भोक्ष्यते ॥ ९ ॥

टीका—भोक्ष्यते काक्वा न भक्षयिष्यतीत्यर्थः । कोऽसौ, स पञ्चमसंयमस्थानसाधनोद्यतः श्रावकः। कानि, हरितानि हरितावस्थवनस्पतीन्। किंविशिष्टानि, आश्रितानन्तनिगोतानि आश्रितानि संसक्तानि अनन्तानि निगोतानि निगोताख्याः साधारणशरीरवनस्पतिकायिका येषु तानि । उक्तं चार्षे ब्राह्मणसृष्टिप्रस्तावे—सन्त्येवानन्तशो जीवा हरितेष्वंकुरादिषु । निगोता इति सार्वज्ञं देवास्माभिः श्रुतं वचः ॥ यः किं, यः अतिऋतीयते पाक्षिकाद्यपेक्षया अतिशयेन घृणां करोति । किं कुर्वन्, स्पृशन् परामृशन् । कानि, तथाभूतहरितानि । केन, पादेन चरणेन किं पुनर्हस्तादिनेत्यपिशब्दार्थः । कस्मात्, अर्थवशात् प्रयोजनानुरोधात् । किं पुनः प्रयोजनाभावात् । प्रयोजनं विना स्थावरविराधनादपि निवृत्तिप्रतिज्ञानात् ॥ ९ ॥

सचित्तविरतेभ्यः श्लाघते—

अहो जिनोक्तिनिर्णीतिरहो अक्षजितिः सताम् ।

नालक्ष्यजन्त्वपि हरित् प्सान्त्येतेऽसुक्षयेऽपि यत् ॥ १० ॥

टीका—अहो आश्चर्यं वर्तते। काऽसौ, जिनोक्तिनिर्णीतिः जिनागमनिश्चयः। केषां, सतां प्रकरणात् सचित्तविरतिप्रयतानां । तथा अहो आश्चर्यं वर्तते । काऽसौ, अक्षजितिः इन्द्रियजयः । केषां, सताम्। अत्रोपपत्तिमाह—यद्यस्मात् न प्सान्ति न भक्षयन्ति । के, एते सन्तः । किं तत्, हरित हरितं । किंविशिष्टमपि, अलक्ष्यजन्त्वपि अलक्ष्याः अस्मदाद्यपेक्षया केवलागमगम्यत्वात् प्रत्यक्षाद्यसंवेद्या जन्तवः प्राणिनो यस्मिन् तदलक्ष्यजन्तु हरितं वस्तु । किं

पुनर्दृश्यानुमेयप्राणिकमित्यपिशब्दार्थः । क्व सति, असुक्षयेऽपि असूनां क्षयः प्रलयः असुक्षयस्तस्मिन्नपि प्राणेषु नश्यत्स्वपि । किं पुनः प्रकारान्तरेण जीविते सम्भवतीत्यपिशब्दार्थः । अत्रालक्ष्यजन्त्वपीत्यनेन जिनागमप्रामाण्यविश्वासोऽसुक्षयेऽपीत्यनेन च जितेन्द्रियत्वं समर्थ्यते ॥ १० ॥

साम्प्रतं भोगोपभोगपरिमाणशीलातिचारत्वेनोक्तं सचित्तभोजनमिह त्यज्यमानं प्रतिमाभावं यातीत्युपदिशति—

सचित्तभोजनं यत्प्राङ् मलत्वेन जिहासितम् ।
व्रतयत्यङ्गिपञ्चत्वचकितस्तच्च पञ्चमः ॥ ११ ॥

टीका—व्रतयति व्रतत्वेन प्रत्याख्याति । कोऽसौ, पञ्चमः सचित्तविरत्युद्यतः । किं तत्, तच्च तदपि । किंविशिष्टो यतः, अङ्गिपञ्चत्वचकितः अङ्गिनां भक्ष्यमाणसचित्तद्रव्याश्रितजीवानां पञ्चत्वं मरणं अङ्गिपञ्चत्वं तस्माच्चकितो भीतो यतः । यत्किं, यज्जिहासितं त्यक्तुमिष्टं शीलोपदेशस्याभ्यासदशाविषयत्वात् । किं तत्, सचित्तभोजनं जीवाश्रितद्रव्यवल्भनं । केन, व्रतिकेन । केन कृत्वा, मलत्वेन भोगोपभोगपरिमाणाख्यशीलातिचारत्वेन । क्व, प्राक् शीलोपदेशसमये । स्वामी पुनर्भोगोपभोगपरिमाणशीलातिचारानन्यथा पठित्वा पञ्चमप्रतिमामेवमध्यगीष्ट—मूलफलशाकशाखाकरीरकन्दप्रसूनबीजानि । नामानि योऽत्ति सोऽयं सचित्तविरतो दयामूर्तिः ॥ ११ ॥

अथ रात्रिभक्तव्रतं चतुःश्लोक्या व्याकरिष्यन् आदौ तल्लक्षणमाह—

स्त्रीवैराग्यनिमित्तैकचित्तः प्राग्वृत्तनिष्ठितः ।
यस्त्रिधाऽह्नि भजेन्न स्त्रीं रात्रिभक्तव्रतस्तु सः ॥ १२ ॥

टीका—स तु श्रावको भवति । किंविशिष्टः, रात्रिभक्तव्रतः । यः किं, यो न भजेत् न सेवेत । कां, स्त्रीं निःशेषामपि योषां । क्व, अह्नि दिने । कथं, त्रिधा मनोवाक्कायकृतकारितानुमतैः । किंविशिष्टः सन्, स्त्रीत्यादि—स्त्रीवैराग्यनिमित्तानि कामदोषाः स्त्रीदोषा स्त्रीसङ्गदोषा अशौचमार्यसङ्गतिश्चेति पञ्च

तेष्वेकचित्तो यः स तथोक्तः तदेकाग्रमना इत्यर्थः । कथम्भूतो भूत्वा, प्राग्वृत्तनिष्ठितः पूर्वोक्तप्रतिमापञ्चकाचारनिरूढः ।। १२ ।।

षष्ठप्रतिमानिष्ठानभिष्टौति—

अहो चित्रं धृतिमतां सङ्कल्पच्छेदकौशलम् ।

यन्नामापि मुदे साऽपि दृष्टा येन तृणायते ।। १३ ।।

टीका—अहो चित्रमाश्चर्यं वर्तते । किं तत्, संकल्पच्छेदकौशलं मनोव्यापारनिरोधसामर्थ्यं । केषां, धृतिमतां संतोषभावनायुक्तानां पुंसां । येन किं, येन संकल्पच्छेदकौशलेन तृणायते तृणवत्प्रतिभाति अभोग्यतयाऽऽत्मानं तेषां दर्शयतीत्यर्थः । काऽसौ, साऽपि कान्ता किंविशिष्टा सती, दृष्टा चक्षुर्गोचरीकृता । तथा आवृत्या सा कान्ता दृष्टाऽपि किं पुनः श्रुता संकल्पिता चेत्यपिशब्दार्थः । गृहस्थस्य हि स्वदारान्प्रति प्रेम दृग्व्यापारश्च दुःखमुत्पादयेत् सा का, यन्नामापि यस्याः संज्ञाऽपि श्रुता भवति । कस्यै, मुदे प्रीतये । किं पुनर्दर्शनादिकमित्यपिशब्दार्थः ।। १३ ।।

एतस्य रात्र्यादावपि मैथुनविनिवृत्तिमुपपादयन्नाह—

रात्रावपि ऋतावेव सन्तानार्थमृतावपि ।

भजन्ति वशिनः कान्तां न तु पर्वदिनादिषु ।। १४ ।।

टीका—भजन्ति सेवन्ते । के, वशिनो जितेन्द्रियाः। कां, कांतां प्रियां । क्व, ऋतावेव पुष्पदर्शनोत्तरभाविचतुर्थदिवसस्नानानन्तरमेव नान्यदा । क्व, रात्रावपि निश्यपि तथा ऋतावपि सन्तानार्थमेव ते भजन्ति तां न विषयसुखार्थं । एवशब्दोऽत्र सन्दर्शकन्यायेन उभयत्र योज्यः । न तु पुनः कथमपि वशिनः स्त्रियं भजन्ति । केषु, पर्वदिनादिषु पर्वदिनानि धर्मकर्मानुष्ठानदिनान्यष्टम्यादीनि आदिशब्देन अमावास्याग्रहणादीनि गृह्यन्ते ।। १४ ।।

अधुना चारित्रसारादिशास्त्रमतेन रात्रिभक्तव्रतं निरुक्त्या लक्षयन् रत्नकरण्डकादिप्रसिद्धं तदर्थं कथयति—

रात्रिभक्तव्रतो रात्रौ स्त्रीसेवावर्तनादिह ।
निरुच्यतेऽन्यत्र रात्रौ चतुराहारवर्जनात् ॥ १५ ॥

टीका—निरुच्यते व्युत्पाद्यते । कोऽसौ, रात्रिभक्तव्रतः समासशब्दः । क्व, इह अस्मिन् चारित्रसारादिशास्त्रानुसारिणि ग्रन्थे । कस्मात्, रात्रौ निशि स्त्रीसेवाया वर्तनात् रात्रौ भक्तं स्त्रीभजनं व्रतयति रात्रिभक्तव्रत इति तच्छब्दस्य व्युत्पादनात् । अन्यत्र पुना रत्नकरंडकादिशास्त्रे रात्रिभक्तव्रतशब्दो निरुच्यते । कस्मात्, रात्रौ चतुराहारवर्जनात् रात्रौ भक्तं चतुर्विधमप्याहारं व्रतयति प्रत्याख्यातीति रात्रिभक्तव्रत इति तच्छब्दव्युत्पादनात् । यदाह स्वामी—अन्नं पानं खाद्यं लेह्यं नाश्नाति यो विभावर्याम् । स च रात्रिभक्तविरतः सत्त्वेष्वनुकम्पमानमनाः ॥ १५ ॥

अथ ब्रह्मचर्यस्थानं व्याचष्टे—

तत्तादृक्संयमाभ्यासवशीकृतमनास्त्रिधा ।
यो जात्वशेषा नो योषा भजति ब्रह्मचार्यसौ ॥ १६ ॥

टीका—भवति । कोऽसौ, असौ श्रावकः । किंविशिष्टो, ब्रह्मचारी ब्रह्मणि चारित्रे आत्मनि ज्ञाने चरति प्रवर्तत इत्येवंव्रतः । यः किं, यो नो भजति न सेवते । काः, योषाः स्त्रीः । किंविशिष्टाः, अशेषाः मानवीर्दैवीस्तिरश्चीस्तत्प्रतिकृतीश्च । कदा, जातु कदाचिद्दिवा रात्रौ च । कथं, त्रिधा त्रिविधेन । कथम्भूतो भूत्वा तदित्यादि—स प्राक् प्रतिमाषट्कनिर्दिष्टः तादृक्क्रमोपचितः संयमः प्राणेन्द्रियपरिहाररूपापहृतसंयमैकदेशस्तस्याभ्यासो भावना तेन वशीकृतं स्वाधीनतां नीतं मनश्चित्तं येन स तथोक्तः ॥ १६ ॥

ब्रह्मचारिणं श्लाघते—

अनन्तशक्तिरात्मेति श्रुतिर्वस्त्वेव न स्तुतिः ।
यत्स्वद्रव्ययुगात्मैव जगज्जैत्रं जयेत्स्मरम् ॥ १७ ॥

टीका—भवति । काऽसौ, श्रुतिराप्तोपदेशः । कथं, इति एवंस्वरूपा । भ-

वति । कोसौ, आत्मा पुरुषः । किंविशिष्टोऽनन्तशक्तिः अनन्ता निःसीमाः शक्तयो अर्थक्रियाकारिसामर्थ्यानि यस्य सः अनन्तशक्तिः । इति श्रुतिः । किं भवति, वस्त्वेव वस्तुविषयैव । न भवति सा । किं, स्तुतिः गुणाल्पत्वे सति तद्बहुत्वकथनं । कुत इत्याह—यद्यस्मात् जयेत् प्रतिबध्नीयात्। कोऽसौ, आत्मैव । किंविशिष्टः, स्वद्रव्ययुक् परद्रव्यव्यावर्तनेन आत्मद्रव्यं समादधानः । कं, स्मरं कन्दर्पं । किंविशिष्टं, जगज्जैत्रं जगतां परद्रव्यप्रवृत्तिमतां प्राणिनां जैत्रमभिभावुकं ॥ १७ ॥

मन्दमत्यनुजिघृक्षया ब्रह्मचर्यमाहात्म्यमाह—

विद्या मन्त्राश्च सिद्ध्यन्ति किङ्करन्त्यमरा अपि ।
क्रूराः शाम्यन्ति नाम्नाऽपि निर्मलब्रह्मचारिणाम् ॥ १८ ॥

टीका—सिद्ध्यन्ति वरप्रदा भवन्ति । काः, विद्याः साधितसिद्धाः । मन्त्राश्च पठितसिद्धाः । तथा किंकरन्ति किङ्करा इव आचरन्ति। के, अमरा देवाः। किं पुनर्मानवास्तिर्यञ्चो वेत्यपिशब्दार्थः। तथा शाम्यन्ति उपसर्गकरणान्निवर्तन्ते । के, क्रूराः ब्रह्मराक्षसादयः । केन, नाम्ना संज्ञोच्चारणमात्रेण । किं पुनः सन्निधानेनेत्यपिशब्दार्थः केषां, निर्मलब्रह्मचारिणां निरतिचारब्रह्मचर्यभाजाम् ॥ १८ ॥

प्रसङ्गवशाद्ब्रह्मचर्याश्रमं किञ्चिद्व्याचष्टे—

प्रथमाश्रमिणः प्रोक्ता ये पञ्चोपनयादयः ।
तेऽधीत्य शास्त्रं स्वीकुर्युर्दारानन्यत्र नैष्ठिकात् ॥ १९ ॥

टीका—ये प्रोक्ताः परमागमे प्रतिपादिताः । के, प्रथमाश्रमिणः मौञ्जीबन्धनपूर्वव्रतानुष्ठायिनः । कति, पञ्च। के, ते उपनयादयः उपनय आदिर्येषामवलम्बादीनां ते । तत्र उपनयब्रह्मचारिणो गणधरसूत्रधारिणः समभ्यस्तागमा गृहिधर्मानुष्ठायिनो भवन्ति । अवलम्बब्रह्मचारिणः क्षुल्लकरूपेणागममभ्यस्य परिगृहीतगृहावासा भवन्ति । अदीक्षाब्रह्मचारिणो वेषमन्तरेणाभ्य-

स्तागमा गृहधर्मनिरता भवन्ति । गूढब्रह्मचारिणः कुमारश्रमणाः सन्तः स्वीकृतागमाभ्यासा बन्धुभिर्दुःसहपरिषहैरात्मना नृपतिभिर्वा निरस्तपरमेश्वररूपा गृहवासरता भवन्ति । नैष्ठिकब्रह्मचारिणः समधिगतशिखालक्षितशिरोलिङ्गाः तथा भिक्षावृत्तयो देवार्चनपरा भवन्ति । ते किं कुर्युरित्याह—परिगृह्णीयुः । के, ते । कान्, दारान्, पत्नीः । किं कृत्वा, अधीत्य पठित्वा । किं तत्, शास्त्रमुपासकाध्ययनादि श्रुतं । कथम्, अन्यत्र । कस्मात् नैष्ठिकात् नैष्ठिकं वर्जयित्वेत्यर्थः ॥ १९ ॥

जिनदर्शने वर्णाश्रमव्यवस्था कुत्रास्तीति पृच्छन्तं प्रत्याह—

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्च सप्तमे ।
चत्वारोऽङ्गे क्रियाभेदादुक्ता वर्णवदाश्रमाः ॥ २० ॥

टीका—उक्ताः प्रणीताः । के, आश्रमाः आ शास्त्रोक्तकालात् श्राम्यन्ति यथास्वं तपस्यन्तीत्याश्रमाः । किंवत्, वर्णवत् ब्राह्मणादयो वर्णा यथा । कस्मात्, क्रियाभेदात् धर्मकर्मविकल्पात् । कति, चत्वारः । क, अङ्गे । किंविशिष्टे, सप्तमे उपासकाध्ययनाख्ये । तानेवोपदेष्टुमाह-ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चेति । उक्तं च । ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । इत्याश्रमास्तु जैनानां सप्तमाङ्गाद्विनिःसृताः ॥ १ ॥ तत्क्रियाभेदस्तु किञ्चिदयं दर्श्यते— ब्रह्मचारिणस्तावदिमाः क्रियाः । द्विजसूनोर्गर्भाष्टमे वर्षे जिनालये कृतार्हत्पूजनस्य कृतमौण्ड्यस्य त्रिगुणमौञ्जीबन्धसप्तगुणग्रन्थितयज्ञोपवीतादिलिङ्गविशुद्धं स्थूलहिंसाविरत्यादिव्रतं ब्रह्मचर्योपबृंहितं गुरुसाक्षिकं धारणीयं । तत्क्रियाप्रपञ्चः पुनरार्षे- शिखी सितांशुकः सान्तर्वासा निर्वेषविक्रियः । व्रतचिन्हं दधत्सूत्रं तदोक्तो ब्रह्मचार्यसौ ॥ चरणोचितमन्यच्च नामधेयं तदाऽस्य वै । वृत्तिश्च भिक्षयाऽन्यत्र राजन्यादुद्धवैभवात् ॥ इत्यादिग्रन्थेनोक्तः प्रतिपत्तव्यः । पूर्वोक्तनित्यनैमित्तिकानुष्ठानस्थो गृहस्थः । स द्वेधा जातितीर्थक्षत्रियभेदात् । तत्र जातिक्षत्रियाः क्षत्रियब्राह्मणवैश्यशूद्रभेदाच्चतुर्विधाः । तीर्थ-

क्षत्रियाः स्वजीवितविकल्पादनेकभेदा भिद्यन्ते । वानप्रस्था अपरिगृहीतजिनरूपा वस्त्रखण्डधारिणो निरतिशयतपस्युद्यता भवन्ति । भिक्षवो जिनरूपधारिणो बहुधा भवन्ति । तद्यथा-देशप्रत्यक्षवित्केवलभृदिह मुनिः स्यादृषिः प्राप्तऋद्धिरारूढश्रेणियुग्मो जिनयतिरेनगारोऽपरः साधुवर्गः । राजा ब्रह्मा च देवः परम इति ऋषिर्विक्रियाऽक्षीणशक्तिप्राप्तो बुद्ध्यौषधीशो विविधनयपटुर्विश्ववेदी क्रमेण ॥ १ ॥ तत्क्रियाश्च प्राक्प्रबन्धेनोक्तास्तद्वद्वर्णक्रियाश्च व्याख्याताः ॥ २० ॥

अथारम्भविरतं द्वाभ्यामाह—

निरूढसप्तनिष्ठोऽङ्गिघाताङ्गत्वात्करोति न ।
न कारयति कृष्यादीनारम्भविरतस्त्रिधा ॥ २१ ॥

टीका—न करोति न कारयति च कोऽसौ, आरम्भविरतः । कान्, कृष्यादीन् कृषिसेवावाणिज्यादिव्यापारान् । न पुनः स्नपनदानपूजाभिधानाद्यारम्भान् । तेषामङ्गिघाताङ्गत्वाभावात् । प्राणिपीडापरिहारेणैव तत्संभवात् । वाणिज्याद्यारम्भादपि तथा सम्भवस्तर्हि विनिवृत्तिर्न स्यादिति चेदेवमेतत् । कथं, त्रिधा । कस्मात्, अङ्गिघाताङ्गत्वात् प्राणिवधनिबन्धनत्वात् । कथम्भूतो भूत्वा, निरूढसप्तनिष्ठः निष्ठितप्राक्सप्तप्रतिमासंयमः पुत्रादीन् प्रत्यनुमतेः कदाचिन्निवारयितुमशक्यत्वान्मनोवाक्कायैः कृतकारिताभ्यामेव सावद्यारम्भान्निवर्तते इत्यत्र तात्पर्यार्थः ॥ २१ ॥

एतदेव समर्थयते—

यो मुमुक्षुरघाद्बिभ्यत् त्यक्तुं भक्तमपीच्छति ।
प्रवर्तयेत्कथमसौ प्राणिसंहरणीः क्रियाः ॥ २२ ॥

टीका—कथं प्रवर्तयेत् कुर्यात् कारयेच्च । कोऽसौ, असावष्टमश्रावकः । काः, क्रियाः । किंविशिष्टाः, प्राणिसंहरणीः जीवघातिकाः । यः किं, य इच्छति वाञ्छति । किं कर्तुं, त्यक्तुं प्रत्याख्यातुं । किं तत्, भक्तमपि प्राणिसंहरणकारणं

भोजनमपि। किं कुर्वन्, बिभ्यत्। कस्माद्, अघात्पापात्। किंविशिष्टः सन्, मुमुक्षुः कृत्स्नकर्मविप्रमोक्षमिच्छुः ॥ २२ ॥

अथ परिग्रहविरतं सप्तश्लोक्या व्याचष्टे—

स ग्रन्थविरतो यः प्राग्व्रतव्रातस्फुरद्धृतिः।
नैते मे नाहमेतेषामित्युज्झति परिग्रहान् ॥ २३ ॥

टीका—स भवति। किमाख्यो, ग्रन्थविरतः। यः किं, य उज्झति त्यजति। कान्, परिग्रहान् वास्तुक्षेत्रादीन् दश। कथ, इति एवं संकल्प्य। न भवन्ति। के, एते वास्तुक्षेत्रादयोऽर्थाः। कस्य, मे मम स्वत्वभोग्यत्वादिना सम्बद्धाः। तथा न भवाम्यहं। केषां, एतेषां स्वामित्वभोक्तृत्वादीनां सम्बन्धी किंविशिष्टः सन्, प्रागित्यादि—प्राचां दर्शनिकादिप्रतिमाविषयाणां व्रतानां संयमविशेषाणां व्रातः सङ्घातः प्राग्व्रतव्रातः तेन स्फुरन्ती जाग्रती धृतिः सन्तोषो यस्य स तथोक्तः किं च। स्वाचाराप्रातिलोम्येन लोकाचारं प्रमाणयेदिति वचनात्सर्वत्र स्वस्वस्थानाविरोधेनैव पूर्वस्थानानुष्ठानमनुष्ठेयम् ॥ २३ ॥

एतस्य सकलदत्तिमुत्तरप्रबन्धेन व्याचष्टे—

अथाहूय सुतं योग्यं गोत्रजं वा तथाविधम्।
ब्रूयादिदं प्रशान् साक्षाज्ज्ञातिज्येष्ठसधर्मणाम् ॥ २४ ॥

टीका—अथाधिकारे इतः सकलदत्तिरभिक्रियत इत्यर्थः। ब्रूयात् व्याहरेत्। कोऽसौ, प्रशान् प्रशमपरो नवमः श्रावकः। कं, सुतं पुत्रं। किंविशिष्ट, योग्यं स्वभारक्षमं। किं कृत्वा, आहूय आकार्य। वा अथवा योग्यपुत्राभावे गोत्रजं भ्रातृतत्पुत्रादिकं। किंविशिष्टं, तथाविधं योग्यपुत्रतुल्यं। किं ब्रूयात्, इदं वक्ष्यमाणं। कथं, साक्षात् समक्षं। केषां, ज्ञातिज्येष्ठसधर्मणां ज्ञातौ ब्राह्मणत्वादौ ज्येष्ठा मुख्या ज्ञातिज्येष्ठास्ते च ते सधर्माणश्च साधर्मिकास्तेषाम्।

ताताद्ययावदस्माभिः पालितोऽयं गृहाश्रमः।
विरज्यैनं जिहासूनां त्वमद्यार्हसि नः पदम् ॥ २५ ॥

टीका—हे तात स्वस्य पोष्यत्वसूचनगर्भं पुत्रादेः प्रियत्वामंत्रणमिदं । पालितो यथाविधि निर्वाहितः । कोऽसौ, अयं प्रस्तुतो गृहस्थाश्रमो गृहस्थाचारः । कैः, अस्माभिः नवमप्रतिमानुष्ठाननिष्ठाभ्युद्यतैः । कथं, अद्ययावत् इदंदिनावधि । अद्य सम्प्रति अर्हसि स्वीकर्तुमुचितोऽसि । कोऽसौ, त्वं । किं तत्, पदं त्रिवर्गसारगृहाचारानुवर्तनलक्षणं । केषां, नः अस्माकं । किं चिकीर्षूणां, जिहासूनां त्यक्तुमिच्छूनां । कं, एनं गृहाश्रमं । किं कृत्वा, विरज्य भवाङ्गभोगेषु वैराग्यं गत्वा ॥ २५ ॥

पुत्रः पुपूषोः स्वात्मानं सुविधेरिव केशवः ।
य उपस्कुरुते वप्तुरन्यः शत्रुः सुतच्छलात् ॥ २६ ॥

टीका—य उत्पन्नः पुनीते वंशं स पुत्र इति वचनात् स पुत्रो भण्यते । यः किं, य उपस्कुरुते गृहादिममत्वच्छेदेनातिशयमादत्ते । कस्य, वप्तुः पितुः । किं चिकीर्षोः, पुपूषोः शोधयितुमिच्छोः । कं, स्वात्मानं स्वचिद्रूपं । क इव कस्येत्याह—सुविधेरित्यादि । यथा उपचक्रे । कोऽसौ, केशवः केशवो नाम श्रीमतीचरस्तत्पुत्रः । कस्य, सुविधेः वृषभनाथस्य पूर्वभवे सुविधिनाम्नो राज्ञः । उक्तं चार्षे—नृपस्तु सुविधिः पुत्रस्नेहाद्गार्हस्थ्यमत्यजन् । उत्कृष्टोपासकस्थाने तपस्तेपे सुदुश्चरं ॥ उक्तलक्षणवैपरीत्ये पुत्रस्यापि शत्रुत्वं वक्तुमाह—भवति । कोऽसौ, अन्यः पुत्रः । किंविशिष्टः, शत्रुः शातयिता इष्टविघातित्वात् । कस्मात्, सुतच्छलात्पुत्रव्याजात् ॥ २६ ॥

उपसंहारमाह—

तदिदं मे धनं धर्म्यं पोष्यमप्यात्मसात्कुरु ।
सैषा सकलदत्तिर्हि परं पथ्या शिवार्थिनाम् ॥ २७ ॥

टीका—यत एवं ततस्मात् आत्मसात्कुरु स्वायत्तं विधेहि त्वं । किं तत्, इदं वर्तमानं मे मम सम्बंधि धनं ग्रामसुवर्णादिकं धर्म्यं चैत्यालयपात्र-

दानादिकं पोष्यं च गृहिणीमातृपित्रादि । कुत एतदित्याह—हि यस्माद्वर्तते । काऽसौ, सा सूत्रोक्ता एषा विधीयमाना सकलदत्तिरन्वयदत्त्यपराभिधाना । कीदृशी, पथ्या पथोऽनपेता रत्नत्रयानुगतेत्यर्थः । केषां, शिवार्थिनां मुमुक्षूणां । कथं, परं अत्यर्थम् ॥ २७ ॥

विदीर्णमोहशार्दूलपुनरुत्थानशङ्किनाम् ।
त्यागक्रमोऽयं गृहिणां शक्त्याऽऽरम्भो हि सिद्धिकृत् ॥२८॥

टीका—वर्तते । कोऽसौ, अयं प्रकृतः त्यागक्रमः शनैः शनैर्बहिरन्तःसङ्गवर्जनं । केषां, गृहिणाम् । किंविशिष्टानां, विदीर्णेत्यादि—विदीर्णस्तत्तन्निष्ठासौष्ठवेन भिन्नः स चासौ मोहशार्दूलश्च ममकारव्याघ्रः तस्य पुनरुत्थानं भूयो निहन्तुमभियोगस्तं शङ्कन्ते विकल्पयन्त्यभीक्ष्णमिति तच्छङ्किनस्तेषां । अर्थसमर्थनार्थमाह—हि यस्माद्भवति । कोसौ, आरम्भ ऐहिकमामुत्रिकं वाभिमतार्थं साधयितुमुपक्रमः । कया, शक्त्या स्वसामर्थ्येन क्रियमाणः । किंविशिष्टो भवति, सिद्धिकृत् अभिप्रेतार्थसाधकः ॥ २८ ॥

एवं व्युत्सृज्य सर्वस्वं मोहाभिभवहानये ।
किञ्चित्कालं गृहे तिष्ठेदौदास्यं भावयन्सुधीः ॥ २९ ॥

टीका—तिष्ठेदासीत । कोऽसौ, सुधीः तत्त्वज्ञानसम्पन्नः । क्व, गृहे । कं कालं । कियन्तं, किञ्चित्स्तोकं । किं कुर्वन्, भावयन्नभ्यस्यन् । तदौदास्यमुपेक्षां । कस्मै, मोहेत्यादि । मोहेन ममत्वेन अभिभव उपेक्षाशैथिल्यं येन पृष्टो वा आरम्भादौ पुत्रादेरनुमतिं दास्यते तस्य हानये निराकरणार्थं । किं कृत्वा, व्युत्सृज्य विशेषेण विधिपूर्वं वा त्यक्त्वा । किं तत्, सर्वस्वं चेतनमचेतनं च स्वं वस्तु । कथं, एवमित्थं । किञ्चित्कालमित्यनेन सिताम्बरपरिकल्पितं प्रतिमासु कालनियमं निराकरोति । तद्ग्रन्थानुवादस्तु ज्ञानदीपिकायां द्रष्टव्यः । गृहे तिष्ठेदित्यनेन स्वांगाच्छादनार्थं वस्त्रमात्रधारणममूर्छामस्य लक्षयति । तेन विना

गृहेऽवस्थानानुपपत्तेः । तथा ह्यागमः " मोत्तूण वत्तमित्तं परिग्गहं जो विव-ज्जदे सेसं । तं तत्थ विमुच्छण्णं करेदि जाण सो सावओ णवमो ॥ २९ ॥

अथानुमतिविरतं सप्तश्लोक्या व्याचष्टे—

नवनिष्ठापरः सोऽनुमतिव्युपरतः सदा ।
यो नानुमोदते ग्रन्थमारम्भं कर्म चैहिकम् ॥ ३० ॥

टीका–स भवति । किंविशिष्टः, अनुमतिव्युपरतोऽनुमतिविरत इत्यर्थः । यः किं, यो नानुमोदते नानुमन्यते । कं, ग्रन्थं धनधान्यादिकं तथा आरम्भकृष्यादिकं । तथा कर्म व्यापारं । किंविशिष्टं, ऐहिकं विवाहादिकं । कथं, त्रिधा मनोवाक्कायैः । किंविशिष्टः सन्, नवनिष्ठापरः दर्शनिकादि-प्रतिमानवकानुष्ठाननिष्ठः ॥ ३० ॥

एतस्य विधिविशेषमाह—

चैत्यालयस्थः स्वाध्यायं कुर्यान्मध्यान्हवन्दनात् ।
ऊर्ध्वमामन्त्रितः सोऽद्याद् गृहे स्वस्य परस्य वा ॥ ३१ ॥

टीका–कुर्याद्विदध्यात् । कोसौ, असावनुमतिविरतः । कं, स्वाध्यायमाग-माध्ययनं । किंविशिष्टः सन्, चैत्यालयस्थः जिनगृहे तिष्ठन् । तथा अद्यात् भुञ्जीत सः । क्व गृहे । कस्य, स्वस्य आत्मीयस्य पुत्रादेः परस्य वा यस्य कस्य धार्मिकस्य । किंविशिष्टः सन्, आमंत्रित आहूतः । कथं, ऊर्ध्वमुपरिष्टात् । कस्मात्, मध्याह्नवन्दनात् माध्याह्निककृतिकर्मणः पश्चात् ॥ ३१ ॥

अस्यैवोद्दिष्टत्यागार्थं भावनाविशेषं श्लोकद्वयेनाह—

यथाप्राप्तमदन्देहसिद्ध्यर्थं खलु भोजनम् ।
देहश्च धर्मसिद्ध्यर्थं मुमुक्षुभिरपेक्ष्यते ॥ ३२ ॥
सा मे कथं स्यादुद्दिष्टं सावद्याविष्टमश्नतः ।
कर्हि भैक्षामृतं भोक्ष्ये इति चेच्छेज्जितेन्द्रियः ॥३३॥ युग्मम्

टीका—इच्छेच्च आकांक्षेदसौ । किं, इति एतत् । किं कुर्वन्, भुञ्जानः । किं, यथाप्राप्तं यद्यल्लब्धं तत्तत्संयमाविरोधेनाश्नन्नित्यर्थः । किंविशिष्टो यतः, जितेन्द्रियः जितानि वशीकृतानीन्द्रियाणि स्पर्शनादीनि येन स जितेन्द्रियः । किमेतदिच्छेदित्यत्राह—खलु निश्चयेन । अपेक्ष्यते आकांक्ष्यते । किं तत्, भोजनं । कैः, मुमुक्षुभिः । किमर्थं, देहसिद्ध्यर्थं शरीरवर्तनार्थं । तथा अपेक्ष्यते देहस्तैः । किमर्थं, धर्मसिद्ध्यर्थं रत्नत्रयनिष्पत्त्यर्थं । सा च धर्मसिद्धिः कथं, न कथमपि स्यात् । कस्य, मे मम । किं कुर्वतः, अश्नतो भुञ्जानस्य । किं तत, उद्दिष्टं स्वोद्देशेन साधितमाहारं । किंविशिष्टं, सावद्याविष्टं सावद्येनाधःकर्मणा संसृष्टं । ततः कर्हि कस्मिन्काले । भोक्ष्ये वल्भिष्येऽहं । किं तत, भैक्षामृतं भिक्ष्यन्त इति भिक्षाः याचितप्राप्ताहाराः भिक्षाणां समूहो भैक्षं भैक्षममृतमिवाजरामरत्वहेतुत्वात् ॥ ३२ । ३२ ॥

अस्यैव गृहत्यागविधिमाह—

पञ्चाचारक्रियोद्युक्तो निष्क्रमिष्यन्नसौ गृहात् ।
आपृच्छेत गुरून् बन्धून् पुत्रादींश्च यथोचितम् ॥ ३४ ॥

टीका-आपृच्छेत संवदेदसौ । कान्, पुत्रादीन् । कथं, यथोचितं यथार्हं । किं करिष्यन्, निष्क्रमितुमिच्छन् । कस्मात्, गृहाद् द्रव्यभावगेहात् । किंविशिष्टःसन्, पञ्चाचारक्रियोद्युक्तः पञ्चानां ज्ञानाद्याचाराणां करणे तत्परः । अत्रायं विधिः-अहो कालविनयोपधानबहुमानानिन्हवार्थव्यञ्जनतदुभयसंपन्नत्वलक्षणज्ञानाचार न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदाश्रयामि यावत्त्वत्प्रसादाच्छुद्धमात्मानमुपलभे । अहो निःशंकितत्वनिःकांक्षितत्वनिर्विचिकित्सितत्वनिर्मूढदृष्टित्वोपबृंहणस्थितीकरणवात्सल्यप्रभावनालक्षणदर्शनाचार, शेषं पूर्ववत् । अहो मोक्षमार्गप्रवृत्तिकारणपञ्चमहाव्रतोपेतकायवाङ्मनोगुप्तीर्याभाषैषणादाननिक्षेपणप्रतिष्ठापनसमितिलक्षणचारित्राचार, शेषं पूर्ववत् । अहो अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेश,

शेषं प्राग्वत् ॥ अहो समस्तेतराचारप्रवर्तकस्वशक्त्यनिगूहनलक्षणवीर्याचार, शेषं प्राग्वत् । अथ यथोचितमेतदाचक्ष्महे ॥ तथाहि-अहो मदीयशरीरजनकस्यात्मन् अहो मदीयशरीरजनन्यात्मन् नायं मदात्मा युवाभ्यां जनितो भवतीति निश्चयेन युवां जानीतं । तत आपृष्टौ युवामिममात्मानं विमुञ्चतं । अयमात्माऽद्योद्भिन्नज्ञानज्योतिरात्मानमेवात्मनोऽनादिजनकमुपसर्पति । तथा अहो मदीयशरीरबन्धुजनवर्त्तिन आत्मानः अयं मदात्मा न किञ्चनापि युष्माकं भवतीति निश्चयेन यूयं जानीथ तत आपृष्टा यूयं, शेषं पूर्ववत् । नवरं, जनकमित्यस्य स्थाने बंधुमिति पठनीयं । अहो मदीयशरीरपुत्रस्यात्मन् मदात्मनो न त्वं जन्यो भवसीति निश्चयेन त्वं जानीहि । तत आपृष्टस्त्वमिममात्मानं विमुञ्च, शेषं प्राग्वत् । नवरं, बंधुस्थाने जन्यं पठेत् ॥ अहो मदीयशरीररमण्या आत्मन मदात्मा न त्वां रमयतीति निश्चयेन त्वं जानीहि तत आपृष्टस्त्वमिममात्मानं विमुञ्च । अयमात्माऽद्योद्भिन्नज्ञानज्योतिः स्वानुभूतिमेवात्मनोऽनादिरमणीमुपसर्पतीत्यादि ॥ ३४ ॥

विनयाचारस्य भेदं विस्तरेण प्रागुक्तमिदानीं सुखस्मृत्यर्थं संक्षिप्य पुनराह—

सुदृङ्निवृत्ततपसां मुमुक्षोर्निर्मलीकृतौ ।
यत्नो विनय आचारो वीर्याच्छुद्धेषु तेषु तु ॥ ३५ ॥

टीका—भण्यते सूरिभिः । कोऽसौ, विनयः । किं, यत्नः प्रणिधानं । क्व, निर्मलीकृतौ मलापनयने । सुदृङ्निवृत्ततपसां सम्यग्दर्शनज्ञानचारित्रतपसां । कस्य, मुमुक्षोः न बुभुक्षोः ।आचारस्तु भण्यते । किं, यत्नः । केषु तेषु सदृगादिषु चतुर्षु । किंविशिष्टेषु, शुद्धेषु निर्मलीकृतेषु । कस्मात्, वीर्यात् स्वशक्तिमनिगुह्य । एतेन पञ्चमो वीर्याचारः सूच्यते ॥ ३५ ॥

सम्प्रत्युपसंहरति—

इति चर्यां गृहत्यागपर्यन्तां नैष्ठिकाग्रणीः ।
निष्ठाप्य साधकत्वाय पौरस्त्यपदमाश्रयेत् ॥ ३६ ॥

टीका—आश्रयेत् स्वीकुर्यात्। कोऽसौ, नैष्ठिकाग्रणीः नैष्ठिकेषु दार्शनिकादिषु नवस्वग्रणीर्मुख्योऽनुमतिविरतः। किं तत्, पदं स्थानं। किंविशिष्टं पौरस्त्यं एकादशमुद्दिष्टविरत्याख्यं। कस्मै, साधकत्वाय आत्मशोधनार्थं। किं कृत्वा, निष्ठाप्य। कां, चर्या संयमाचारं। किंविशिष्टां, गृहत्यागपर्यन्तां गृहत्यागः पर्यन्ते अवसाने यस्यास्तां। कथं, इत्येवम् ॥ ३६ ॥

अथोद्दिष्टविरतस्थानं त्रयोदशभिः श्लोकैर्व्याचष्टे—

तत्तद्व्रतास्त्रनिर्भिन्नश्वसन्मोहमहाभटः ।
उद्दिष्टं पिण्डमप्युज्झेदुत्कृष्टः श्रावकोऽन्तिमः ॥ ३७ ॥

टीका—उज्झेत् त्यजेत्। कोऽसौ, अन्तिमः श्रावकः। किंविशिष्टः, उत्कृष्टः अयमित्थंभूतनयादुत्कृष्टोऽनुमतिविरतस्तु नैगमनयादिति ज्ञापनार्थमुभौ भिक्षू तौ प्रकृष्टौ चेति प्रागुक्तमपीदं विशेषणं पुनरुक्तं। किमुज्झेत्, पिण्डं भक्तं अपिशब्दादुपधिशयनासनादि। किंविशिष्टं,उद्दिष्टं आत्मोद्देशेन कल्पितं। नवकोटिविशुद्धं स्वीकुर्यादित्यर्थः। किंविशिष्टः सन्, तदित्यादि-तानि पूर्वोक्तानि व्रतानि यथास्वं निवृत्तिप्रवृत्तिरूपाण्याचरणानि तत्तद्व्रतानि तान्येवास्त्राणि प्रहरणानि तैर्भिन्नो नितरां विदारितः स चासौ श्वसन् किञ्चिज्जीवन् जिनरूपताप्राप्तिं प्रतिबध्नन् मोह एव महाभटो दुर्निवारवीरो यस्य स तथोक्तः ॥ ३७ ॥

तद्भेदलक्षणार्थमाह—

स द्वेधा प्रथमः श्मश्रुमूर्धजानपनाययेत्
सितकौपीनसंव्यानः कर्तर्या वा क्षुरेण वा ॥ ३८ ॥

टीका—स उत्कृष्टश्रावको द्वेधा द्विविधो भवति। तत्राद्यस्य प्रथम इत्यादिना प्रबन्धेन विधिमभिधत्ते-अपनाययेत् छेदयेत्। कोऽसौ, प्रथम आद्य उद्दिष्टविरतः। कान्, श्मश्रुमूर्धजान् कूर्चशिरःकेशान्। कया, कर्तर्या कर्तरिकया। वा क्षुरेण नापितोपकरणेन वा। अत्र कर्तर्याऽपनायनं श्लाघ्यतरं

शोभानाकांक्षणात् । तथा सितकौपीनसंव्यानो भवेत् श्वेतकक्षापटोत्तरीयपटश्चासौ स्यादित्यर्थः ॥

स उत्कृष्ट उद्दिष्टविरतश्रावकः द्विविधो भवति इति सम्बन्धः । तत्र तावत् प्रथमः आद्यः । किंविशिष्टः, सितकौपीनसंव्यानः कौपीनं गुह्यप्रच्छादनवस्त्रं संव्यानं उत्तरीयवस्त्रं कौपीनं च संव्यानं च कौपीनसंव्यानं सिते कौपीनसंव्याने यस्य स तथोक्तः । किं कुर्यात्, अपनाययेत् अन्येनोत्सारयेत । कान्, श्मश्रुमूर्धजान् । श्मश्रूणि कूर्चान् केशान् मूर्धजान् शिरःकेशान् न तु कक्षादिस्थान् । कया, कर्तर्या कर्तरिकया वा अथवा क्षुरेण रोमशस्त्रविशेषेण । अत्र द्वितीयो वाशब्दः समुच्चयार्थे ज्ञातव्यो यथासम्भवमिति ॥ ३८ ॥

स्थानादिषु प्रतिलिखेत् मृदूपकरणेन सः ।
कुर्यादेव चतुष्पर्व्यामुपवासं चतुर्विधम् ॥ ३९ ॥

टीका–प्रतिलिखेत् भूतलादिषु प्रमृज्यात् । कोसौ, स प्रथम उत्कृष्टः । केन, मृदूपकरणेन मृदुना सुकुमारेण जन्त्वबाधकेनोपकरणेन वस्त्रादिना । केषु कर्त्तव्येषु, स्थानादिषु उद्धीभावोपवेशनसंवेशनादिषु । तथा कुर्यादेव अवश्यं विदध्यादसौ । कं, उपवासमनशनं । किंविशिष्टं, चतुर्विधं चतस्रो विधा आहारास्त्याज्या यस्मिन्नसौ चतुर्विधस्तं । चतुष्पर्व्यां मासि मासि द्वयोरष्टम्योर्द्वयोश्चतुर्दश्योः ॥ ३९ ॥

स्वयं समुपविष्टोऽद्यात्पाणिपात्रेऽथ भाजने ।
स श्रावकगृहं गत्वा पात्रपाणिस्तदङ्गणे ॥ ४० ॥
स्थित्वा भिक्षां धर्मलाभं भणित्वा प्रार्थयेत वा ।
मौनेन दर्शयित्वाऽङ्गं लाभालाभे समोऽचिरात् ॥ ४१ ॥
निर्गत्याऽन्यद्गृहं गच्छेद्भिक्षोद्युक्तस्तु केनचित् ।
भोजनायार्थितोऽद्यात्तद् भुक्त्वा यद्भिक्षितं मनाक् ॥ ४२ ॥

प्रार्थयेतान्यथा भिक्षां यावत्स्वोदरपूरणीम् ।
लभेत प्रासु यत्राम्भस्तत्र संशोध्य तां चरेत् ॥४३॥ कलापकं

टीका—स प्रथमोत्कृष्टोऽद्यात् भुञ्जीत । केन, स्वयमात्मना । किंविशिष्टः सन्, समुपविष्टः निश्चलनिविष्टः । क्व, पाणिपात्रे हस्तपुटे । अथवा भाजने स्थाल्यादौ । इतः श्रावकेत्यादिना भिक्षणविधिमाह—प्रार्थयेत् भिक्षेत । कोऽसौ, सः । कां, भिक्षां । किं कृत्वा, भणित्वा । कं, धर्मलाभं धर्मलाभशब्दमुच्चार्येत्यर्थः । किं कृत्वा, स्थित्वा ऊर्द्धीभूत्वा । क्व, तदङ्गणे श्रावकगृहाग्रभागे । किंविशिष्टः सन्, पात्रपाणिः भिक्षापात्रहस्तः । किं कृत्वा, गत्वा प्राप्य । किं तत्, श्रावकगृहं । वा अथवा । स प्रार्थयेत् भिक्षां । केन, मौनेन । किं कृत्वा, दर्शयित्वा दातृदृष्टिगोचरं कृत्वा । किं तत्, अङ्गं स्वशरीरं । ततश्च गच्छेत् व्रजेत् । किं तत्, गृहं । किंविशिष्टं, अन्यत् अयाचितभिक्षं । किं कृत्वा, निर्गत्य याचितभिक्षागृहान्निष्क्रम्य । कथं, अचिरात शीघ्रं । किंविशिष्टः, समः रागद्वेषरहितः । क्व, लाभालाभे भिक्षायाः प्राप्तावप्राप्तौ च । भिक्षायुक्तस्तु भिक्षां याचमानः पुनः केनचिच्छ्रावकेण भोजनाय भोजनं कर्तुमर्थितः उपरुद्धः सन् अद्यात् तद्गृहे भुञ्जीत । किं कृत्वा, भुक्त्वा जेमित्वा । किं तत्, तदन्नं । यत्किं, यद्भिक्षितं गृहान्तरेषु याचितं । कियत्, मनाक् स्तोकं । बहौ भिक्षिते सति नान्यस्यान्नं भुञ्जीतेति भावः । अन्यथा परोपरोधाभावे प्रार्थयेत याचेत सः । कां, भिक्षां । कथं, यावन्मर्यादीकृत्य । कां, स्वोदरपूरणीं भिक्षां । स्वस्यैवोदरं यावत्या पूर्यते तावतीमेव प्रार्थयेत अन्यथा असंयमप्रसङ्गः । अथवा यावत् स्वोदरपूरणी भिक्षा भवति तावदेव प्रार्थयेतेति वाक्यभेदेन सम्बन्धः । ततश्च चरेत् गोवद् भुञ्जीतेति भावः । कां, तां भिक्षां । किं कृत्वा, संशोध्य सम्यक् शोधयित्वा । क्व, तत्र श्रावकगृहे । यत्र किं, यत्र लभेत प्राप्नुयात्सः । किं तत्, अम्भः पानीयं । किंविशिष्टं, प्रासु प्रासुकं निर्जीवम् ॥ ४०।४१।४२।४३ ॥

आकांक्षन्संयमं भिक्षापात्रप्रक्षालनादिषु ।
स्वयं यतेत चादर्पोऽपरथाऽसंयमो महान् ॥ ४४ ॥

टीका—स चादर्पो विद्यातिशयाद्यनाहितमदः सन् स्वयं यतेतात्मना यत्नं कुर्यात् । क्व, भिक्षेत्यादि भिक्षापात्रस्य प्रक्षालनं धावनमादौ येषामासनस्थापनोच्छिष्टत्यजनादीनां तानि भिक्षापात्रप्रक्षालनादीनि कर्माणि तेषु । किं कुर्वन्, आकांक्षन् अभिलषन् । कं, संयमं प्राणिरक्षणं । अपरथा अन्यथा शिष्यादिना तद्विधाने भवत्यसंयमः । कीदृशो, महान् भूयान् ॥४४॥

ततो गत्वा गुरूपान्तं प्रत्याख्यानं चतुर्विधम् ।
गृह्णीयाद्विधिवत्सर्वं गुरोश्चालोचयेत्पुरः ॥ ४५ ॥

टीका-ततः प्रकृतकर्मकरणानन्तरं । गुरोर्धर्माचार्यस्योन्तंपा समीपं गत्वा गृह्णीयात्स्वीकुर्यात् सः । किं तत्, चतुर्विधं चतुर्विधाहारविषयं । प्रत्याख्यानं नियमं । कथं, विधिवत् यथाविधि । तथा आलोचयेत् निवेदयेत्सः । किं तत्, सर्वं गमनात्प्रभृति स्वचेष्टितं । क्व, पुराऽग्रे । कस्य, गुरोः । चशब्दाद्गोचरीं प्रतिक्रमणां कुर्यात् ॥ ४५ ॥

एवमनेकभिक्षानियमस्य प्रथमोत्कृष्टस्य भोजनविधिमुक्त्वा सम्प्रति तस्यैवैकभिक्षानियमस्य तदुपदिशति—

यस्त्वेकभिक्षानियमो गत्वाऽद्यादनुमुन्यसौ ।
भुक्त्यभावे पुनः कुर्यादुपवासमवश्यकम् ॥ ४६ ॥

टीका—यस्तु प्रथमोत्कृष्टो भवति । कीदृशः, एकस्यामेकगृहसंबंधिन्यां भिक्षायां नियमः प्रतिज्ञा यस्य स एकभिक्षानियमः । असावद्यात् भोजनं कुर्यात् । किं कृत्वा, गत्वा दातृगृहं व्रजित्वा । कथं, अनुमुनि संयतस्य पश्चात् । एतेन प्रथमोत्कृष्टो द्वेधा स्यादनेकभिक्षानियम एकभिक्षानियमश्चेत्युक्तं प्रतिपत्तव्यं । स पुनः कुर्यात् । कं, उपवासं । कथं, अवश्यकं नियमेन । क्व सति, भुक्त्यलाभे सति तथाभोजनस्याप्राप्तौ ॥ ४६ ॥

तद्विधिविशेषमाह—

वसेन्मुनिवने नित्यं शुश्रूषेत गुरूँश्चरेत् ।

तपो द्विधाऽपि दशधा वैयावृत्त्यं विशेषतः ॥ ४७ ॥

टीका—स नित्यं सर्वदा मुनिवने संयताश्रमे । वसेन्निवासं कुर्यात् । तथा शुश्रूषेत पर्युपासीत । कान्, गुरून् धर्माचार्यादीन् । तथा चरेदनुतिष्ठेत् । किं तत, तपः । कथंभूतं, द्विधाऽपि बाह्यमाभ्यन्तरं च । तथा स चरेत् । किं तत्, वैयावृत्यं संयमिनामापत्प्रतीकारं । कतिधा, दशधा आचार्यादिगोचरत्वेन दशप्रकारं । केन, विशेषतोऽतिशयेन अन्तरङ्गतपस्यस्य संगृहीतस्यापि पृथगुपदेश इतरतपस्त इदमतिशयेनासौ श्रावकश्चरेदिति ज्ञापनार्थम् ॥ ४७ ॥

अथ द्वितीयमुद्दिष्टविरतं लक्षयति—

तद्वद् द्वितीयः किन्त्वार्यसञ्ज्ञो लुञ्चत्यसौ कचान् ।

कौपीनमात्रयुग्धत्ते यतिवत्प्रतिलेखनम् ॥ ४८ ॥

टीका—भवति । कोऽसौ, द्वितीय उत्कृष्टः । किंवत्, तद्वत् प्रथमेन तुल्यक्रियः । किंतु विशेषेण लुञ्चति हस्तेनोत्पाटयत्यसौ । कान्, कचान् कूर्चशिरःकेशान् । किंनामा, आर्यसञ्ज्ञः आर्य इति सञ्ज्ञा नाम यस्यासौ । तथा धत्ते धारयत्यसौ । किं तत्, प्रतिलेखनं पिच्छिकाख्यं संयमोपकरणं । किंवत्, यतिवत् संयतेन तुल्यं । किंविशिष्टः सन्, कौपीनमात्रयुक् कौपीनमात्रं गुह्यप्रच्छादनचेलखण्डमात्रं युनक्त्यात्मना योजयति नोत्तरीयादिकं यः स तथोक्तः ॥ ४८ ॥

स्वपाणिपात्र एवात्ति संशोध्यान्येन योजितम् ।

इच्छाकारं समाचारं मिथः सर्वे तु कुर्वते ॥ ४९ ॥

टीका—तथा अत्ति जेमत्यसावाहारं । किंविशिष्टं, योजितं समर्पितं । क, स्वपाणिपात्र एव निजहस्तपुटे न स्थाल्यादौ । केन, अन्येन गृहस्थादिना ।

किं कृत्वा, संशोध्य । एवमसाधारणमाचारमुक्त्वा साधारणं तमाह—इच्छेत्यादि । कुर्वते विदधते । के, सर्वे एकादशापि श्रावकाः । कं, समाचारं । किंविशिष्टमिच्छाकारं इच्छामीत्येवंविधोच्चारणलक्षणं । कथं, मिथः परस्परं । तुर्विशेषे ॥ ४९ ॥

इदानीं दशभिः पद्यैः शषं संगृह्णन्नाह—

श्रावको वीरचर्य्याहःप्रतिमातापनादिषु ।
स्यान्नाधिकारी सिद्धान्तरहस्याध्ययनेऽपि च ॥ ५० ॥

टीका—न स्यात् । कोऽसौ, श्रावकः । किंविशिष्टः, अधिकारी योग्यः । क, वीरेत्यादि वीरचर्या स्वयं भ्रामर्या भोजनं, अहःप्रतिमा दिनप्रतिमा आतापनाद्यस्त्रिकालयोगाः ग्रीष्मे सूर्याभिमुखं गिरिशिखरेऽवस्थानं, वर्षासु वृक्षमूले, शीतकाले रजन्यां चतुष्पदे, इत्येवंलक्षणास्त्रयः कायक्लेशविशेषाः । तथा सिद्धान्तस्य परमागमस्य सूत्ररूपस्य रहस्यस्य च प्रायश्चित्तशास्त्रस्याध्ययने पाठे श्रावको नाधिकारी स्यादिति सम्बन्धः ॥ ५० ॥

दानशीलोपवासार्चाभेदादपि चतुर्विधः ।
स्वधर्मः श्रावकैः कृत्यो भवोच्छित्त्यै यथायथम् ॥ ५१ ॥

टीका—कृत्योऽनुष्ठेयः । कोऽसौ, स्वधर्मः आत्मन आचारः । कैः, श्रावकैः देशसंयतैः । किंविशिष्टश्चतुर्विधोऽपि । कस्माद्दानशीलोपवासार्चाभेदात् दानं च शीलं चोपवासश्चार्चा च जिनादिपूजा ताभिर्भेदस्तस्मात् । अपिशब्दान्न केवलं दर्शनव्रतादिभेदादेकादशधेति ग्राह्यं । कथं, यथायथं स्वप्रतिमाचरणाविरोधेन । किमर्थं, भवोच्छित्त्यै संसारनिरासार्थं ॥ ५१ ॥

इत उत्तरं व्रतरक्षायां यत्नविधानार्थं प्रबन्धेनाभिधत्ते—

प्राणान्तेऽपि न भंक्तव्यं गुरुसाक्षि श्रितं व्रतम् ।
प्राणान्तस्तत्क्षणे दुःखं व्रतभङ्गो भवे भवे ॥ ५२ ॥

टीका—न भंक्तव्यं न खण्डनीयं श्रावकैः। किं तत्, व्रतं। किंविशिष्टं, श्रितं प्रतिपन्नं। कथं, गुरुसाक्षि गुरवोऽत्र परमेष्ठिनो दीक्षागुरवः साधर्मिकमुख्याः स्थानवास्तुदेवताश्च गृह्यन्ते। गुरवः साक्षिणः साक्षाद्द्रष्टारो यत्र तद्गुरुसाक्षिकमित्यर्थः। क्व, प्राणान्ते व्रतभंगाकरणे प्राणनाशे सम्भवत्यपि किं पुनरितरापदि। व्रतभङ्गकरणे दुःखभूयस्त्वं दर्शयति—भवति। कोऽसौ, प्राणान्तः। किं, दुःखं। क्व,तत्क्षणे तस्मिन्नेव समये नोत्तरत्र। व्रतभंगः पुनर्दुःखं भवति। क्व, भवे भवे जन्मनि जन्मनि। बुद्धिपूर्वकव्रतभंगकरणेन सम्यक्त्वस्यापि विराधनादनन्तसंसारित्वस्यागमे प्रतिपादनात॥ ५२॥

शीलवान् महतां मान्यो जगतामेकमण्डनम्।
स सिद्धः सर्वशीलेषु यः सन्तोषमधिष्ठितः॥ ५३॥

टीका—भवति कोऽसौ, शीलवान् शुचिचारित्रः श्रावको यतिर्वा। किंविशिष्टो, मान्यः सत्कृत्यः। केषां, महतामिंद्रादीनां। पुनः किंविशिष्टो, जगतां लोकानामेकमुत्कृष्टं मण्डनमलंकरणं। शीलमिद्ध्युपायमाह—स भवति। किंविशिष्टः, सिद्धो निष्पन्नः प्रतीतो वा। केषु, सर्वशीलेषु सकलसदाचारेषु। यः किं,योऽधिष्ठितोऽध्यासितः। कं,सन्तोषं धृतिं विषयवैतृष्ण्यमित्यर्थ॥५३॥

तत्र न्यञ्चति नो विवेकतपनो नाञ्चत्यविद्यातमी
नाप्नोति स्खलितं कृपामृतसरिन्नोदेति दैन्यज्वरः।
विस्निह्यन्ति न सम्पदो न दृशमप्यासूत्रयन्त्यापदः
सेव्यं साधुमनस्विनां भजति यः सन्तोषमंहोमुषम्॥ ५४॥

टीका—योऽहोमुषं पापापहं सन्तोषं भजति सेवते। किंविशिष्टं,सेव्यं। केषां, साधूनां सिद्धिसाधकानां मनस्विनां चाभिमानिनां। तत्र सन्तोषसेवके पुंसि नो न्यञ्चति नीचैर्न भवति आरूढारूढ एव भवतीत्यर्थः कोऽसौ, विवेकतपनः युक्तायुक्तविचारभास्करः। तथा न अञ्चति न प्रचरति। काऽसौ, अविद्यातमी

अज्ञानरात्रिः । तथा नाप्नोति न लभते । काऽसौ, कृपामृतसरित् अनुकम्पा-पीयूषनदी । किं, स्खलितं प्रवृत्तिप्रतिबन्धं । तथा नोदेति नोद्भवति । कोऽसौ, दैन्यज्वरः दैन्यं विषादो ज्वर इव देहमनस्तापहेतुत्वात् । तथा न विस्निह्यन्ति न विरज्यन्ति । काः, सम्पदः श्रियः । तथा नासूत्रयन्ति नारचयन्ति । का, आपदो विपदः । कां, दृशमपि किं पुनरालिंगनादिकम् ॥ ५४ ॥

स्वाध्यायमुत्तमं कुर्यादनुप्रेक्षाश्च भावयेत् ।
यस्तु मन्दायते तत्र स्वकृत्ये स प्रमाद्यति ॥ ५५ ॥

टीका—कुर्याच्छ्रावकः । कं, स्वाध्यायं । किंविशिष्टं, उत्तमं अध्यात्मादि-विद्याविषयं प्रकृष्टशक्तिपर्यंतं च । तथा भावयेत् अभ्यस्येत् । काः, अनुप्रेक्षाः अनित्यत्वादिभावना द्वादश चशब्दाद्दर्शनविशुद्ध्यादिभावनाश्च षोडश । यस्तु यः पुनस्तत्र स्वाध्यायादौ मन्दायते अलसो भवति स प्रमाद्यति नावधत्ते नोत्सहत इत्यर्थः । क्व, स्वकृत्ये आत्मकार्ये ॥ ५५ ॥

धर्मान्नान्यः सुहृत्पापान्नान्यः शत्रुः शरीरिणाम् ।
इति नित्यं स्मरेन्न स्यान्नरः संक्लेशगोचरः ॥ ५६ ॥

टीका—नरः पुमान् संक्लेशगोचरो रागद्वेषमोहविषयो न स्यात् रागा-दिभिर्नाभिभूयत इत्यर्थः । किं कुर्वन्, इत्येवं । नित्यं सन्ततं । स्मरन् ध्यायन् । कथमित्याह—नास्ति । कोऽसौ, सुहृत् । किंविशिष्टः, अन्यः । कस्मात्, धर्मात् धर्म एवोपकर्तेत्यर्थः । तथा पापादन्यो नास्ति शत्रुरधर्म एवापकर्ते-त्यर्थः । केषां, शरीरिणां देहिनां ॥ ५६ ॥

सल्लेखनां करिष्येऽहं विधिना मारणान्तिकीम् ।
अवश्यमित्यदः शीलं सन्निदध्यात्सदा हृदि ॥ ५७ ॥

टीका—सन्निदध्यात् संयोजयेत् । श्रावकः । किं तत्, एतत्सल्लेखनाख्यं शीलं । हृदि चित्ते । कथं, सदा पश्चिमसल्लेखनां नित्यं भावयेदित्यर्थः ।

कथं, इति। किमिति, अवश्यं नियमेन करिष्ये विधास्येऽहं। कां, सल्लेखनां बाह्याभ्यन्तरतपोभिः सम्यक्कायकषायकृशीकरणमाचारं। किंविशिष्टां, मारणांतिकीं मरणमेवान्तो मरणान्तः तद्भवमरणमित्यर्थः तत्र भवां। केन, विधिना शास्त्रोक्तविधानेन ॥ ५७ ॥

सहगामि कृतं तेन धर्मसर्वस्वमात्मनः ।
समाधिमरणं येन भवविध्वंसि साधितम् ॥ ५८ ॥

टीका—तेन पुंसा कृतं। किं तत्, आत्मनः स्वस्य धर्मसर्वस्वं व्यवहारनिश्चयरत्नत्रयं। किंविशिष्टं, सहगामि आत्मना सह भवान्तरगन्तृ। येन किं, येन साधितं निर्वर्तितं। किं तत्, समाधिमरणं रत्नत्रयैकाग्रतया प्राणत्यागः। किंविशिष्टं, भवविध्वंसि संसारनिर्मूलनशीलं ॥ ५८ ॥

यत्प्रागुक्तं मुनीन्द्राणां वृत्तं तदपि सेव्यताम् ।
सम्यङ् निरूप्य पदवीं शक्तिं च स्वामुपासकैः ॥ ५९ ॥

टीका—प्राक् चतुर्थाद्यध्यायषट्के। मुनींद्राणां महामुनीनां। यद् वृत्तं समितिगुप्त्याद्याचरणमुक्तं तदपि न केवलं संसेव्यतामनुष्ठीयतां। कैः, उपासकैः श्रावकैः। किं कृत्वा, सम्यङ् निरूप्य अविपरीतं पर्यालोच्य। कां, स्वामात्मीयां पदवीं संयमभूमिकां शक्तिं च वीर्यं ॥ ५९ ॥

प्रकृतमुपसंहरन्नौत्सर्गिकहिंसानिवृत्तिं प्रति देशयतिं प्रयुंक्ते—

इत्यापवादिकीं चित्रां स्वभ्यस्यन्विरतिं सुधीः ।
कालादिलब्धौ क्रमतां नवधौत्सर्गिकीं प्रति ॥ ६० ॥

टीका—क्रमतामुत्सहतां। कोऽसौ, सुधीः तत्वज्ञानसम्पन्नः श्रावकः। कथं, प्रति उद्दिश्य। कां, विरतिं। किंविशिष्टां, औत्सर्गिकीं उत्कृष्टं सर्जनमुत्सर्गः सर्वसंगत्यागः तत्र भवामौत्सर्गिकीं। कतिधा, नवधा मनोवाक्कायैः प्रत्येकं कृतकारितानुमतानां त्यागेन नवप्रकारां। कस्यां, कालादिलब्धौ कालदेशबलवीर्यसहायसाधनादिसामग्र्यां सत्यां। किं कुर्वन्, स्वभ्यस्यन्

सम्यग्भावयन् । कां, विरतिं हिंसाविनिवृत्तिं किंविशिष्टां, आपवादिकीं यतीनामपवादहेतुत्वादपवादो ग्रन्थस्तत्र भवां । पुनः किंविशिष्टां, चित्रां नानाप्रकारां । कथम्, इत्येवमुक्तप्रकारेण ॥ ६० ॥

साधकत्वं व्याकर्तुकामस्तत्स्वामिनं निर्दिशति—

इत्येकादशधाऽऽम्नातो नैष्ठिकः श्रावकोऽधुना ।
सूत्रानुसारतोऽन्त्यस्य साधकत्वं प्रवक्ष्यते ॥ ६१ ॥

टीका—इत्येवं नैष्ठिकश्रावक एकादशधाऽस्माभिराम्नातः पारम्पर्योपदेशेन वर्णितः । अधुना साम्प्रतमित ऊर्ध्वं प्रवक्ष्यते प्रकर्षेण वर्णयिष्यते अस्माभिः । किं तत्, साधकत्वं तृतीयं साधनाख्यं पदं । अंत्यस्योद्दिष्टविरतस्य श्रावकस्य । कस्मात्, सूत्रानुसारतः परमागममनुसृत्येति भद्रम् ६२ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मटीकायां
भव्यकुमुदचन्द्रिकासंज्ञायामादितः षोडशः
प्रक्रमाच्च सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

अथ सल्लेखनाविधिमभिधातुकामस्तत्प्रयोक्तारं लक्षयन्नाह—

देहाहारेहितत्यागात् ध्यानशुद्ध्याऽऽत्मशोधनम् ।
यो जीवितान्ते सम्प्रीतः साधयत्येष साधकः ॥ १ ॥

टीका—भवत्येष साधकः । यः किं, यः साधयति निर्वर्त्तयति । किं तत्, आत्मशोधनं आत्मनोऽन्तस्तत्त्वस्य शोधनं शुद्धिं मोहरागद्वेषापगमं रत्नत्रयपरिणतिमित्यर्थः । क्व, जीवितान्ते प्राणनाशे प्राणेषु नश्यत्स्वित्यर्थः । किंविशिष्टः सन्, सम्प्रीतः सर्वाङ्गीणध्यानसमुत्थानन्दयुक्तः । कया

तत्साधयति, ध्यानशुद्धया ध्यानस्यैकाग्रचिन्तानिरोधस्य शुद्धिरार्तरौद्रपरित्यागेन स्वात्मन्यवस्थानं निर्विकल्पसमाधिरित्यर्थः । कस्मात्, देहाहारेहितत्यागात् देहत्यागः शरीरममत्ववर्जनमाहारत्यागश्चतुर्विधाहारप्रत्याख्यानमीहितत्यागो मनोवाक्कायव्यापारव्यावर्तनं देहश्चाहारश्च ईहितं च देहाहारेहितानि तेषां त्यागस्तस्मात् ॥ १ ॥

कस्य श्रावकत्वेन कस्य च यतित्वेन मोक्षमार्गप्रवृत्तिः कर्तव्येति पृच्छन्तं प्रत्याह—

सामग्रीविधुरस्यैव श्रावकस्यायमिष्यते ।
विधिः सत्यां तु सामग्र्यां श्रेयसी जिनरूपता ॥ २ ॥

टीका—इष्यते अभिमन्यते पूर्वाचार्यैः । कोऽसौ अयमुक्तो वक्ष्यमाणश्च विधिः क्रियाकल्पः । कस्य, श्रावकस्य । किंविशिष्टस्य, सामग्रीविधुरस्यैव जिनलिङ्गग्रहणयोग्यत्रिस्थानदोषादियुक्तस्य नान्यस्य । सामग्र्यां तु सत्यां भवति । काऽसौ, जिनरूपता जिनलिङ्गग्रहणं । किंविशिष्टा, श्रेयसी प्रशस्यतरा ॥ २ ॥

जिनलिङ्गस्वीकारकारणमाह—

किञ्चित्कारणमासाद्य विरक्ताः कामभोगतः ।
त्यक्त्वा सर्वोपधिं धीराः श्रयन्ति जिनरूपताम् ॥ ३ ॥

टीका—श्रयन्ति स्वीकुर्वन्ति । के ते, धीराः श्रावकाः परीषहोपसर्गसहने बद्धकक्षाः । कां, जिनरूपतां । किं कृत्वा, त्यक्त्वा व्युत्सृज्य । कं, सर्वोपधिं बाह्याभ्यन्तरसङ्गं । किंविशिष्टाः सन्तः, विरक्ता व्यावृत्तचेतसः । काभ्यां, कामभोगतः कामः स्पर्शनरसनविषयानुभवः भोगो घ्राणचक्षुःश्रवणविषयानुभवः कामश्च भोगश्च कामभोगौ ताभ्यां । किं कृत्वा, आसाद्य प्राप्य । किं, कारणं । किंविशिष्टं, किञ्चित् तत्त्वज्ञानेष्टवियोगशत्रुपराजयादीनामन्यतमम् ॥ ३ ॥

जिनरूपतास्वीकारमाहात्म्यमाह—

अनादिमिथ्यादृगपि श्रित्वार्हद्रूपतां पुमान् ।
साम्यं प्रपन्नः स्वं ध्यायन् मुच्यतेऽन्तर्मुहूर्ततः ॥ ४ ॥

टीका—मुच्यते द्रव्यभावकर्मभिः स्वयमेव विश्लिष्यते । कोऽसौ, पुमान् द्रव्यतः पुल्लिंग एव । कस्मात्, अन्तर्मुहूर्ततः किञ्चिदूननाडीद्वयमात्रात् । किं कुर्वन्, ध्यायन् समादधानः । कं, स्वमात्मानं । किंविशिष्टः सन्, प्रपन्नः प्राप्तः । किं तत्, साम्यं माध्यस्थ्यं । किं कृत्वा, श्रित्वा । कां, अर्हद्रूपतां निर्ग्रन्थलिङ्गं । किंविशिष्टोऽपि, अनादिमिथ्यादृगपि न केवलं सादिमिथ्यादृष्टिरविरतसम्यग्दृष्टिः श्रावको वेत्यपिशब्दार्थः । उक्तं च—" आराध्य चरणमनुपममनादिमिथ्यादृशोऽपि यत्क्षणतः । दृष्टा विमुक्तिभाजस्ततोऽपि चारित्रमत्रष्टम् "

शरीरस्य स्थायिनः पातने पातोन्मुखस्य च शोचने निषेधमुपपादयति—

न धर्मसाधनमिति स्थास्नु नाश्यं वपुर्बुधैः ।
न च केनापि नो रक्ष्यमिति शोच्यं विनश्वरम् ॥ ५ ॥

टीका—न नाश्यं विश्लेष्यं । किं तत्, वपुः शरीरं । कैः, बुधैः तत्त्वज्ञैः । किंविशिष्टं, स्थास्नु साधुत्वेन रत्नत्रयानुष्ठानसाधकत्वलक्षणेन तिष्ठत् । कथं कृत्वा, धर्मसाधनमिति रत्नत्रयसिद्ध्युपायो यतः । न च नापि शोच्यं शोचनीयं वपुर्बुधैः । किंविशिष्टं, विनश्वरं विशेषेण नश्यत् तद्भवमरणं प्राप्नुवदित्यर्थः । कथं कृत्वा, केनापि नो रक्ष्यमिति योगीन्द्रदेवेन्द्रदानवेन्द्रादिनाऽपि रक्षयितुमशक्यं यतः । उक्तं च—" गहनं न शरीरस्य हि विसर्जनं किं तु गहनमिह वृत्तम् । तन्न स्थास्नु विनाश्यं न नश्वरं शोच्यमिदमाहुः " ॥ ५ ॥

कायस्यानुवर्तनोपचरणपरिहरणयोग्यतोपदेशार्थमाह—

कायः स्वस्थोऽनुवर्त्यः स्यात् प्रतिकार्यश्च रोगितः ।
उपकारं विपर्यस्यं—स्त्याज्यः सद्भिः खलो यथा ॥ ६ ॥

टीका—स्यात्। कोसौ, कायः। किंविशिष्टः, अनुवर्त्यः पथ्याहारविहाराभ्यां स्वास्थ्य एव स्थापनीयः। कैः, सद्भिः साधुभिः। किंविशिष्टः सन्, स्वस्थोऽविकृतः। तथा प्रतिकार्यो योग्यौषधादिनोपचरणीयः। कोऽसौ, कायः। कैः, सद्भिः। किंविशिष्टः सन्, रोगितः संजातरोगः। तथा त्याज्यः। कोऽसौ, कायः सद्भिः। किं कुर्वन्, विपर्यस्यन् अन्यथा कुर्वन्। कं, उपकारं स्वास्थ्यायारोग्याय चेक्रीयमाणमुपक्रमं अधर्मसाधनं व्याधिं तद्वृद्धिं च गच्छन्नित्यर्थः। क इव, खलो दुर्जनः पिण्याको वा यथा॥ ६॥

शरीरार्थं धर्मोपघातस्यात्यन्तनिषेधमाह—

नावश्यं नाशिने हिंस्यो धर्मो देहाय कामदः।
देहो नष्टः पुनर्लभ्यो धर्मस्त्वत्यन्तदुर्लभः॥ ७॥

टीका—न हिंस्यो नोपहन्तव्यः सद्भिः। कोऽसौ, धर्मः। कस्मै, देहाय। किंविशिष्टाय, अवश्यं नाशिने निश्चितनाशाय। किंविशिष्टः, कामदः समीहितार्थप्रदो यतः। किञ्च। लभ्योऽवश्यप्राप्यः। कोऽसौ, देहः। कथं, पुनः। किंविशिष्टो, नष्टो नाशं गतः। देहमात्रापेक्षयेदमुच्यते, धर्मस्तु प्रक्रमात्समाधिमरणोऽत्यन्तदुर्लभो भवति। यत्नशतेनापि लब्धुमशक्य इत्यर्थः॥ ७॥

विधिवत्प्राणांस्त्यजत आत्मघातशङ्कामपनुदति

न चात्मघातोऽस्ति वृषक्षतौ वपुरुपेक्षितुः।
कषायावेशतः प्राणान् विषाद्यैर्हिंसतः स हि॥ ८॥

टीका—न चास्ति। कोसौ, आत्मघातः स्ववधलक्षणो दोषः। कस्य, उपेक्षितुः यथाविधि भक्तप्रत्याख्यानादीनां साधुत्वेन त्यजतः साधोः। किं तत्, वपुः शरीरम्। कस्यां सत्यां, वृषक्षतौ प्रतिपन्नव्रतविनाशहेतौ उपस्थितं सतीत्यर्थः। हि यस्माद्भवति। कोऽसौ, स आत्मघातः। कस्य, पुंसः। किं कुर्वतो, हिंसतो व्यपरोपयतः। कान्, प्राणान्। कैः, विषाद्यैः गरलशस्त्रश्वासनिरोधजलाग्निप्रवेशलंघनादिभिः। कस्मात्, कषायावेशतः क्रोधादिपरिणामवशात्॥ ८॥

एवं संयमविनाशहेतुसन्निधाने कायत्यागं समर्थ्येदानीं कालोपसर्गमरण-निर्णयपूर्वकप्रायोपवेशनेन तत्तन्निष्ठासाफल्यविधापनार्थमाह—

कालेन वोपसर्गेण निश्चित्यायुः क्षयोन्मुखम् ।
कृत्वा यथाविधि प्रायं तास्ताः सफलयेत् क्रियाः ॥ ९ ॥

टीका-सफलयेत् फलवतीः कुर्यात् साधुः। काः, क्रियाश्चेष्टाः। किंविशिष्टाः, तास्ताः दर्शनिकादिप्रतिमाविषया नित्यनैमित्तिकीश्च। किं कृत्वा, यथाविधि विधिना प्रायं संन्यासयुक्तानशनं कृत्वा। किं कृत्वा, निश्चित्य सम्यग् निर्णीय। किं तत्, आयुर्जीवितं। किंविशिष्टं, क्षयोन्मुखं प्रत्यासन्नविनाशं। केन, कालेन स्थितिबन्धच्छेदहेतुना समयेन। वा अथवा उपसर्गेण दुर्निवाराघकारिरोगशत्रुप्रहारादिलक्षणेन कृच्छ्रेण सुनिश्चिते मरणे ॥ ९ ॥

स्वाराधनापरिणतया कायत्यागे मुक्तिः करस्थेत्युपदेशार्थमाह—

देहादिवैकृतैः सम्यङ् निमित्तैस्तु सुनिश्चिते ।
मृत्यावाराधनामग्नमतेर्दूरे न तत्पदम् ॥ १० ॥

टीका—नास्ति। किं, तदशरीरतालक्षणं पदं। क्व, दूरे विप्रकर्षे। कतिपयभवलभ्यं निर्वाणमित्यर्थः। कस्य, आराधनामग्नमतेः निश्चयाराधनापरिणतमनसः पुंसः। क्व सति, मृत्यौ। किंविशिष्ट, सुनिश्चिते। कैः, देहादिवैकृतैः शरीरसंशीलादिविकृतिभिः स्वस्थातुररिष्टैरित्यर्थः। न केवलं तैः सम्यङ् निमित्तैश्च समीचीनभाविशुभाशुभज्ञानोपायैश्च कर्णपिशाचिकादविद्याज्योतिषोपश्रुतिशकुनादिभिः ॥ १० ॥

उपसर्गमरणोपनिपाते प्रायविधिमाह—

भृशापवर्तकवशात् कदलीघातवत्सकृत् ।
विरमत्यायुषि प्रायमविचारं समाचरेत् ॥ ११ ॥

टीका-समाचरेत्सम्यक्कुर्यान्मुमुक्षुः। किं, प्रायं। किंविशिष्टं, अविचारं विचरणं नानागमनमहादिनानाप्रकारप्रवृत्तिपरिणमनं विचारस्तेन रहितं प्रायं

भक्तप्रत्याख्यानं सार्वकालिकसंन्यासं शुद्धस्वात्मध्यानपरत्वमित्यर्थः । क्व सति, आयुषि भवधारणकारणे कर्मणि। किं कुर्वति, सकृदक्रमेण विरमत्यस्वर्तमाने नश्यति । कस्मात्, भृशापवर्तकवशात् अगाढापमृत्युकारणसामर्थ्यात् । किंवत्, कदलीघातवत् छिद्यमानकदलीकाण्डे यथा ॥ ११ ॥

स्वपाकच्युत्या स्वयं पातोन्मुखे देहे सल्लेखना विधेयेत्युपदिशात

क्रमेण पक्त्या फलवत् स्वयमेव पतिष्यति ।
देहे प्रीत्या महासत्त्वः कुर्यात्सल्लेखनाविधिम् ॥ १२ ॥

टीका—कुर्यात्। कोसौ, महासत्त्वः अनिवार्यधैर्यवीर्यः। कं, सल्लेखनाविधिं। कया, प्रीत्या प्रमोदेन। क्व सति, देहे। किं करिष्यति, पतिष्यति विनाशयिष्यति सति । केन, स्वयमेव कारणान्तरमन्तरेणैव । किं कृत्वा, पक्त्वा परिणम्य पतनयोग्यतामासाद्य । केन, क्रमेण कालानुपूर्व्या। किंवत्, फलवद् वृक्षफलेन तुल्यं। पातोन्मुखकायलिंगं यथा–"प्रतिदिवसं विजहद्बलमुज्झद् भुक्तिं त्यजत्प्रतीकारं। वपुरेव नृणां निगदति चरमचरित्रोदयं समयम्" ॥१२॥

कायनिर्ममत्वभावनाविधिमाह——

जन्ममृत्युजरातङ्काः कायस्यैव न जातु मे ।
न च कोऽपि भवत्येष ममेत्यङ्गेऽस्तु निर्ममः ॥ १३ ॥

टीका — अस्तु समाधिमरणार्थी भवतु। किंविशिष्टो, निर्ममो ममेदमिति सङ्कल्परहितः। क्व, अङ्गे। कथं, इत्येवं । भवन्ति। के, जन्ममृत्युजरातङ्काः जन्म च मृत्युश्च जरा च आतङ्कश्च ज्वरादिव्याधिस्ते रोगपुद्गलविवर्तकत्वात्कायस्यैव पुद्गलस्तूपस्य। न जातु कदाचिदपि। मे शुद्धचिद्रूपमात्रस्यात्मनः। न च नापि भवति। कोसौ, एष कायः। किंविशिष्टः, कोपि कश्चिदुपकर्ता अपकर्ता वा। कस्य, मम शुद्धचिदानन्दमयस्य ॥ १३ ॥

आहारहापनसमयमाह——

पिण्डे जात्याऽपि नाम्नाऽपि समो युक्त्याऽपि योजितः ।
पिण्डोस्ति स्वार्थनाशार्थो यदा तं हापयेत्तदा ॥ १४ ॥

टीका—हापयेत्परिचारकादिभिस्त्याजयेत् समाधिमरणोद्यतः । कं, तं पिण्डमाहारं । कदा, तदा तस्मिन्काले । यदा किं, यदा पिण्ड आहारोऽस्ति भवति । किंविशिष्टः, स्वार्थनाशार्थः आहारस्य हि स्वार्थो बलोपचयौजोलक्षणं देहकार्यं, देहस्य च धर्मसिद्धिलक्षणमात्मकार्यं स्वार्थस्य नाशो विनाशोऽर्थः प्रयोजनं फलं यस्य स तथोक्तः किंविशिष्टः, समस्तुल्यः । कया, जात्या पुद्गलत्वलक्षणया । अपिर्विस्मये आश्चर्ये । यत्सजातीयोऽपि स्वार्थं नाशयति । तथा नाम्ना सञ्ज्ञयाऽपि समः आहारदेहयोरुभयोरपि पिण्डशब्दाभिधेयत्वम् । जातिनामभ्यां साम्येऽपि सति विधिव्यतिक्रमे प्रयुक्तः स्वार्थनाशाय स्यादित्यत्राह—युक्त्या शास्त्रोक्तविधिना योजितोऽपि प्रयुक्तोऽपि । क्व, पिण्डे शरीरे ॥ १४ ॥

सल्लेखनाविधिपूर्वकं समाधिमरणोद्योगविधिमाह—

उपवासादिभिः कायं कषायं च श्रुतामृतैः ।
संलिख्य गणमध्ये स्यात् समाधिमरणोद्यमी ॥ १५ ॥

टीका—समाधिमरणोद्यमी साधको गणमध्ये चतुर्विधसङ्घसमक्षे स्याद् । किं कृत्वा, संलिख्य सम्यक् कृशीकृत्य । कं, कायं । कैः, उपवासादिभिरनशनादिबाह्यतपोविशेषैः । कषायं च क्रोधादिकं संलिख्य । कैः, श्रुतामृतैः श्रुतज्ञानसुधाभिः ॥ १५ ॥

मृत्युकाले धर्मविराधनाराधनयोः फलविशेषमाह—

आराद्धोऽपि चिरं धर्मो विराद्धो मरणे मुधा ।
स त्वाराद्धस्तत्क्षणेंऽहः क्षिपत्यपि चिरार्जितम् ॥ १६ ॥

टीका-भवति । कोसौ,धर्मः । किंविशिष्टो, मुधा निष्फलः । किंविशिष्टः सन् विराद्धः अतिवर्तितः । क्व, मरणे मृत्युसमये । किंविशिष्टोऽपि, आराद्धोऽपि

आराधितोपि। कियत्, चिरं दीर्घकालं। स तु धर्मस्तल्लक्षणे मरणसमये । आराधितो भावितः क्षिपति निराकरोति। किं तत्, अहः पापं। किंविशिष्टं, चिरार्जितमपि असंख्यातभवकोट्युपार्जितमपि ॥ १६ ॥

चिरकालभावितश्रामण्यस्यापि विराध्य म्रियमाणस्याकीर्तिदुष्परिपाकां स्वार्थक्षतिं दर्शयति—

नृपस्येव यतेर्धर्मो चिरमभ्यस्तिनोऽस्त्रवत् ।
युधीव स्खलतो मृत्यौ स्वार्थभ्रंशोऽयशःकटुः ॥ १७ ॥

टीका—भवति। कोऽसौ, स्वाभिमतार्थभ्रंशः स्वाभिमतार्थनाशः । कस्य यतेः। कस्येव, नृपस्येव राज्ञो यथा । किंविशिष्टः, अयशःकटुः अकीर्तिदुःखदः । किं कुर्वतः, स्खलतः प्रमाद्यतः । कस्मिन्, धर्मे। क, मृत्यौ मरणक्षणे । कस्यामिव, युधीव युद्धसमये यथा । किंविशिष्टस्य, चिरं दीर्घकालं धर्मे अस्त्रवत् शस्त्रे यथा अभ्यस्तिनः कृताभ्यासस्य। अभ्यस्तं पूर्वमनेनेति विगृह्य श्राद्धं भुक्तं ठोऽनेन वेत्यनेन इन्प्रत्ययः ॥ १७ ॥

ननु सुभावितमार्गस्यापि कस्यचित्समाधिमरणं न दृश्यते, कस्यचित्पुनरभावितमार्गस्यापि तदुपलभ्यते, तदनाप्तीयमिति वदन्तं प्रति श्लोकद्वयमाह-

सम्यग्भावितमार्गोऽन्ते स्यादेवाराधको यदि ।
प्रतिरोधि सुदुर्वारं किञ्चिन्नोदेति दुष्कृतम् ॥ १८ ॥

टीका—स्यादेव अवश्यं भवेत् । कोऽसौ, सम्यग्भावितमार्गः सम्यक् सम्पूर्ण चिरं भावितोऽभ्यस्तो मार्गो रत्नत्रयं येन स तथोक्तः । किंविशिष्टः स्यात्, अन्ते जन्मप्रान्ते आराधकस्तदा। यदि चेन्नोदेति नोद्भवति। किं तत्, दुष्कृतं पुराकृतमशुभं कर्म । किंविशिष्टं, प्रतिरोधि समाधिप्रतिखण्डकं। पुनः किंविशिष्टं, सुदुर्वारं यत्नशतेनापि प्रतिषेद्धुमशक्यं । पुनरपि किंविशिष्टं, किञ्चिदनिर्दिष्टनामकं। उक्तं च-मृतिकाले नरा हन्त सन्तोपि चिरभाविताः। पतन्ति दर्शनादिभ्यः प्राक्कृताशुभगौरवात् ॥ या त्वभावितमार्गस्य कस्या

प्याराधना मृतौ । आराधना रत्नत्रयैकाग्रता स्यात् । अथमन्त्रनिधिलाभो भाक्ति कऽनिर्वचनाराधनपरे न विष्टम्भो नाभनिवेष्टव्योऽत्र दुराग्रहो न कर्तव्यो जिनवचनं प्रमाणीकृत्य समाधिमरणाय प्रयतितव्यमित्यर्थः । उक्तं च—पूर्वमभावितयोगो यद्यप्याराधयन्मृतौ कश्चित् । स्थाणौ निधानलाभो निदर्शनं नैव सर्वत्र ॥ १८ ॥

ननु दूरभव्यस्य व्रतं चरतोऽपि न मुक्तिः स्यत्तदलं तद्दवीयस्त्वे व्रतयत्नेनेत्यारेकायां समाधत्ते—

कार्यो मुक्तौ दवीयस्यामपि यत्नः सदा व्रते ।
वरं स्वः समयाकारो व्रतान्न नरकेऽव्रतात् ॥ १९ ॥

टीका-कार्यः सदा जिनभाक्तिकैः कर्तव्यः । कोसौ, यत्नस्तात्पर्यं । क, व्रते । कस्यां सत्यां, मुक्तौ निर्वृतौ । किंविशिष्टायां, दवीयस्यां दूरतरायां चिरभाविन्यामपि । किं पुनरितरस्यां । अत्रोपपत्तिमाह—वरं भद्रं भवतु । कोऽसौ, स्वः स्वर्गे समयाकारः मुक्तेरर्वाक्कालयापना कस्मात्, व्रतात् व्रतानुष्ठानार्जितपुण्यविपाकात् । न वरं । कोसौ, समयाकारः । क, नरके नरकादिदुर्गतौ । कस्माद् अव्रतात् हिंसाद्याचरणार्जितपापविपाकात् ॥ १९ ॥

भक्तप्रत्याख्यानयोग्यतामाह—

धर्माय व्याधिदुर्भिक्षजरादौ निष्प्रतिक्रिये ।
त्यक्तुं वपुः स्वपाकेन तच्च्युतौ चाऽशनं त्यजेत् ॥ २० ॥

टीका—त्यजेत् प्रत्याख्यायात् श्रावको यमी वा । किं तत्, अशनं भक्तं भक्तप्रत्याख्यानं कुर्यादित्यर्थः । किं कर्तुं, त्यक्तुं मोक्तुं । किं तद्, वपुः शरीरं । कस्मै, धर्माय आत्मना सह धर्मं भवान्तरं नेतुं । क सति, व्याधिदुर्भिक्षज्वरोपसर्गादौ धर्मध्वंसहेतावुपस्थिते । किंविशिष्टे, निष्प्रतिक्रिये प्रतीकाररहिते तथा स्वपाकेन स्वयं कालक्रमेण परिणम्यायुःक्षये । तच्च्युतौ तस्य वपुषश्च्यवने । चशब्दात् घोरोपसर्गादिना च्याव्यमाने च सत्यशनं त्यजेत् । एतेन शरीरत्यजनच्यवनच्यावनविषयं त्रिविधं भक्तप्रत्याख्यानं मरणमन्वाख्यातं बोद्धव्यम् । २० ।

समाधिमरणार्थं शरीरोपस्कारविधिमाह—

अन्नैः पुष्टो मलैर्दुष्टो देहो नान्ते समाधये ।
तत्कश्यो विधिना साधोः शोध्यश्चायं तदीप्सया ॥ २१ ॥

टीका—न भवति । कोऽसौ, देहः । कस्मै, समाधये समाध्यर्थं । क, अन्ते मरणसमये । किंविशिष्टो, अन्नैराहारैः पुष्ट उपचितो मलैश्च वातपित्तकफैर्दुष्टो विकृतः । यत एवं तत्तस्मात् कश्यः कृशीकर्त्तव्योऽयं देहः । कस्य, साधोः सिद्धिसाधकेनेत्यर्थः । केन, विधिना सल्लेखनाविधानेन । शोध्यश्च योग्यविरेचनबस्तिकर्मादिना निष्काशितजठरमलः कर्त्तव्यः । कया, तदीप्सया समाधिवाञ्छया ॥ २१ ॥

कषायकर्शनं विना कायकर्शनस्य नैष्फल्यं समर्थयते—

सल्लेखनाऽसंलिखतः कषायान्निष्फला तनोः ।
कायोऽजडैर्दण्डयितुं कषायानेव दण्ड्यते ॥ २२ ॥

टीका—भवति । काऽसौ, सल्लेखना कृशीकरणं । कस्याः, तनोः शरीरस्य । किंविशिष्टा, निष्फला । किं कुर्वतः, असंलिखतः कृशानकुर्वतः साधोः । कान्, कषायान्, क्रोधादीन् । यतो दंड्यते परिक्लिश्यते । कोऽसौ, कायः । कैः, अजडैः बुधैः । किं कर्तुं, दण्डयितुं निगृहीतुं । कान्, कषायानेव न रसरक्तादिधातून् ॥ २२ ॥

आहारदृप्तमनसां कषायदुर्जयत्वं प्रकाश्य भेदज्ञानबलाज्जेतॄणां जयवादमाह-

अन्धोमदान्धैः प्रायेण कषायाः सन्ति दुर्जयाः ।
ये तु स्वाङ्गान्तरज्ञानात्तान् जयन्ति जयन्ति ते ॥ २३ ॥

टीका—सन्ति भवंति । के, कषायाः । किंविशिष्टाः, दुर्जया जेतुमशक्याः । कैः, अन्धोमदांधैः अन्धस आहारस्य मदः क्षीबता आहारकृतो मनोदर्प इत्यर्थः । अन्धोमदेन अन्धाः स्वपरतत्त्वज्ञानविकलाः अन्धोमदान्धास्तैः । केन, प्रायेण बाहुल्येन । कदाचिद्दैवदुर्योगात्तैरपि कषाया जीयन्ते इत्येवमर्थमेतत् । ये

तु ये पुरुषाः पुनस्तान् कषायान् जयन्ति । कस्मात्स्वाङ्गान्तरज्ञानात् स्व आत्मा अङ्गं देहः स स्वाङ्गं स्वाङ्गे स्वाङ्गयोरन्तरं भेदः स्वाङ्गान्तरं तस्य ज्ञानमहमन्यो देहोऽन्य इति बोधस्तस्मात् ते पुरुषा जयन्ति सर्वोत्कर्षेण वर्तन्ते । जगदुपरि स्फुरन्तीत्यर्थः ॥ २३ ॥

एवं देहाहारत्यागं विधाप्येदानीमीहितत्यागेन स्वात्मसमाधये क्षपकं प्रेरयन्नाह—

गहनं न तनोर्हानं पुंसः किन्त्वत्र संयमः ।
योगानुवृत्तेर्व्यावर्त्य तदात्माऽऽत्मनि युज्यताम् ॥ २४ ॥

टीका—न भवति । किं तत्, हानं त्यजनं । कस्यास्तनोः शरीरस्य । किंविशिष्टं गहनं कष्टं दुष्करमित्यर्थः । कस्य, पुंसः पुरुषस्य । काभिश्चित्स्त्रीभिरपि प्रियविप्रयोगादौ क्रियमाणस्य शरीरत्यजनस्य दृश्यमानत्वात् । किं तु भवति । कोऽसौ, संयमः । किंविशिष्टो, गहनः । क्व, अत्र तनुहाने क्रियमाणे । यत एवं ततस्माद्युज्यतां समाधीयतां क्षपकेण । कोऽसौ, आत्मा कस्मिन्, आत्मनि । किं कृत्वा, व्यावर्त्य निवर्त्य । कस्याः, योगानुवृत्तेः मनोवाक्कायव्यापारानुगमात् । भावतो निजनिजव्यापारेषु मनोवाक्कायान् प्रवर्त्येत्यर्थः ॥ २४ ॥

यतिद्वयस्य समाधिमरणफलविशेषमभिधत्ते—

श्रावकः श्रमणो वाऽन्ते कृत्वा योग्यां स्थिराशयः ।
शुद्धस्वात्मरतः प्राणान् मुक्त्वा स्यादुदितोदितः ॥ २५ ॥

टीका—श्रावकः श्रमणो वा स्यात् । किंविशिष्टः, उदितोदितः विविधाद्भुताभ्युदयानुभवपूर्वकनिःश्रेयसभाग्भवेत । किं कृत्वा, मुक्त्वा त्यक्त्वा । कान्, प्राणान् । कथम्भूतः सन्, शुद्धस्वात्मरतः निर्मलनिजचिद्रूपलीनः । कथम्भूतो भूत्वा, स्थिराशयः निश्चलचित्तः । क्व, अन्ते प्रत्यासन्ने मरणे । किं कृत्वा, कृत्वा । कां, योग्यां प्रायार्थीत्यादिना प्रबन्धेन वक्ष्यमाणं परिकर्म ॥ २५ ॥

निर्यापकबलाद्भावितात्मनः समाधिमरणेऽन्तरायाभावं दर्शयति—

समाधिसाधनचणे गणेशे च गणे च न ।
दुर्दैवेनापि सुकरः प्रत्यूहो भावितात्मनः ॥ २६ ॥

टीका—न भवति । कोऽसौ, प्रत्यूहो विघ्नः । किंविशिष्टः, सुकरः सुखेन कर्तुं शक्यः । केन, दुर्दैवेन प्राक्कृताशुभकर्मणा । किं पुनः प्रतिपक्षादिनेत्यपिशब्दार्थः । कस्य, भावितात्मनः भावितात्मानं समाधेश्चालयितुं दुर्दैवमपि न शक्नोतीत्यर्थः । क्व सति, गणेशे निर्यापकाचार्ये च । गणे च सङ्घे । किंविशिष्टे, समाधिसाधनचणे समाधे रत्नत्रयैकाग्रतायाः साधनं सम्पादनं तेन वित्ते—अनेकशः क्षपकाणां समाधिसाधनेन प्रसिद्ध इत्यर्थः ॥ २६ ॥

श्लोकद्वयेन समाधिमरणमाहात्म्यं स्तुवन्नाह—

प्राग्जन्तुनाऽमुनाऽनन्ताः प्राप्तास्तद्भवमृत्यवः ।
समाधिपुण्यो न परं परमश्चरमक्षणः ॥ २७ ॥

टीका—प्राप्ताः । के, तद्भवमृत्यवः भवान्तरप्राप्तेरनन्तरोपश्लिष्टपूर्वभवविगमनं तद्भवमरणमाख्यायते । कियन्तः, अनन्ताः । केन, अमुना संसारिणा जन्तुना जीवेन । कथं, प्राक् इतः पूर्वं । परं केवलं न प्राप्तः कोऽसौ, चरमक्षणः भवपर्यायविगमान्त्यसमयः । किंविशिष्टः, समाधिपुण्यः रत्नत्रयैकाग्रतया पवित्रः । संसारकारणकर्मनिर्मूलनसमर्थत्वात्परमः इतरसर्वक्षणेभ्य उत्कृष्टश्च ॥ २७ ॥

परं शंसन्ति माहात्म्यं सर्वज्ञाश्चरमक्षणे ।
यस्मिन्समाहिता भव्या भञ्जन्ति भवपञ्जरम् ॥ २८ ॥

टीका—परमुत्कृष्टं माहात्म्यं महिमानं सर्वज्ञाः शंसन्ति स्तुवन्ति । क्व, चरमक्षणे । यस्मिन् यत्र चरमक्षणे समाहिताः समाधिं गता भव्याः भञ्जन्ति विघटयन्ति । किं तत्, भवपञ्जरं भवः संसारः पञ्जरमिव शुकादिपक्षिण इव जीवस्य पारतंत्र्यनिमित्तत्वात् ॥ २८ ॥

संन्यासार्थं क्षेत्रविशेषस्वीकारमाह—

प्रायार्थी जिनजन्मादिस्थानं परमपावनम् ।
आश्रयेत्तदलाभे तु योग्यमर्हद्गृहादिकम् ॥ २९ ॥

टीका—आश्रयेदुपसर्पेत । कोऽसौ, प्रायार्थी संन्यासानशनकामः । किं तत्, जिनजन्मादिस्थानं । किंविशिष्टं, परमपावनं परं पवित्रीकरणं । तत्र जन्मस्थानं वृषभनाथस्यायोद्धया । निष्क्रमणस्थानं सिद्धार्थवनं । ज्ञानस्थानं शकटमुखोद्यानं । निर्वाणस्थानं कैलासः । एवमन्येषामपि जन्मादिस्थानानि यथागममधिगम्यानि । तदलाभे तु तस्याप्राप्तौ पुनराश्रयेदसौ । किं तत्, अर्हद्गृहादिकं जिनचैत्यालयसंयताश्रमादिकं । किंविशिष्टं, योग्यं समाधि-साधनसमर्थम् ॥ २९ ॥

तीर्थं प्रति चलितस्यावान्तरमार्गेऽपि मृतस्याराधकत्वं दर्शयति—

प्रस्थितो यदि तीर्थाय म्रियतेऽवान्तरे तदा ।
अस्त्येवाराधको यस्माद्भावना भवनाशिनी ॥ ३० ॥

टीका—यदि म्रियते समाध्यर्थी । क्व, अवान्तरे स्वस्थानतीर्थस्थानयोर-न्तराले । उपलक्षणमेतत् । तेन निर्यापकाचार्यमरणमप्याराधकं स्यादेव । किंविशिष्टः सन्, प्रस्थितो गन्तुमारब्धः । कस्मै, तीर्थाय जिनजन्मादि-स्थानाय निर्यापकाचार्याय वा । तदा अस्त्येव अवश्यं भवत्यसौ । किंवि-शिष्टः, आराधकः यस्मात्कारणाद्भवति । काऽसौ, भावना समाधिसाधन-प्रणिधानं । किंविशिष्टा, भवनाशिनी संसारनिरसनी ॥ ३० ॥

तीर्थं गमिष्यन् क्षमापनं क्षमणं च कुर्यादित्युपदिशति—

रागाद् द्वेषान्ममत्वाद्वा यो विराद्धो विराधकः ।
यश्च तं क्षमयेत्तस्मै क्षाम्येच्च त्रिविधेन सः ॥ ३१ ॥

टीका—क्षमयेत् क्षमां कारयेत्स तीर्थं जिगमिषुः । कं, तं । यः किं, यो विराद्धो दुःखे स्थापितः । कस्मात्, रागात् स्नेहात् द्वेषात् क्रोधात् ममत्वात्

ममकाराद्वा । यश्च रागादेर्विराधकः स्वस्य वैमनस्योत्पादकः सम्पन्नस्तस्मै । क्षाम्येच्च क्षमां कुर्यात्सः । केन, त्रिविधेन मनोवाक्कायेन ॥ ३१ ॥

क्षमणकरणाकरणयोः फलमाह—

तीर्णो भवार्णवस्तैर्ये क्षाम्यन्ति क्षमयन्ति च ।
क्षाम्यन्ति न क्षमयतां ये ते दीर्घाजवञ्जवाः ॥ ३२ ॥

टीका—तैः पुम्भिः । तीर्णो लङ्घितः । कोऽसौ, भवार्णवः संसाराब्धिः । ये किं, ये क्षाम्यन्ति विराधकाय क्षमां कुर्वन्ति । ये च क्षमयन्ति विराद्धं क्षमां कारयन्ति । ये पुनर्न क्षाम्यन्ति । केषां क्षमयतां क्षमां कारयतां । ते भवन्ति । किंविशिष्टाः, दीर्घाजवञ्जवाः चिरसंसाराः ॥ ३२ ॥

क्षपकस्यालोचनाविधिमाह—

योग्यायां वसतौ काले स्वागः सर्वं स सूरये ।
निवेद्य शोधितस्तेन निःशल्यो विहरेत्पथि ॥ ३३ ॥

टीका—विहरेत प्रवर्तेत । कोऽसौ, स क्षपकः । क्व, पथि रत्नत्रये । किंविशिष्टः सन्, निःशल्यो मायादिशल्यरहितः । कथं भूतो भूत्वा, शोधितः प्रतिक्रमणेन प्रायश्चित्तादिविधिना निष्कासितदोषः । केन, तेन कर्त्रा । किं कृत्वा, निवेद्य आलोच्य । किं तत्, स्वागः आत्मनो व्रतादावतीचारं । किंविशिष्टं, सर्वं । कस्मै, सूरये निर्यापकाचार्याय । क्व, वसतौ स्थाने । किंविशिष्टायां, योग्यायां आलोचनोचितायां, तथा कालेऽपि योग्ये ॥ ३३ ॥

संस्तरारोहणविधिमाह—

विशुद्धिसुधया सिक्तः स यथोक्तं समाधये ।
प्रागुदग्वा शिरः कृत्वा स्वस्थः संस्तरमाश्रयेत् ॥ ३४ ॥

टीका—आश्रयेत् आरोहयेत्सः । कं, संस्तरं । किंविशिष्टं, यथोक्तं येन प्रकारेणागमे कथितं । कस्मै, समाधये समाधिनिमित्तं । किंविशिष्टः सन्, स्वस्थः निर्व्याक्षेपः । किं कृत्वा, कृत्वा । किं तद्, शिरः शीर्षं । क्व, प्राक् पूर्व-

स्यां दिशि । उदग्वा उत्तरस्यां । कथं भूतो भूत्वा, सिक्तो निर्वापितः । कया, विशुद्धिसुधया विशुद्धिर्मनःशरीरनैर्मल्यं प्रायश्चित्तविधानं वा सैव सुधा अमृतं तया ॥ ३४ ॥

संस्तरारोहणकाले महाव्रतमर्थयमानस्यार्यस्याचेलक्यलिङ्ग विधानार्थमाह—

त्रिस्थानदोषयुक्तायाप्यापवादिकलिङ्गिने ।
महाव्रतार्थिने दद्याल्लिङ्गमौत्सर्गिकं तदा ॥ ३५ ॥

टीका—दद्याद्वितरेत् निर्यापकाचार्यः। किं तत्, लिंगं आचेलक्यादि चतुर्विधं। किंविशिष्टं,औत्सर्गिकं उत्सर्गे सकलपरिग्रहत्यागे भवं नाग्न्यमित्यर्थः। क, तदा संस्तरारोहणकाले । कस्मै, आपवादिकलिङ्गिने सग्रन्थलिङ्गाय आर्यायेत्यर्थः। किंविशिष्टाय, त्रिस्थानदोषयुक्तायापि त्रिस्थानेषु दोषो वृषणयोः कुरण्डलातिलम्बमानत्वादिर्मेहने च चर्मरहितत्वातिदीर्घत्वासकृदुत्थानशीलत्वादिस्तेन सहितायापि । पुनः किंविशिष्टाय, महाव्रतार्थिने महाव्रतं याचमानाय॥३५॥

उत्कृष्टस्यापि श्रावकस्योपचरितायापि महाव्रतायाप्रभुत्वमाह—

कौपीनेऽपि समूर्छत्वान्नार्हत्यार्यो महाव्रतम् ।
अपि भाक्तममूर्छत्वात् साटकेऽप्यार्यिकाऽर्हति ॥ ३६ ॥

टीका—नार्हति न गृहीतुमुचितो भवति। कोऽसौ,आर्यः परमोत्कृष्टश्रावकः। किं तत्, महाव्रतं । किंविशिष्टमपि भाक्तमुपचरितमपि । कुतः, समूर्छत्वान्ममेदमितिग्रहाविष्टत्वात् । क, कौपीने गुह्यप्रच्छादनवस्त्रखण्डमात्रे । अपि विस्मये। आर्यिका पुनरर्हति। भाक्तमेव महाव्रतं। कस्माद्, अमूर्छत्वात् । क, साटकेऽपि। संस्तरारोहणकालादन्यदातनमेतद्विधानं प्रसङ्गादन्वाख्यातम्।३६।

प्रशस्तमुष्कमेहनस्य सर्वस्य सर्वत्र प्रशस्तमौत्सर्गिकमपवदन्नाह—

ह्रीमान्महर्द्धिको यो वा मिथ्यात्वप्रायबान्धवः ।
सोऽविविक्ते पदे नाग्न्यं शस्तलिङ्गोऽपि नार्हति ॥ ३७ ॥

टीका—स श्रावको नार्हति । किं तद्, नाग्न्यं नग्नत्वं । क, पदे स्थाने । किंविशिष्टे, अविविक्ते बहुजने एकान्तस्थाने सोऽप्यर्हतीत्यर्थः । किंविशिष्टो-

ऽपि, शस्तलिङ्गोऽपि लिङ्गं पुँस्त्वचिह्नं मुष्कमेहनमित्यर्थः शस्तं प्रशस्तं प्रागुक्तदोषवियुक्तं लिंगं यस्य स शस्तलिंगः । यः किं, यो ह्रीमान् । लज्जावान् । महर्द्धिकः श्रीमान् । मिथ्यात्वप्रायबान्धवो वा भवति । मिथ्यात्वं प्रायेण बाहुल्येन येषां ते मिथ्यात्वप्राया बान्धवा ज्ञातयो यस्य स तथोक्तः ॥ ३७ ॥

संस्तरारोहणसमये स्त्रिया लिङ्गविकल्पमतिदिशन्नाह—

यदौत्सर्गिकमन्यद्वा लिङ्गमुक्तं जिनैः स्त्रियाः ।
पुंवत्तदिष्यते मृत्युकाले स्वल्पीकृतोपधेः ॥ ३८ ॥

टीका—यल्लिङ्गमौत्सर्गिकमन्यद्वा पदादिकं स्त्रिया जिनैरुक्तं तन्मृत्युकाले तस्याः स्वल्पीकृतोपधेः विविक्तवसत्यादिसम्पत्तौ सत्यां वस्त्रमात्रमपि त्यक्तवत्याः श्रुतज्ञैरिष्यते अभिमन्यते । कस्येव, पुंवत् । अयमर्थः । पुंसो यदौत्सर्गिकलिंगस्य मृत्यावौत्सर्गिकमेव लिंगमिष्यते आपवादिकलिंगस्य चानंतरमेव व्याख्यातप्रकारं, तदा योषितोऽपि ॥ ३८ ॥

मुमुक्षोर्लिंगाग्रहत्यागेन स्वद्रव्यग्रहपरत्वमुपदिशति—

देह एव भवो जन्तोर्यल्लिङ्गं च तदाश्रितम् ।
जातिवत्तद्ग्रहं तत्र त्यक्त्वा स्वात्मग्रहं विशेत् ॥ ३९ ॥

टीका—यद्यस्माज्जन्तोर्जीवस्य भवः संसारो भवति । कोऽसौ, देह एव न क्षेत्रादिकं । यच्च लिंगं नाग्न्यादिकं भवति । किंविशिष्टं, तदाश्रितं देहसंबंधि । किंवत्, जातिवत् ब्राह्मणत्वादिजातिर्यथा । तत्तस्मात्तत्र लिंगे जाताविव ग्रहमभिनिवेशं त्यक्त्वा विशेत् प्रविशेत् क्षपकः । कं, स्वात्मग्रहं स्वशुद्धचिद्रूपनिबन्धं ॥ ३९ ॥

परद्रव्यग्रहस्य बन्धहेतुत्वात्तत्प्रतिपक्षभावनामुपदिशति—

परद्रव्यग्रहेणैव यद्बद्धोऽनादिचेतनः ।
तत्स्वद्रव्यग्रहेणैव मोक्ष्यतेऽतस्तमावहेत् ॥ ४० ॥

टीका—यद्यस्मात् आत्मा परद्रव्यस्य शरीरादेर्ग्रहेण निर्बन्धेनैवानादिबद्धो ज्ञानावरणादिकर्मपारतन्त्र्यमापन्नः । तत्तस्मात्स्वद्रव्यग्रहेणैव शुद्धस्व-

त्माभिनिवेशेनैव मोक्ष्यते मुक्तो भविष्यति । यत एवं तत एतस्मात्कारणात् तं स्वदेहग्रहमावहेत्कुर्यान्मुमुक्षुः ॥ ४० ॥

शुद्धिविवेकप्राप्तिपूर्वकं समाधिमरणं प्रणौति—

अलब्धपूर्वं किं तेन न लब्धं येन जीवितम् ।
त्यक्तं समाधिना शुद्धिं विवेकं चाप्य पञ्चधा ॥ ४१ ॥

टीका— तेन महाभव्येन । किमलब्धपूर्वमनादिकालमप्राप्तं सम्यक्त्वसहचारि महाभ्युदयादिकं न लब्धं तत्सर्वं प्राप्तमित्यर्थः । येन जीवितं समाधिना रत्नत्रयैकाग्रतया त्यक्तं । किं कृत्वा, पञ्चधा पञ्चप्रकारं शुद्धिं पञ्चप्रकारं च विवेकमाप्य ॥ ४१ ॥

बहिरंगान्तरंगविषयभेदात्पञ्चविधां शुद्धिमाह—

शय्योपध्यालोचनान्नवैयावृत्येषु पञ्चधा ।
शुद्धिः स्यात् दृष्टिधीवृत्तविनयावश्यकेषु वा ॥ ४२ ॥

टीका—स्यादसौ शुद्धिः । कतिधा, पञ्चधा । केषु, शय्यादिषु विषयेषु । तत्र शय्या वसतिसंस्तरौ उपधिः संयमसाधनं । आलोचना गुरवे दोषनिवेदनं । अन्नं चतुर्विधाहाराः । वैयावृत्यं परिचारकैः क्रियमाणं पादमर्दनादिकं । तेषु पञ्चसु शुद्धिः प्राणेन्द्रियसंयमेन प्रवृत्तिरेषा बाह्या । इयं त्वन्तरङ्गा पञ्चधा शुद्धिः स्यात् । याऽसौ दृष्ट्यादिषु पंचसु । दृष्टौ दर्शने धियां ज्ञाने, वृत्ते चारित्रे, विनये प्रश्रये, आवश्यके सामयिकादिषट्काचरणे च निरतिचारतया प्रवृत्तिः ॥ ४२ ॥

शुद्धिवन्मतद्वयेन पञ्चधा विवेकमाह—

विवेकोऽक्षकषायाङ्गभक्तोपधिषु पञ्चधा ।
स्याच्छय्योपधिकायान्नवैयावृत्यकरेषु वा ॥ ४३ ॥

टीका—विवेक आत्मनः पृथग्भावः साध्यवसायः पञ्चधा स्यात् । केषु, अक्षादिषु विषयेषु । तत्रेन्द्रियेभ्यः कषायेभ्यश्चात्मनः पृथक् चिन्तनं द्विविधो

भावविवेकः । द्रव्यविवेकस्तु शरीराहारसंयमोपकरणेभ्यः स्वस्य पृथक् चिन्तनेन त्रिविधः । तमेव मन्त्रान्तरेणाह--शय्येत्यादि शय्यादयः प्रत्याख्याताः तेभ्यः पृथक् चिन्तनेन कैश्चिद्विवेकः पञ्चधोक्तः ।। ४३ ।।

निश्चेलसचेलयोर्महाव्रतभावनाविशेषमाह---

निर्यापके समर्प्य स्वं भक्त्यारोप्य महाव्रतम् ।
निश्चेलो भावयेदन्यस्त्वनारोपितमेव तत् ।। ४४ ।।

टीका --भावयेद्भूयो भूयो मनसि प्रणिदध्यात् । कोऽसौ, निश्चेलस्त्यक्तसमस्तवस्त्रादिपरिग्रहः । किं तत्, महाव्रतं । किं कृत्वा, आरोप्य निर्यापकाचार्यवचनेनात्मनि स्थापयित्वा । कया, भक्त्या पंचतय्या हिंसादिविरत्या, पंचतय्या समित्या, त्रितय्या च गुप्त्या, व्रतसमितिगुप्तिभक्त्रयोदशप्रकारं चारित्रमात्मनि व्यवस्थाप्य । किं कृत्वा, समर्प्य आयत्तं कृत्वा । किं, स्वमात्मानं । कस्मिन्, निर्यापके संसारान्निर्यान्तं क्षपकं प्रयोजयतीति निर्यापकः षट्त्रिंशद्गुणोपेतो धर्माचार्यस्तस्मिन् । कया, भक्त्या शुभवृत्त्या । भक्त्येत्यस्य संन्दशकन्यायेनोभयत्र संबंधः । अन्यस्तु सचेलः पुनस्तन्महाव्रतं भावयेत् । किंविशिष्टं, अनारोपितमेव सग्रन्थस्य तदारोपणेऽनधिकारात् ।। ४४ ।।

अतिचारपञ्चकपरिहारेण सल्लेखनाविधिना संस्तरस्थस्य प्रवृत्तिमुपदिशति-

जीवितमरणाशंसे सुहृदनुरागं सुखानुबन्धमजन् ।
सनिदानं संस्तरगश्चरेच्च सल्लेखनाविधिना ।। ४५ ।।

टीका--न केवलमारोपितमनारोपितं वा महाव्रतं संस्तरगो भावयेच्चरेच्च चेष्टेत । केन, सल्लेखनाविधिना जन्ममृत्युजरातङ्का इत्यादिना प्रबन्धेन प्रागुक्तेन । किं कुर्वन्, अजन् क्षिपन् निराकुर्वन्नित्यर्थः । के, जीवितमरणाशंसे जीविताकांक्षां । मरणाकांक्षां च । तथा सुहृदनुरागं मित्रानुरागं, तथा सुखानुबन्धं । किंविशिष्टं, सनिदानं निदानेन सह । पंचमं निदानमप्यजन्नित्यर्थः । इतो विशेषेणैषामर्थः प्रकाश्यते । तत्र जीविताशंसा शरीरमिदमवश्यहेयं

जलबुद्बुदवदनित्यमित्यादिक्रमस्मरतोऽस्यावस्थानं कथं स्यादित्यादरः । पूजाविशेषदर्शनात्प्रभूतपरिचारावलोकनात्सर्वलोकश्लाघाश्रवणाच्चैवं हि मन्यते प्रत्याख्यातचतुर्विधाहारस्यापि मे जीवितमेव श्रेयः । यत एवंविधा मदुद्देशेनेयं विभूतिर्वर्तत इत्याकांक्षेति यावत । मरणाशंसा रोगोपद्रवाकुलतया प्राप्तजीवनसंक्लेशस्य मरणं प्रति चित्तप्रणिधानं । यदा न कश्चित्तं प्रतिपन्नाशनं प्रति सर्वथा आद्रियते, न च कश्चित् श्लाघते, तदा तस्य यदि शीघ्रं म्रीयेय तदा भद्रकं स्यादित्येवं विविधपरिणामोत्पत्तिर्वा । सुहृदनुरागो बाल्ये सहपांशु क्रीडनादि व्यसने सहायत्वमुत्सवे सम्भ्रम इत्येवमादेश्च मित्रस्युक्तस्यानुस्मरणं । बाल्याद्यवस्थासहक्रीडितमित्रानुस्मरणं वा । सुखानुबन्ध एवं मया भुक्तमेवं शयितमेवं क्रीडितमित्येवमादि प्रीतिविशेषं प्रति स्मृतिसमन्वाहारः । निदानमस्मात्तपसः सुदुश्चराज्जन्मान्तरे इन्द्रश्चक्रवर्ती धरणेन्द्रो वा स्यामहमित्येवमाद्यनागताभ्युदयाकांक्षा ॥ ४५ ॥

एवं संस्तरारूढस्य क्षपकस्य निर्यापकाचार्य एतत्कृत्वेदं कुर्यादित्याह—

यतीन्नियुज्य तत्कृत्ये यथार्हं गुणवत्तमान् ।
सूरिस्तं भूरि संस्कुर्यात् स ह्यार्याणां महाक्रतुः ॥ ४६ ॥

टीका—संस्कुर्यात् रत्नत्रयसंस्कारयुतं कुर्यात् । कोऽसौ, सूरिः । कं, तं क्षपकं । कथं, भूरि बहु । किं कृत्वा, नियुज्य अधिकृत्य । कान्, यतीन् साधून् । क, तत्कृत्ये आराधकस्याभर्शनादिशरीरकार्ये विकथानिवारणे धर्मकथायां भक्तपानतल्पशोधनमलोत्सर्जनादौ च । कथं, यथार्हं यथायोग्यं । किंविशिष्टान्, गुणवत्तमान् मोक्षकारणगुणातिशयशालिनः । हि यस्मात् क्षपकसमाधिसाधनविधिरार्याणां यतीनां महाक्रतुः परमयज्ञः स्यात् ॥ ४६ ॥

क्षपकस्याहारविशेषप्रकाशनात् भोजनासक्तिनिषेधार्थमाह—

योग्यं विचित्रमाहारं प्रकाश्येष्टं तमाशयेत् ।
तत्रासजन्तमज्ञानाज्ज्ञानाख्यानैर्निवर्तयेत् ॥ ४७ ॥

टीका—आशयेद्भोजयेत्सूरिः । कं, क्षपकं । कं, इष्टं किंचित्सर्वं वा क्षपकेणाकांक्ष्यमाणमाहारं । किं कृत्वा, प्रकाश्य दर्शयित्वा । कं, आहारं । किंविशिष्टं, योग्यं कल्प्यं । पुनः किंविशिष्टं, विचित्रं नानाप्रकारं कश्चिद्धि भोज्यविशेषान दृष्ट्वा तीरं प्राप्तस्य किं ममैभिरिति प्राप्तवैराग्यः संवेगपरो भवति । कश्चिच्च किमपि भुक्त्वा, अपरश्च सर्वं भुक्त्वा तथा भवति । कश्चित्तु तानास्वाद्य तद्रसासक्तिपरो भवति, चित्रत्वान्मोहनीयकर्मविलासानां । तत्र चेष्टतया भोज्यमाने भोजने अज्ञानात्तत्वानवबोधादासजन्तमासक्तिं कुर्वन्तं क्षपकं निवर्तयेत् ततो विरमयेत्सूरिः । कैः, ज्ञानाख्यानैर्बोधप्रचोदकप्रसिद्धोपाख्यानैः ॥४७॥

नवभिः श्लोकैराहारविशेषगृद्धिप्रतिषेधपुरःसरं तत्परिहारक्रममाह—

भो निर्जिताक्ष विज्ञातपरमार्थ महायशः ।
किमद्य प्रतिभान्तीमे पुद्गलाः स्वहितास्तव ॥ ४८ ॥

टीका— भो अहो । निर्जिताक्ष निःशेषवशीकृतहृषीक । भो विज्ञातपरमार्थ अनन्यसाधारणतया निश्चितनिश्चेतव्यवस्तुतत्त्व । भो महायशः सकलदिक्चक्रविसृत्वरकीर्ते आराधकराज । अद्य सम्प्रति । इमे भाजनशयनाद्युपकल्पिताः पुद्गला मूर्तपदार्थाः । किं तव प्रतिभान्ति प्रतिभासन्ते । किंविशिष्टाः, स्वहिता आत्मन उपकारकाः । किंशब्दः प्रश्न वितर्के आक्षेपे वा ॥४८॥

किं कोपि पुद्गलः सोस्ति यो भुक्त्वा नोज्झितस्त्वया ।
न चैष मूर्तोमूर्तस्ते कथमप्युपयुज्यते ॥ ४९ ॥

टीका—किमस्ति । कोऽसौ, सः कोऽपि कश्चित्पुद्गलो यो नोज्झितो न त्यक्तस्त्वया । किं कृत्वा, भुक्त्वा अनादिकाले इंद्रियप्रणालिकाभिरुपभुज्य न च नैव एष पुद्गलो मूर्तो रूपादिमानमूर्ते रूपादिरहितस्य ते तव कथमपि केनापि प्रकारेणोपयुज्यते उपकरोति । गगनस्येव तवैतत्कृतोपकारागोचरत्वात् ॥ ४९ ॥

केवलं करणैरेनमलं ह्यनुभवन्भवान् ।
स्वभावमेवेष्टमिदं भुञ्जेहमिति मन्यते ॥ ५० ॥

टीका—केवलं परं मन्यते प्रतिपद्यते । कोऽसौ, भवान् । किं, इष्टमभिरु-चितमिदं पुरोवर्ति वस्त्वहं भुञ्जे अनुभवामीत्येतत । किं कुर्वन्, अनुभवन् भुञ्जानः । कं, स्वभावमेव आत्मपरिणाममेव वस्तुतस्तस्यैवात्मना भोग्यत्वात् । किं कृत्वा, अलं विषयीकृत्य । कं, एनं पुद्गलं । कैः, करणैः चक्षुरादीन्द्रियैः॥५०

तदिदानीममां भ्रान्तिमभ्याजोन्मिषतीं हृदि ।
स एष समया यत्र जाग्रति स्वहिते बुधाः ॥ ५१ ॥

टीका—तत्तस्मात्कारणात् । अभ्याज निवारय त्वं । कां, इमां प्रतीयमानां भ्रांतिं अभोग्ये पुद्गले भोग्यबुद्धिं । किं कुर्वतीं, उन्मिषतीमुदयोन्मुखीभवन्तीं । क, हृदि हृदये अन्तश्चेतसि । कदा, इदानीमद्य । यतो वर्तते । कोसौ, एषोयं । स समयः कालः । यत्र किं, यत्र यस्मिञ्जाग्रति सावधाना भवन्ति । के, बुधा दृष्टतत्त्वाः । क, स्वहिते ॥ ५१ ॥

अन्योऽहं पुद्गलश्चान्य इत्येकान्तेन चिन्तय ।
येनापास्य परद्रव्यग्रहवेशं स्वमाविशेः ॥ ५२ ॥

टीका—अहमस्मि । किंविशिष्टः, अन्यः पुद्गलाद्भिन्नः । पुद्गलश्चास्ति । किंविशिष्टः, अन्यो मत्तो भिन्न इत्येतदेकान्तेन सर्वथा चिंतय भावय त्वं । ये-नात्मपुद्गलयोः पृथक्त्वचिन्तनेन परद्रव्यग्रहवेशमनात्मद्रव्यनिर्बन्धोपयोगमपास्य त्यक्त्वा स्वमात्मद्रव्यं त्वमाविशेरुपयुञ्जीथाः ॥ ५२ ॥

क्वाऽपि चेत्पुद्गले सक्तो म्रियेथास्तद् ध्रुवं चरेः ।
तं कृमीभूय सुस्वादुचिर्भटासक्तभिक्षुवत् ॥ ५३ ॥

टीका—क्वापि क्वचिद्भोजनाद्युपयोगिनि पुद्गले सक्त आसक्तः सन् म्रियेथाः प्राणांस्त्यजेस्त्वं चेत्ततो ध्रुवं निश्चितं चरेर्भक्षयेर्भक्षयिष्यसि त्वं । कं, तं पुद्गलं । किं कृत्वा, कृमीभूय तत्रैव क्षुद्रजन्तुर्भूत्वा त्वमासाद्य । किंवत् ,

सुस्वाद्वित्यादि । सुस्वादुनि रसनेन्द्रियातिगृद्धिकारिणि चिर्भटे फलविशेषे आसक्तो भिक्षुः संन्यासोन्मुखः संयतो यथा ॥ ५३ ॥

किं चाङ्गस्योपकार्यन्न न चैतत्तत्प्रतीच्छति ।
तच्छिन्धि तृष्णां भिन्धि स्वं देहाद् रुन्धि दुरास्रवम् ॥५४॥

टीका—किं च अत्यधिकं चोच्यते त्वां प्रति । भवति । किं तद्, अन्नं भोज्यद्रव्यं । किंविशिष्टं, उपकारि उपकारकं । कस्य, अङ्गस्य शरीरस्य । मूर्तेन मूर्तस्यैवोपकार्यत्वदर्शनात् । न च नैव एतदङ्गं । तदन्नं प्रतीच्छति उपकारकत्वेन गृह्णाति । तत्तस्माच्छिन्धि नाशय त्वं । कां, तृष्णां अन्ने वाञ्छानुबन्धं । तथा भिन्धि भेदेन भावय त्वं । कं, स्वमात्मानं । कस्माद, देहात् । तथा रुन्धि प्रतिबधान त्वं । कं, दुरास्रवं पापकर्मास्रवणकारणम् ॥ ५४ ॥

इत्थं पथ्यप्रथासारैर्वितृष्णीकृत्य तं क्रमात् ।
त्याजयित्वाऽशनं सूरिः स्निग्धपानं विवर्धयेत् ॥ ५५ ॥

टीका—विवर्धयेत्परिपूर्णं दद्यात् सूरिः । किं तत्, स्निग्धपानं दुग्धादि । किं कृत्वा, त्याजयित्वा परिहार्य । किं तद्, अशनं कवलाहारं । कस्मात्, क्रमात् क्रमेण शनैः शनैः । किं कृत्वा, वितृष्णीकृत्य अन्ने निवृत्तेच्छं कृत्वा । कं, तं क्षपकं । पथ्यप्रथासारैर्हितप्रकाशधारासम्पातैः । कथं, इत्थमनेन प्रकारेण ॥५५॥

पानं षोढा घनं लेपि ससिक्थं सविपर्ययम् ।
प्रयोज्य हापयित्वा तत् खरपानं च पूरयेत् ॥ ५६ ॥

टीका—पूरयेद्विवर्धयेत्सूरिः । किं तत्, खरपानं प्रथमं शुद्धकाञ्जिकादिरूपं पश्चाच्च शुद्धपानीयरूपं । किं कृत्वा, प्रयोज्य परिचारकैर्दापयित्वा हापयित्वा च त्याजयित्वा क्षपकेण । किं, तत्पानं पेयद्रव्यं । कतिधा, षोढा षट्प्रकारं । तदेवाह घनमित्यादिना घनं बहुलं दध्यादि । सविपर्ययमिति वचनादच्छं तिंत्रिकादिफलरससौवीरकोष्णजलादि । लेपि यद्धस्ततलं लिम्पति तद्विपरीतमलेपि । ससिक्थं सिक्थसहितं पयादि तद्विपरीतम सक्थं मण्डकादि ॥ ५६ ॥

इत्थं च निर्यापकाचार्यः क्षपकं शिक्षयेदिति षड्भिः श्लोकैराह—

शिक्षयेच्चेति तं सेयमन्त्या सल्लेखनेर्यते ।
अतीचारपिशाचेभ्यो रक्षैनामतिदुर्लभाम् ॥ ५७ ॥

टीका—शिक्षयेच्च सूरिरनुशिष्यात्तं क्षपकं । इति वक्ष्यमाणेन प्रकारेण । अयं पूर्वोक्तश्च द्वौ चशब्दौ तुल्यकक्षतां द्योतयतः । खरपानं पूरयेच्च तमिति शिक्षयेच्चेति सम्बन्धः । तदेव शिक्षणमाह—सेयमित्यादि । हे आर्य गुणैर्गुणवद्भिश्चाश्रीयमाणा सा परमागमे प्रसिद्धा इयं वर्तते । काऽसौ, सल्लेखना । किंविशिष्टा, अन्त्या मारणान्तिकी । कस्य, ते तव । तद्रक्ष पालय त्वमेनां । केभ्यः, अतीचारपिशाचेभ्यः अतीचारा जीविताशंसादयः प्रागुक्तास्त एव पिशाचाश्छिद्रं प्राप्य प्रभविष्णुत्वात् । किंविशिष्टामेनाम्, अतिदुर्लभां आसंसारमप्राप्तपूर्वत्वादत्यन्तं प्राप्तुमशक्याम् ॥ ५७ ॥

क्रमेणातिचारपञ्चकपरिहारं शिक्षयन्नाह—

प्रतिपत्तौ सजन्नस्यां मा शंस स्थास्नु जीवितम् ।
भ्रान्त्या रम्यं बहिर्वस्तु हास्यः को नाऽऽयुराशिषा ॥५८॥

टीका—मा शंस मा वाञ्छस्व त्वं । किं तत्, जीवितं । किंविशिष्टं, स्थास्नु स्थिरतरं । किं कुर्वन्, सजन् आसक्तो भवन् । कस्यां, अस्यां दृश्यमानायां प्रतिपत्तौ आचार्यादिभिः क्रियमाणे परिचर्यादिविधौ महर्द्धिकैः पुरुषैश्च गौरवादरादिके । अत्रोपपत्तिमाह-यतो भवति । किं तद् , बहिर्वस्तु बाह्यविषयजातं । किंविशिष्टं, रम्यमात्मनः प्रीणनं । कया, भ्रान्त्या भ्रमेण । कश्च हास्यो हसनीयो लौकिकपरीक्षकाणां न भवति । कया, आयुराशिषा जीवितं मे भूयादित्याशंसया । स एष जीविताशंसाख्योऽतीचारः पुनरनूद्योपपत्तिविशेषेण त्याज्यतयोपदिष्टः । एवमुत्तरेऽपि ॥ ५८ ॥

परिहासभयादाशुमरणे मा मतिं कृथाः ।
दुःखं सोढा निहन्त्यंहो ब्रह्म हन्ति मुमूर्षकः ॥ ५९ ॥

टीका–मा कृथाः मा कुरु त्वं। कां, मतिं इच्छां क, आशुमरणे शीघ्रं जीवितच्छेदे । कस्मात्परीषहभयात् दुःसहक्षुधादिवेदनाभीत्या । यतो निहन्ति निरुद्धास्रवं क्षपयति, विपाकान्तत्वात्कर्मणां। कोसौ, दुःखं बाधां सोढा साधुत्वेन संक्लेशपरिणामलक्षणेन सहमानः। किं तद्, अंहः पुरार्जितपापं। तथा हंति हिनस्ति । कोसौ, मुमूर्षकः कुत्सितविधिना मर्तुमिच्छन् । किं तद्, ब्रह्म ज्ञानं मोक्षं वा आत्मघाततो दीर्घसंसारो भवतीत्यर्थः ॥ ५९ ॥

सहपांसुक्रीडितेन स्वं सख्या माऽनुरञ्जय ।
ईदृशैर्बहुशो भुक्तैर्मोहदुर्ललितैरलम् ॥ ६० ॥

टीका–माऽनुरञ्जय मा स्नेहय मा प्रीणय वा त्वं । कं, स्वमात्मानं । केन, सख्या मित्रण किंविशिष्टेन, सहपांसुक्रीडितेन बालावस्थायां सह मिलित्वा पांसुना रजसा क्रीडितं क्रीडनं येन स तथोक्तः । अतो व्यावर्तनार्थमाह-अलं पर्याप्तं । तव परलोकोद्यतस्य। कैः, ईदृशैरेवंविधैर्मित्रानुरागस्मरणप्रायैः परिणामैः । किंविशिष्टैः, बहुशोऽनेकशो भुक्तैरनुभूतपूर्वैः । पुनः किंविशिष्टैः, मोहदुर्ललितैर्मोहनीयकर्मविपाकजन्यदुरध्यवसायैः ॥ ६० ॥

मा समन्वाहर प्रीतिविशिष्टे कुत्रचित्स्मृतिम् ।
वासितोऽक्षसुखैरेव बम्भ्रमीति भवे भवी ॥ ६१ ॥

टीका–मा समन्वाहर माऽनुबन्धिनीं कुरु त्वमुत्पद्यमानामेव निवारयेत्यर्थः । कां, स्मृतिं चेतोवृत्तिं । क, कुत्रचित् चक्षुरादीनामन्यतमेनानुभूयमाने विषये पूर्वं प्रवृत्ते प्रीतिविशिष्टे प्रमोदातिशये, इत्थं मया रम्यकामिन्यादिकमीक्षितमित्थमालिंगितमित्यादिरूपेण मा स्मृतिसमन्वाहारं कुरुष्वेत्यर्थः । यतो बम्भ्रमीति कुटिलं पर्यटति कष्टं परिवर्तते । कोऽसौ, भवी जीवः । क, भवे आजवञ्जवभावे । किंविशिष्टः सन्, वासितो दृढाहितसंस्कारः । कैः, अक्षसुखैरिन्द्रियसुखैरेव नात्मज्ञानसंस्कारैः ॥ ६१ ॥

मा कांक्षीर्भाविभोगादीन् रोगादीनिव दुःखदान्।
वृणीते कालकूटं हि कः प्रसाद्येष्टदेवताम् ॥ ६२ ॥

टीका—मा कांक्षीस्तपोमाहात्म्यादिना ममैते भूयासुरिति माऽभिलष त्वं। कान्, भाविभोगादीन् भाविनो भोगानिष्टविषयान्। आदिशब्देन चाज्ञैश्वर्यादीन्। किंविशिष्टान्, दुःखदान् दुरन्तदुःखदायकान्। कानिव, रोगादीनिव ज्वरादिव्याधीष्टवियोगप्रभृतीन् यथा। हि यस्मात् कः कश्चित् वृणीते प्रार्थयते। किं तत्, कालकूटं सद्यःप्राणहरं विषं। किं कृत्वा, प्रसाद्य वरदानोन्मुखीं कृत्वा। कां, इष्टदेवतामभिमतार्थप्रसादनसमर्थां देवीं देवं वा ॥ ६२ ॥

क्षपकस्य चतुर्विधाहारसन्न्यासविधिं श्लोकद्वयेनाह—

इति व्रतशिरोरत्नं कृतसंस्कारमुद्वहन्।
खरपानक्रमत्यागात् प्रायेऽयमुपवेक्ष्यति ॥ ६३ ॥
एवं निवेद्य संघाय सूरिणा निपुणेक्षिणा।
सोऽनुज्ञातोऽखिलाहारं यावज्जीवं त्यजेत् त्रिधा ॥ ६४ ॥ युग्मं।

टीका—त्यजेत्। कोसौ, क्षपकः। कं, अखिलाहारं चतुर्विधमपि भोजनं। कथं, त्रिधा मनोवाक्कायैः। कियत्कालं, यावज्जीवं। किं कुर्वन्, उद्वहन् उत्कृष्टं धारयन्। किं तद्, व्रतशिरोरत्नं सल्लेखनां। तस्या एव सर्वव्रतानां साफल्यसंपादकत्वेनोपरि भ्राजमानत्वाच्चूडामणिरिवाभरणानां। किंविशिष्टं, कृतसंस्कारं आहितातिशयं। कथं, इत्यनेन प्रतिपत्तौ सजन्नस्यामित्यादिग्रन्थोक्तप्रकारेण। किंविशिष्टः सन्नखिलाहारं स त्यजेत्, अनुज्ञातोऽनुमतः। केन, सूरिणा निर्यापकाचार्येण। किंविशिष्टेन, निपुणेक्षिणा निपुणं सूक्ष्मं व्याधिदेशादितत्त्वमीक्षते पश्यत्यभीक्ष्णमिति निपुणेक्षी तेन, व्याधिदेशकालसत्त्वसात्म्यबलपरीषहक्षमत्वसंवेगवैराग्यादीनां सूक्ष्मेक्षिकया विचारकेणेत्यर्थः। किं कृत्वा, निवेद्य ज्ञापयित्वा। कस्मै, संघाय चातुर्वर्ण्यश्रमणगणाय। कथं, एवं। अयं क्षपक उपवेक्ष्यति निश्चलं स्थास्यति दृढप्रतिज्ञो भविष्यतीत्यर्थः। क, प्राये

चतुर्विधाहारसंन्यासे । कस्मात्, खरपानक्रमत्यागात् खरपानस्य शुद्धोदकमात्रोपयोगस्य क्रमेण शनैः शनैस्त्यागः प्रत्याख्यानं तस्मात् । अत्रायं विधिरार्याद्वयेन—"त्यक्ष्यति सर्वाहारं । यावज्जीवं निरम्बरस्त्रिविधम् । निर्यापकसूरिपरः संघाय निवेदयेदेवम् ॥ १ ॥ क्षपयति यः क्षपकोऽसौ पिण्डं तस्येति संयमधनस्य । दर्शयितव्यं नीत्वा संघावसथेषु सर्वेषु" ॥ ६३।६४ ॥

एवमतिशयेन परिषहबाधाक्षमं प्रति चतुर्विधाहारप्रत्याख्यानमुपदिश्येदानीमतथाभूतस्य क्षपकस्य पानीयमात्रविकल्पनपूर्वकं त्रिविधप्रत्याख्यानमुपदिशंश्चतुर्विधप्रत्याख्यानावसरनिरूपणार्थमाह——

व्याध्याद्यपेक्षयाम्भो वा समाध्यर्थं विकल्पयेत् ।
भृशं शक्तिक्षये जह्यात्तदप्यासन्नमृत्युकः ॥ ६५ ॥

टीका—वा अथवा विकल्पयेत् गुरुनियोगेन पेयतया प्रतिजानीते क्षपकः। किं तद्, अम्भः पानीयं। किमर्थं, समाध्यर्थं । कया, व्याध्याद्यपेक्षया यदि पैत्तिको व्याधिर्वा ग्रीष्मादिः कालो वा मरुस्थलादिर्देशो वा पैत्तिकी प्रकृतिर्वा अन्यदप्येवंविधं तृष्णापरिषहोद्रेकासहनकारणं वा भवेत् तदा गुर्वनुज्ञया पानीयमुपयोक्ष्येहमिति प्रत्याख्यानं प्रतिपद्येतेत्यर्थः । भृशमत्यर्थं शक्तिक्षये बलनाशे पुनरासन्नमृत्युकः प्रत्यासन्नमरणः क्षपकस्तदप्यम्भोपि जह्यात् प्रत्याख्यायात् ॥ ६५ ॥

तत्कालोचितं क्षपकोपकारि संघस्यावश्यकरणीयमाह——

तदाखिलो वर्णिमुखग्राहितक्षमणो गणः ।
तस्याविघ्नसमाधानसिद्ध्यै तद्यात्तनूत्सृतिम् ॥ ६६ ॥

टीका——तदा तस्मिन्काले तद्यात्कुर्यात् । कोऽसौ, अखिलः सर्वो गणः संघः । कां, तनूत्सृतिं कायोत्सर्गं । कस्यै, अविघ्नसमाधानसिद्ध्यै । कस्य, तस्य प्रत्याख्यातचतुर्विधभक्तस्य क्षपकस्य, क्षपकस्योपसर्गा मा भूवन् सिद्ध्यतु चाराधनेत्येवमर्थं । किंविशिष्टः सन्, वर्णिमुखग्राहितक्षमणः वर्णिनो

ब्रह्मचारिणो मुखेन ग्राहितो लापितो यथाकथञ्चित्कृतानपराधान् मम यूयं क्षमध्वमहं च भवत्कृतांस्तान् क्षम्ये इति क्षमणं यः स तथोक्तः। एतच्च एवं निवेद्य संघायेति प्रागुक्तमेव विशेष्य पुनरुक्तम ॥ ६६ ॥

एवमाराधनापताकाग्रहणोद्यतस्य क्षपकस्य निर्यापकाः किं कुर्युरित्याह—

ततो निर्यापकः कर्णे जपं प्रायोपवेशिनः ।
दद्युः संस रभयदं प्रीणयन्तो वचोमृतैः ॥ ६७ ॥

टीका—ततो यथोक्तकरणीयकरणानन्तरं। दद्युः सम्पादयेयुः। के, निर्यापकाः समाधिविधायिनो मुनयः। कं, जपं। किंविशिष्टं, संसारभयदं संसारभयं संवेगमुपलक्षणान्निर्वेदं च ददानं। क्व, कर्णे श्रुतिमार्गे। कस्य, प्रायोपवेशिनः संन्यासिनः। किं कुर्वन्तः, प्रीणयन्तः सन्तर्पयन्तः। कैः, वचोऽमृतैः पीयूषसमैर्वाक्यैः ॥ ६७ ॥

अथातो निर्यापकाचार्यकार्यां क्षपकस्य महतीमनुशिष्टिमुत्तरत्र प्रबन्धेनोपदिशति—

मिथ्यात्वं वम सम्यक्त्वं भजोर्जय जिनादिषु ।
भक्तिं भावनमस्कारे रमस्व ज्ञानमाविश ॥ ६८ ॥

टीका—भो आराधकराज वम निःशेषय त्वं। किं तत्, मिथ्यात्वं विपरीताभिनिवेशं। तथा भज भावय त्वं। किं तत्, सम्यक्त्वं तत्त्वार्थश्रद्धानं। तथा ऊर्जय बलवतीं जीवन्तीं वा कुरु त्वं। कां, भक्तिं। केषु, जिनादिषु अर्हदादिषु परमेष्ठिषु तच्चैत्येषु व्यवहारनिश्चयरत्नत्रये च। तथा रमस्व रतिं कुरु त्वं भावनमस्कारे अर्हदादिगुणानां सानुरागानुध्याने तथा आविश उपयुंक्ष्व त्वं। किं तत्, ज्ञानं बाह्यमाध्यात्मिकं च तत्त्वबोधम ॥ ६८ ॥

महाव्रतानि रक्षोच्चैः कषायान् जय यन्त्रय ।
अक्षाणि पश्य चात्मानमात्मनात्मनि मुक्तये ॥ ६९ ॥

टीका—तथा रक्ष पालय त्वं। कानि, महाव्रतानि। तथा जय निगृहाण

त्वं। कान्, कषायान् क्रोधादीन्। कथं, उच्चैरत्यर्थं, तज्जये सुतरां यत्नं कुरुष्वेत्यर्थः । तथा यन्त्रय निजनिजविषयेषु प्रवर्तमानानि त्वं निरुन्धि। कानि, अक्षाणि स्पर्शनादीनि । तथा पश्य अवलोकय त्वं । कं, आत्मानं । केन, आत्मना स्वयं । क, आत्मनि स्वस्मिन्। कस्यै, मुक्तये मोक्षाय न संसारसुखाय ॥ ६९ ॥

मिथ्यात्वस्यापायहेतुत्वं श्लोकद्वयेन स्पष्टयति--

अधोमध्योर्ध्वलोकेषु नाभून्नास्ति न भावि वा ।
तद् दुःखं यन्न दीयेत मिथ्यात्वेन महारिणा ॥ ७० ॥

टीका—तद् दुःखमधोलोके मेरोरधः सप्तसु भूमिषु, मध्यलोके जम्बूद्वीपादिस्वयम्भूरमणसमुद्रान्ते तिर्यग्लोके, ऊर्ध्वलोके मेरुचूलिकान्ततःप्रभृति तनुवातवलयपर्यन्ते । नाभूत् न भूतं । नास्ति न भवति । न भावि वा न वा भविष्यति । यन्न दीयते न सम्पाद्येत जीवस्य । केन, मिथ्यात्वेन । किंविशिष्टेन, महारिणा परमशत्रुणा, तस्मिन् सत्येव बाह्याभ्यन्तरशत्रूणामपकारकत्वोपपत्तेः ॥ ७० ॥

सङ्घश्रीर्भावयन्भूयो मिथ्यात्वं वन्दकाहितम् ।
धनदत्तसभायां द्राक्स्फुटिताक्षोऽभ्रमद्भवम् ॥ ७१ ॥

टीका—अभ्रमत् पर्यटति स्म । कोऽसौ, सङ्घश्रीर्धनदत्तनृपतिमन्त्री । कं, भवं संसारं । दीर्घसंसारोऽभूदित्यर्थः । कथम्भूतो भूत्वा, द्राक् स्फुटिताक्षः झटिति स्फुटितचक्षुः । कस्यां, धनदत्तसभायां धनदत्तस्य स्वस्वामिनः परिषदि । किं कुर्वन्, भावयन् अध्यात्मभ्यस्यन्। किं तत्, मिथ्यात्वं। किंविशिष्टं, भूयो वन्दकेन पुनरारोपितं। इयमन्याश्च सर्वाः कथाः कथाकोशादिशास्त्रेषु द्रष्टव्या, ग्रंथगौरवभयादिह नोक्ताः ॥ ७१ ॥

सम्यक्त्वस्योपकारकत्वं श्लोकद्वयेनाह—

अधोमध्योर्ध्वलोकेषु नाभून्नास्ति न भावि वा ।
तत्सुखं यन्न दीयेत सम्यक्त्वेन सुबन्धुना ॥ ७२ ॥

टीका—अस्यापि पूर्ववद्व्याख्या। सुबन्धुत्वं पुनः सम्यक्त्वस्य सर्वत्र सर्वदा सर्वेषामुपकारकत्वात्समस्तविनिपातप्रतिबन्धकत्वाच्च निश्चेयम् ॥ ७२ ॥

प्रन्हासितकुदृग्बद्धश्वभ्रायुःस्थितिरेकया ।
दृग्विशुद्ध्याऽपि भविता श्रेणिकः किल तीर्थकृत् ॥ ७३ ॥

टीका—किल एवं ह्यागमे श्रूयते—श्रेणिको नाम मगधमहामंडलेश्वरो भविता भविष्यति। किंविशिष्टः, तीर्थकृत् धर्मतीर्थंकरः। कया, दृग्विशुद्ध्या। किंविशिष्टया, एकया असहायया विनयसम्पन्नतादितीर्थकरत्वकारणान्तररहितया । अपिर्विस्मये । किंविशिष्टः सन्, प्रेत्यादि श्वभ्रे सप्तमनरकभूमावायुषो भवधारणकारणकर्मणः स्थितिः कालावधारणेन बन्धः श्वभ्रायुःस्थितिः कुदृशा तीव्रमिथ्यात्वपरिणामेन बद्धा आत्मसात्कृता श्वभ्रायुःस्थितिः कुदृग्बद्धश्वभ्रायुःस्थितिः प्रन्हासिता त्रयस्त्रिंशत्सागरोपमपरिमाणादपकृष्य रत्नप्रभायां चतुरशीतिवर्षसहस्रपरिमाणा कृता कुदृग्बद्धा श्वभ्रायुःस्थितिर्यस्य एकयाऽपि दृग्विशुद्ध्या स तथोक्तः ॥ ७३ ॥

अर्हद्भक्तेर्माहात्म्यं द्वाभ्यामाह—

एकैवास्तु जिने भक्तिः किमन्यैः स्वेष्टसाधनैः ।
या दोग्धि कामानुच्छिद्य सद्योऽपायानशेषतः ॥ ७४ ॥

टीका-भोः सुविहित साधो । अस्तु भवतु । काऽसौ, भक्तिर्भावविशुद्ध आन्तरोऽनुरागः । क्व, जिने भगवदर्हद्देवे । किंविशिष्टा, एकैव असहायैव। किं कार्यं। कैः, स्वेष्टसाधनैः स्वाभिमतार्थसिद्ध्युपायैः। किं विशिष्टैः अन्यैर्जिनभक्तिव्यतिरिक्तैः । सर्वपुरुषार्थसाधनानां तया विना तदाभासत्वनिश्चयात् । या किं, या दोग्धि प्रपूरयति।कान्, कामान् मनोरथान्। किं कृत्वा, उच्छिद्य निरस्य। कान, अपायान्, अभ्युदयनिःश्रेयसभ्रंशिनोऽपायान्। कथं, अशेषतः

सर्वतः सर्वान्वा । कथ. म्भूतः भ्वा।विर्भावनानन्तरमेव ॥ ७४ ॥

वासुपूज्याय नम इत्युक्त्वा तत्संसदं गतः ।
द्विदेवारब्धविघ्नोऽभूत पद्मः शक्रार्चितो गणी ॥ ७५ ॥

टीका—अभूत्सम्पन्नः। कोऽसौ, पद्मः पद्मरथो नाम मिथिलाधिपतिः । किंविशिष्टो. गणी गणधरदेवः। किंविशिष्टः सन, शक्रार्चितः इन्द्रकृतप्रातिहार्यः। पुनः किंविशिष्टः सन्, द्विदेवारब्धविघ्नः द्वाभ्यां देवाभ्यां धन्वंतरिविश्वानुलोमचराभ्यामारब्धाः कर्तुमुपक्रान्ता विघ्नाः काककैंकारककृष्णसर्पमार्गखण्डनप्रभृतयोऽपशकुनाः समवसरणागमनान्तरायाः यस्य स तथोक्तः । कथम्भूतो भूत्वा, गतः प्राप्तः । कां, तत्ससदं वासुपूज्यसमवसरणं । किं कृत्वा, उक्त्वा उच्चार्य (किं, वासुपूज्याय नम इति) ॥ ७५ ॥

एकोऽप्यर्हन्नमस्कारश्चेद्विशेन्मरणे मनः ।
सम्पाद्याभ्युदयं मुक्तिश्रियमुत्कयति द्रुतम् ॥ ७६ ॥

टीका—चेद्यदि । विशेत् भावरूपतया व्याप्नुयात् । कोऽसौ, एकोऽपि केवलोऽपि अर्हतो भगतो नमस्कारः प्रणामः । किं तत्. मनश्चित्तं । क्व, मरणे प्राणत्यागलक्षणे । तदा द्रुतं शीघ्रमुत्कयत्युत्कंठयति । कां, मुक्तिश्रियं मोक्षलक्ष्मीं । अनन्तभवेषु द्वित्रिभवेषु वा परमपदं सम्पादयतीत्यर्थः । किं कृत्वा, सम्पाद्य सम्पूर्णं प्रापय्य । कं, अभ्युदयं महर्द्धिम् ॥ ७६ ॥

स णमो अरहंताणमित्युच्चारणतत्परः ।
गोपः सुदर्शनीभूय सुभगाह्वः शिवं गतः ॥ ७७ ॥

टीका—गतः । कोसौ, आगमे प्रसिद्धः सुभगाव्हः सुभगो नाम गोपो गोपालः । किं तत्, शिवं परममुक्तिं । किं कृत्वा, सुदर्शनीभूय वृषभदासश्रेष्ठिपुत्रः सुदर्शनाख्यः सुरूपः सुसम्यक्त्वश्च भूत्वा । किंविशिष्टः सन, णमो अरहंताणमित्येतस्यार्हन्नमस्कारस्योच्चारणे संशब्दे तत्परस्तन्निष्ठस्तदेकाग्रमना इत्यर्थः ॥ ७७ ॥

ज्ञानोपयोगमाहात्म्यं त्रिभिः श्लोकैराह—

स्वाध्यायादि यथाशक्ति भक्तिपीतमनाश्चरन् ।
तत्कालिकाद्भुतफलादुदर्के तर्कमस्यति ॥ ७८ ॥

टीका—अस्यति क्षिपति निवारयतीत्यर्थः । कोऽसौ, पुरुषः । कं, तर्कं विकल्पं संशयरूपं विमर्शमित्यर्थः । कस्मिन्विषये, उदर्के उत्तरफले स्वाध्यायाद्यनुष्ठानसाध्यमागमे यदद्भुतं फलमुक्तं तन्मे भविष्यति न वेति सन्देहं । कस्मात्, तत्तत्कालिकाद्भुतफलात् क्रियमाणस्वाध्यायाद्याचरणसमयभवासम्भाव्येष्टसाध्याद् दृष्टेनादृष्टस्यासम्भाव्यस्यापि निश्चेतुं शक्यत्वात् । किं कुर्वन्, चरन् अनुतिष्ठन् । किं तत्, स्वाध्यायादि स्वाध्यायं वन्दनां प्रतिक्रमणादिकमपि मुनीनां नित्यमाचरणं । कथं, यथाशक्ति अनिगूहितबलवीर्यं यथा भवति । किंविशिष्टः सन् भक्तिपीतमनाः भक्त्या पीतं स्वान्तं पीतमनुरंजितं वा मनश्चित्तं यस्य स तथोक्तः ॥ ७८ ॥

शूले प्रोतो महामन्त्रं धनदत्तार्पितं स्मरन् ।
दृढशूर्पो मृतोऽभ्येत्य सौधर्मात्तमुपाकरोत् ॥ ७९ ॥

टीका—अतिनिर्भयमुपाकरोत् स्वस्वामिनृपतिकार्यमाणोपसर्गनिराकरणपूर्वकसत्कारकरणेनोपाकृतवान् । कोऽसौ, दृढशूर्पो नाम चोरः । कं, तं धनदत्तश्रेष्ठिनं । किं कृत्वा, अभ्येत्य आगत्य । कस्मात्, सौधर्मात् सौधर्मकल्पविमानात् । सौधर्मे महर्द्धिकदेवत्वं प्राप्त इत्यर्थादापन्नमत्र बोध्यं । कथम्भूतः सन्, मृतः । किं कुर्वन्, स्मरन् । चिन्तयन् । कं, महामन्त्रं पञ्चनमस्कारं तदनुचिन्तनस्योत्कृष्टस्वाध्यायत्वात् । किंविशिष्टं, धनदत्तार्पितं धनदत्ताख्येन श्रेष्ठिना ढौकितं । किंविशिष्टः स्थितः, शूले प्रोतः शूलिकायामारोपितः ॥ ७९ ॥

खण्डश्लोकैस्त्रिभिः कुर्वन् स्वाध्यायादि स्वयंकृतैः ।
मुनिनिन्दाप्तमौर्ख्योऽपि यमः सप्तर्द्धिभूरभूत् ॥ ८० ॥

टीका—अभूत् । कोऽसौ, यमः यमो नाम राजा, राज्यं त्यक्त्वा प्रव्रजितः ।

किंविशिष्टः, सप्तर्द्धिभूः । बुद्धि तवो वि य रिद्धी विउउणरिद्धी तहेव ओसहिया रसबलअक्खीणा वि य रिद्धीओ सत्त पण्णत्ता ॥ इत्यासां सप्तानामृद्धीनां भूः स्थानं सप्तर्धिप्राप्तोऽभूदित्यर्थः । किंविशिष्टोऽपि, मुनिनिन्दाप्तमौग्ध्योऽपि मुनिनिन्दया प्राप्तमूढभावोऽपि । किं कुर्वन् स तथा अभूत्, कुर्वन् । किं तत्, स्वाध्यायादि । कैः, खण्डश्लोकैः । किंविशिष्टैः, स्वयंकृतैः स्वयमात्मना निर्मितैः । कतिभिः, त्रिभिः । तद्यथा-" कंडसि पुणुणं सेवसि रेगंदहा । जवं पत्थेसि खादिदुं ॥१॥ अण्णत्थ किं फलोवहा तुह्मी इत्थ बुद्धिया छिंदे । अंके च्छेदइ कोणिय ॥२॥ अह्मादो णंदिभयं दिहादोदिसराभयं तुह्म " ॥८०॥

अहिंसाहिंसयोर्माहात्म्यं द्वाभ्यामाह——

अहिंसाप्रत्यपि दृढं भजन्नो जायते रुजि ।
यस्त्वध्यहिंसासर्वस्वे स सर्वाः क्षिपते रुजः ॥ ८१ ॥

टीका--ओजायते ओजस्वीवाचरति दुःखेन नाभिभूयत इत्यर्थः । कोऽसौ, पुरुषः । कस्यां, रुजि उपसर्गादिपीडायामुपस्थितायां । किं कुर्वन्, दृढं भजन् गाढं सेवमानः । किं तत्, अहिंसाप्रत्यपि अहिंसायाः स्तोकमहिंसाप्रति । स्तोके प्रतिनेत्यनेनाव्ययीभावः ॥ स्तोकामप्यहिंसामित्यर्थः । यस्तु भवति । कथं, अधि अधीश्वरः । क्व, अहिंसायाः सर्वस्वे अहिंसायाः सर्वस्वं साकल्यमहिंसासर्वस्वं तस्मिन् । ईश्वरेऽधीत्यनेन सप्तमी । सकलाऽहिंसाया अधीश्वरो भवतीत्यर्थः । स क्षिपते निराकरोति । काः, सर्वाः समस्ताः रुजो दुःखानि ॥ ८१ ॥

यमपालो ह्रदेऽहिंसन्नेकाहं पूजितोऽप्सुरैः ।
धर्मस्तत्रैव मेण्ढ्घ्नः शिशुमारैस्तु भक्षितः ॥ ८२ ॥

टीका—पूजितः । कोऽसौ, यमपालः वाराणस्यां मातङ्गः । कैः, अप्सुरैः जलदेवताभिः । क्व,ह्रदे शिशुमारह्रदे । किं कुर्वन्, एकाहमेकदिनमहिंसन्

चतुर्दशीदिने हिंसामकुर्वन्नित्यर्थः । धर्मस्तु श्रेष्ठिपुत्रो भक्षितः । कैः, शिशुमारैः । क्व, तत्रैव तस्मिन्नेव ह्रदे । किंविशिष्टः सन् ? मेण्डूघ्नः कृतराजमेण्डूकवधः ॥ ८२ ॥

असत्यकृतापायं द्वाभ्यामाह—

मा गां कामदुघां मिथ्यावादव्याघ्रोन्मुखीं कृथाः ।
अल्पोऽपि हि मृषावादः श्वभ्रदुःखाय कल्पते ॥ ८३ ॥

टीका—हे क्षपक मा कृथाः मा कुरु त्वं । कां, गां वाचं । पक्षे अनड्वाहीं । किंविशिष्टां, कामदुघां कामं प्रार्थ्यमानमर्थं दोग्धि क्षरत्याविर्भावयतीत्येवम्भूतां सत्यवाचं कामधेनुं चेत्यर्थः । किंविशिष्टां मा कृथाः, मिथ्यावादव्याघ्रोन्मुखीं मिथ्यावादोऽसत्यजल्पः स एव व्याघ्रः कामधेनोरिव सत्यवाचः संहरणशीलत्वात्, मिथ्यावादव्याघ्रस्य उन्मुखीं संमुखीं मिथ्यावादं कर्तुमुद्युक्तां व्याघ्रं च प्रतिवर्तमानां । हि यस्मादल्पोऽपि स्तोकोऽपि किं पुनर्भूयान् मृषावादो वितथव्याहारः श्वभ्रदुःखाय कल्पते सम्पद्यते, नरकदुःखं सम्पादयतीत्यर्थः ॥ ८३ ॥

अजैर्यष्टव्यमित्यत्र धान्यैस्त्रैवार्षिकैरिति ।
व्याख्यां छागैरिति परावर्त्यागान्नरकं वसुः ॥ ८४ ॥

टीका—अगात् गतः । कोऽसौ, वसुर्नाम राजा । किं तत्, नरकं । किं कृत्वा, परावर्त्य अन्यथा कृत्वा । कां, धान्यैस्त्रैवार्षिकैरिति व्याख्यां । कथं परावर्त्य, छागैरिति । क्व, अजैर्यष्टव्यमित्यत्र परमागमे वाक्ये । अयमर्थः । न जायंत इत्यजा वर्षत्रयवृत्तयो व्रीहयस्तैर्यष्टव्यं शान्तिकपौष्टिकार्था क्रिया कार्येति क्षीरकदंबाचार्यैः कृतं व्याख्यानं परावर्त्य अजैरजात्मकैर्यष्टव्यं हव्यकव्यार्थो विधिर्विधातव्य इत्यन्यथा कृत्वा पर्वतनारदविसंवादे वसुराजः श्वभ्रमगमदित्यर्थः ॥ अजैर्होतव्यमिति क्वचित्पाठः ॥ ८४ ॥

स्तेयानुभावं द्वाभ्यामाह—

आस्तां स्तेयमभिध्याऽपि विध्याप्याऽग्निरिव त्वया।
हरन् परस्वं तदसून् जिहीर्षन् स्वं हिनस्ति हि ॥ ८५ ॥

टीका—भोः समाधिमरणार्थिन्। आस्तां तिष्ठतु। किं तत्कथनेनेत्यर्थः। किं तत्, स्तेयं परधनापहरणं। विध्याप्या शमयितव्या त्वया। काऽसौ, अभिध्याऽपि परधनेच्छाऽपि। क इव, अग्निरिव वन्हिर्यथा तापहेतुत्वात्। हि यस्मात् हिनस्ति हन्ति। कोऽसौ, पुरुषः। कं, स्वमात्मानं। किं चिकीर्षन्, जिहीर्षन् हर्तुमिच्छन्। कान्, तदसून् परप्राणान। किं कुर्वन्, हरन् अदत्तं गृण्हन्। किं तत, परस्वं परद्रव्यं। अयमत्राभिप्रायः—परधनं मुष्णतः परप्राणोपघातेच्छा अवश्यं भाविनी, परजिघांसा चात्मनो हिंसा परमार्थतस्तस्या एव हिंसात्वात्। भावहिंसायामेव हि सत्यां द्रव्यहिंसा दुरन्तसंसारदुःखलक्षणं स्वफलं प्रयच्छतीति ॥ ८५ ॥

रात्रौ मुषित्वा कौशाम्बीं दिवा पञ्चतपश्चरन्।
शिक्यस्थस्तापसोऽधोगात् तलारकृतदुर्मृतिः ॥८६॥

टीका—अधोऽगान्नरकं गतः। कोऽसौ, तापसो भौतिकः। किंविशिष्टः सन्, तलारकृतदुर्मृतिः तलवरेण प्रवर्तितप्रकृष्टरौद्रध्यानाविष्टमरणः। किं कुर्वन्, शिक्यस्थः परभूमिं न स्पृशामीति लम्बमाने शिक्ये स्थितः। पञ्चतपश्चरन पञ्चाग्निसाधनं कुर्वन्। क्व, दिवा दिने। किं कृत्वा, मुषित्वा मुषितधनां कृत्वा। कां, कौशाम्बीं कौशाम्बीसञ्ज्ञनगरीं तन्नगरीवास्तव्यलोकं। क्व, रात्रौ ॥ ८६ ॥

ब्रह्मचर्यदार्ढ्यविधापनार्थमाह—

पूर्वेऽपि बहवो यत्र स्खलित्वा नोद्गताः पुनः।
तत्परं ब्रह्म चरितुं ब्रह्मचर्यं परं चरेत् ॥ ८७ ॥

टीका–बहवः प्रभूताः पूर्वे रुद्रादयः किं पुनरद्यतना मुनय इत्यपिश-

इदार्थः । यत्र यस्मिन् ब्रह्मचर्याख्ये व्रते, स्खलित्वा अतिचारं प्राप्य, न पुनरुद्गता न तत्रात्मानमुपस्थापितवन्तोऽनाचारं चरितवन्त इत्यर्थः । तद्ब्रह्मचर्यं चतुर्थव्रतं परमुत्कृष्टं मनागप्यतीचाररहितं कृत्वा चर धारय त्वं । किं कर्तुं, चरितुमनुभवितुं । किं तत्, परमुत्कृष्टं निर्विकल्पं प्रत्यग्ज्योतिराख्यं, ब्रह्म ज्ञानं शुद्धस्वात्मानं स्वात्मना संवेदयितुमित्यर्थः ॥ ८७ ॥

नैर्ग्रन्थ्यव्रतं द्रढयितुमाह—

मिथ्येष्टस्य स्मरन् श्मश्रुनवनीतस्य दुर्मृतेः ।
मोपेक्षिष्ठाः क्वचिद् ग्रन्थे मनो मूर्छन्मनागपि ॥ ८८ ॥

टीका—भोः सुविहितसाधो मा उपेक्षिष्ठाः माऽवधीरय त्वं । किं तत्, मनः । किं कुर्वत्, मूर्छत् मुह्यत् ममेदमिति संकल्पं गच्छत् । क, क्वचित् क्वापि ग्रन्थे परिग्रहे । कथं, मनागपि सर्वस्मिन् संगे चित्तं व्यासजद्भ्याजत्व मित्यर्थः । किं कुर्वन्, स्मरन् । कस्य, श्मश्रुनवनीतस्य कस्यचिच्छ्रेष्ठिपुत्रस्य । किंविशिष्टस्य, मिथ्येष्टस्य वितथमनोरथस्य ; पुनः किंविशिष्टस्य, दुर्मृतेः रौद्रध्यानमृतस्य ॥ ८८ ॥

निश्चयनयेन नैर्ग्रन्थ्यप्रतिपत्त्यर्थमाह—

बाह्यो ग्रन्थोऽङ्गमक्षाणामान्तरो विषयैषिता ।
निर्मोहस्तत्र निर्ग्रन्थः पान्थः शिवपुरेऽर्थतः ॥ ८९ ॥

टीका—भवति । कोसौ, बाह्यो बहिरङ्गः, ग्रन्थः परिग्रहः । किं, अङ्गं शरीरं । तथा आंतरोऽन्तरङ्गः सङ्गो भवति । किं, अक्षाणां स्पर्शनादीनां विषयैषिता स्पर्शादिविषयेष्वभिलाषः । तत्र द्वयोरपि ग्रन्थयोर्निर्मोहो निर्मूर्छः साधुरर्थतः परमार्थेन निर्ग्रन्थो निष्परिग्रहो भवति । तथा शिवपुरे निर्वाणनगरे पान्थो नित्यं प्रस्थायी स्यात् निर्ग्रन्थस्यैव मोक्षमार्गेऽविच्छिन्नं प्रस्थातुं समर्थत्वात् ॥ ८९ ॥

कषायेन्द्रियकृतापायाननुस्मारयन्नाह—

कषायेन्द्रियतन्त्राणां तत्तादृग्दुःखभागिताम् ।
परामृशन्मा स्म भवः शंसितव्रत तद्वशः ॥ ९० ॥

टीका—भोः शंसितानि महद्भिरपि स्तुतानि व्रतानि यस्य स शंसितव्रत मा स्म भवः मा भूस्त्वं । किंविशिष्टः, तद्वशः कषायेन्द्रियपरतन्त्रः । किं कुर्वन्, परामृशन चिन्तयन् । कां, तत्तादृग्दुःखभागितां सा षष्ठाध्याये निर्दिष्टा तादृगनन्यसाधारणी दुःखभागिता क्लेशानुभूतिस्तां । केषां, कषायेन्द्रियेषु आयत्तानां तदभिभूतानामित्यर्थः ॥ ९० ॥

एवं व्यवहाराराधनानिष्ठतां विध्याप्य निश्चयाराधनामुपदिशति—

श्रुतस्कन्धस्य वाक्यं वा पदं वाऽक्षरमेव वा ।
यत्किञ्चिद्रोचते तत्रालम्ब्य चित्तलयं नय ॥ ९१ ॥

टीका—अहो व्यवहाराराधनापरिणत आराधकराज । यत्किंचिद्यत्किमपि रोचते तुभ्यं रुचिमुत्पादयति च । किं तत्, वाक्यं वा बाह्यमाध्यात्मिकं वा णमो अरहंताणमित्यादिकं, पदं वा अर्हमित्यादिकमक्षरमेव वा अ सि आ उ सा इत्यादीनामेकतमं । कस्य सम्बन्धि, श्रुतस्कन्धस्य श्रुतस्याङ्गप्रविष्टस्य आचाराङ्गादिद्वादशविकल्पस्य अङ्गबाह्यस्य च सामायिकादिभेदस्य प्रकीर्णकाख्यस्य स्कन्धः सङ्घातस्तस्य मध्ये यत्किंचिद्वाक्यादिकमिदानीं क्षीणशक्तेस्तवानुरागं जनयति तत्र इष्टे वाक्यादीनामन्यतमे आलम्ब्य आसज्य चित्तमन्तःकरणं लयं श्लेषं तन्मयीभावं नय प्रापय त्वमित्यर्थः । त्रयोपि वाशब्दा वाक्यादीनां तुल्यकक्षतां सूचयन्ति । रुचिरत्र भवतः प्रमाणं श्रुतस्कन्धवाक्यादीनां त्रयाणामपि भक्त्या भाव्यमानानां परमार्थाराधनासाधनसामर्थ्यनिर्णयात् । अक्षरमेवेत्यत्र एवशब्दश्च स्वयोग्यव्यवस्थापकः ॥ ९१ ॥

शुद्धं श्रुतेन स्वात्मानं गृहीत्वाऽर्य स्वसंविदा ।
भावयंस्तल्लयापास्तचिन्तो मृत्वैहि निर्वृतिम् ॥ ९२ ॥

टीका—हे आर्य आराधनातत्पर । एहि गच्छ त्वं । कां, निर्वृतिं मुक्तिं ।

किं कृत्वा, मृत्वा प्राणान् विसृज्य। कथम्भूतो भूत्वा, तल्लयापास्तचिन्तः तत्र शुद्धस्वात्मनि लयः श्लेषस्तल्लयस्तन्मयीभावस्तेन अपास्ता निराकृता चिन्ता संकल्पश्चित्तं वा मनो यस्य स तथोक्तः। किं कुर्वन्, भावयन्। कं, शुद्धं राग-द्वेषमोहरहितं स्वात्मानं निजचिद्रूपं। कया, स्वसंविदा स्वसंवेदनेन। किं कृत्वा, गृहीत्वा निश्चित्य। केन, श्रुतेन 'एगो मे सासदो आदा' इत्यादिश्रुतज्ञानेन। मृत्वैहीत्यत्र ओमाङोरित्यनेन पररूपं। उक्तं च—क्षेत्रे पात्रे द्रे ज्ञातव्ये। आराधनोपयुक्तः सन् सम्यक्कालं विधाय च। उत्कर्षात्त्रीन्भवान्नीत्वा प्रयाति परिनिर्वृतिम् ॥ ९२ ॥

उक्तमेवार्थं परमार्थसंन्यासोपदेशद्वारेण समर्थयते—

संन्यासो निश्चयेनोक्तः स हि निश्चयवादिभिः ।
यः स्वस्वभावे विन्यासो निर्विकल्पस्य योगिनः ॥ ९३ ॥

टीका—हि यस्मान्निश्चयवादिभिर्व्यवहारनयसापेक्षनिश्चयनयप्रयोगचतुरैः सूरिभिर्निश्चयेन परमार्थेन स संन्यास उक्तः मुमुक्षूणामग्रे प्ररूपितः। यः किं, यो विन्यासो विधिपूर्वकमात्मनः स्थापनं। क्व, स्वस्वभावे शुद्धचिदानन्द-मये स्वात्मनि। कस्य, योगिनः समाधिमतः। किंविशिष्टस्य, निर्विकल्पस्य अन्तर्जल्पसंपृक्तोत्प्रेक्षाजालनिष्क्रान्तस्य ॥ ९३ ॥

परिषहादिना विक्षिप्यमाणचित्तस्य क्षपकस्य निर्यापकाचार्यः किं कुर्यादित्याह—

परीषहोऽथवा कश्चिदुपसर्गो यदा मनः ।
क्षपकस्य क्षिपेज्ज्ञानसारैः प्रत्याहरेत्तदा ॥ ९४ ॥

टीका—यदा यस्मिन्काले क्षिपेद्यत्र तत्र भ्रमयेत्। कोऽसौ, कश्चित् कोऽपि क्षुदादीनामन्यतमः परिषहोऽथवा कश्चिदचेतनकृतादीनामन्यतम उपसर्गो वा। किं तत्, मनः। कस्य, आराधकस्य। तदा प्रत्याहरेत् व्यावर्तयेत् शुद्ध-स्वात्मोन्मुखं तत्कुर्यादाचार्यः। कैः, ज्ञानसारैः श्रुतज्ञानरहस्योपदेशैः ॥ ९४ ॥

ज्ञानसारैरित्येतत् प्रपंचयितुमुत्तरप्रबन्धमाह—

दुःखाग्निकीलैराभीलैर्नरकादिगतिष्वहो ।
तप्तस्त्वमङ्गसंयोगात् ज्ञानामृतसरोऽविशन् ॥ ९५ ॥

टीका—अहो भावकप्रवेक तप्तः संततस्त्वं । कैः, दुःखाग्निकीलैः शारीरमानसाशान्तदहनज्वालाभिः । किंविशिष्टैः, आभीलैः कष्टैः प्रतिकर्तुमशक्यैरित्यर्थः । कासु, नरकादिगतिषु नारकतिर्यङ्मनुष्यदेवभवग्रहणेषु । कस्माद्, अंगसंयोगात् शरीरसंश्लेषात्, शरीरमात्मबुद्ध्याध्यवस्यन्नित्यर्थः । किं कुर्वन्, अविशन् अप्रविशन् अनवगाहमानः । किं तत्, ज्ञानामृतसरः अन्यच्छरीरमन्योऽहमित्यादिभेदोपलम्भपीयूषतडागम् ॥ ९५ ॥

इदानीमुपलब्धात्मदेहभेदाय साधुभिः ।
सदाऽनुगृह्यमाणाय दुःखं ते प्रभवेत्कथम् ॥ ९६ ॥

टीका—इदानीं सम्प्रति । कथं प्रभवेत् । किं तत्, दुःखं । कस्मै, ते तुभ्यं । केनापि प्रकारेण त्वामभिभवितुं परिषहादिदुःखं न शक्नुयादित्यर्थः । किंविशिष्टाय ते, उपलब्धात्मदेहभेदाय निश्चितस्वात्मशरीरव्यतिरेकाय । पुनः किंविशिष्टाय, अनुगृह्यमाणाय उपक्रियमाणाय । कैः, साधुभिः संयतैः । कथं, सदा नित्यम् ॥ ९६ ॥

दुःखं संकल्पयन्ते ते समारोप्य वपुर्जडाः ।
स्वतो वपुः पृथक्कृत्य भेदज्ञाः सुखमासते ॥ ९७ ॥

टीका—संकल्पयन्ते ममेदमिति व्यवस्यन्ति । के, ते जडा बहिरात्मानः । किं तत्, दुःखं अहं दुखवानस्मीति प्रतिपद्यन्त इत्यर्थः । किं कृत्वा, समारोप्य सन्मुखं योजयित्वा । किं तद्, वपुः शरीरं । क, स्वे आत्मनि स्वदेहं स्वात्मतया निश्चित्येत्यर्थः । भेदज्ञा आत्मशरीरविवेकविदः । पुनरासते तिष्ठति । कथं, सुखं स्वात्मदर्शनोत्थमानन्दमनुभवन्तीत्यर्थः । किं कृत्वा, पृथक्कृत्य भेदेनाध्यवसाय्य । किं तद्, वपुः । कस्मात्, स्वतः शरीरमात्मनो भिन्नं

निश्चित्य। तद्भेदभावना यथा-न मे मृत्युः कुतो भीतिर्न मे व्याधिः कुतो व्यथा। नाहं बालो न वृद्धोहं न युवैतानि पुद्गले॥ जीवोन्यः पुद्गलश्चान्य इत्यादि॥ ९७॥

परायत्तेन दुःखानि बाढं सोढानि संसृतौ।
त्वयाऽद्य स्ववशः किञ्चित् सहेच्छन्निर्जरां पराम्॥ ९८॥

टीका—त्वया समाधिसाधनोद्यतेन भवता बाढमत्यर्थं सोढानि अनुभूतानि कानि, दुःखानि। क्व, संसृतौ अनादिसंसारे। किंविशिष्टेन सता, परायत्तेन परवशेन। अद्य सम्प्रति प्रत्यासन्नमृत्युसमये सह साम्यभावनयाऽनुभव। कानि, दुःखानि। कथं, किंचित् स्तोकं अल्पकालं। किंविशिष्टः सन्, स्ववशः स्वाधीनः। किं कुर्वन्, इच्छन् वांछन् निर्जरामशुभकर्मक्षयं। किंविशिष्टां, परां उत्कृष्टामन्त्यां वा अलब्धपूर्वां संवरसहभाविनीम्॥ ९८॥

यावद् गृहीतसंन्यासः स्वं ध्यायन् संस्तरे वसेः।
तावन्निहन्याः कर्माणि प्रचुराणि क्षणे क्षणे॥ ९९॥

टीका—यावत् यावन्तं कालं, गृहीतसंन्यासः प्रतिपन्नभक्तप्रत्याख्यानस्त्वं स्वमात्मानं ध्यायन्नेकाग्रतया चिन्तयन् संस्तरे प्रस्तरे वसेस्तिष्ठेस्तावत् तावन्तं कालं क्षणे क्षणे प्रचुराणि कर्माणि निहन्या नियतमवश्यं क्षपयेः।९९।

पुरुप्रायान् बुभुक्षादिपरीषहजये स्मर।
घोरोपसर्गसहने शिवभूतिपुरःसरान्॥ १००॥

टीका—किं च बुभुक्षादिपरीषहजये कर्तव्ये स्मर चिन्तय त्वं। कान्, पुरुप्रायान् वृषभदेवादीन्। तथा घोरोपसर्गसहने कर्तव्ये शिवभूतिप्रभृतीन् स्मर॥ १००॥

अचेतनकृतोपसर्गसहने दृष्टान्तः-

तृणपूलबृहत्पुञ्जे संक्षोभ्योपरि पातिते।
वायुभिः शिवभूतिः स्वं ध्यात्वाऽभूदाशु केवली॥ १०१॥

टीका—अभूत्सम्पन्नः। कोऽसौ, शिवभूतिः शिवभूतिसंज्ञो मुनिः। किंविशिष्टः, केवली केवलज्ञानी। कथं, आशु सद्यः। किं कृत्वा, ध्यात्वा प्रणिधाय। कं, स्वमात्मानं। क्व सति, तृणपूलबृहत्पुञ्जे लोके गंजी इति प्रसिद्धे। किंविशिष्टे, पातिते। कैः, वायुभिः। क्व, उपरि उपरिष्टात्। किं कृत्वा, संक्षोभ्य समन्तादितस्ततः क्षोभयित्वा संचाल्य॥ १०१॥

मनुष्यकृतोपसर्गसहनोपाख्यानमिदम्—

न्यस्य भूषाधियाङ्गेषु संतप्ता लोहशृङ्खलाः।
द्विट्पक्ष्यैः कीलितपदाः सिद्धा ध्यानेन पाण्डवाः॥ १०२॥

टीका—सिद्धाः परममुक्तिं गताः। के, ते पाण्डवाः साक्षाद्युधिष्ठिरभीमसेनार्जुनास्त्रयः सिद्धाः। कुलसहदेवौ त्वसाक्षात् सर्वार्थसिद्ध्यादिजन्मनोः व्यवधानात्। केन, ध्यानेन शुद्धस्वात्मप्रसंख्यानेन। किंविशिष्टाः सन्तः, कीलितपदाः लोहकीलकैर्भूम्या सह यंत्रितपादाः। कैः, द्विट्पक्ष्यैः द्विषां कौरवाणां पक्षे भवैः तद्भागिनेयादिभिः। किं कृत्वा, न्यस्य निक्षिप्य। काः, लोहशृङ्खलाः। किंविशिष्टाः, तप्ता ज्वलज्ज्वालीकृताः। केषु, अङ्गेषु पाण्डवानां कण्ठादिप्रदेशेषु। कया, भूषाधिया भूषणकल्पनया। युष्मान् हेमाभरणानीमानि परिदापयाम इति कथयित्वेत्यर्थः॥ १०२॥

तिर्यक्कृतोपसर्गसहनोदाहरणमिदम्—

शिरीषसुकुमाराङ्गः खाद्यमानोतिनिर्दयम्।
शृगाल्या सुकुमारोसून् विससर्ज न सत्पथम्॥ १०३॥

टीका—विससर्ज त्यक्तवान्। कोऽसौ, सुकुमारः सुकुमारस्वामी। कान्, असून प्राणान् न पुनः सत्पथं शुद्धस्वात्मध्यानरूपं सिद्ध्युपायं विससर्ज। किं क्रियमाणः, खाद्यमानो भक्ष्यमाणः। कया, शृगाल्या जम्बुकस्त्रिया। कथम्, अतिनिर्दयं प्रकामनिष्कृपं। किंविशिष्टः सन्, शिरीषसुकुमाराङ्गः शिरीषकुसुमसमानकोमलकायः॥ १०३॥

सुरकृतोपसर्गसहने निदर्शनमिदम्—

तीव्रदुःखैरतिक्रुद्धभूतारब्धैरितस्ततः ।
भग्नेषु मुनिषु प्राणानौज्झद्विद्युच्चरः स्वयुक् ॥ १०४ ॥

टीका—औज्झत्त्यजति स्म । कोऽसौ, विद्युच्चरः । कान्, प्राणान् । किंविशिष्टः सन्, स्वयुक् आत्मानं समादधानः । केषु सत्सु, मुनिषु तपोधनेषु । किंविशिष्टेषु, भग्नेषु प्रपलायितेषु । क्व, इतस्ततः यत्र तत्र । कैः, तीव्रदुःखैः नितान्तासह्यबाधाभिः । किंविशिष्टैः, अतिक्रुद्धभूतारब्धैः अत्यन्तकुपिताधमव्यन्तरोपक्रान्तैः ॥ १०४ ॥

अचेन्नृतिर्यग्देवोपसृष्टासंक्लिष्टमानसाः ।
सुसत्त्वा बहवोऽन्येऽपि किल स्वार्थमसाधयन् ॥ १०५ ॥

टीका—किल आगमे एवं श्रूयते । सुसत्त्वा महासात्त्विका अन्येऽपि शिवभूत्यादिभ्योऽपरेपि, बहवो भूयांसः, स्वार्थं पुरुषार्थं प्रकरणान्मोक्षलक्षणमसाधयन् निष्पादितवन्तः । कथम्भूता भूत्वा, अचेदित्यादि । अचेतोऽचेतनाः पृथिव्यादयः, नरो मनुष्याः, तिर्यञ्चो तैर्यग्योना, देवाः सुराः अचेतश्च नरश्च तिर्यञ्चश्च देवाश्च अचेन्नृतिर्यग्देवास्तैरुपसृष्टाः कृतोपसर्गास्ते च ते असंक्लिष्टमानसाश्च रागद्वेषमोहानाविष्टचेतसः शुद्धस्वात्मध्यानपरिणताः अचेन्नृतिर्यग्देवोपसृष्टासंक्लिष्टमानसाः ॥ १०५ ॥

तत् त्वमप्यङ्ग सङ्गत्य निःसङ्गेन निजात्मना ।
त्यजाङ्गमन्यथा भूरिभवक्लेशैर्ग्लपिष्यसे ॥ १०६ ॥

टीका—अंग अहो महात्मन् । यत एवं महानुभावैर्मुमुक्षुभिर्भगवच्छिवभूतिप्रभृतिभिरत्यन्तविनिपातोपनिपातेऽपि स्वार्थः साधितस्ततस्मात्त्वमपि भवानपि त्यज मुञ्च । किं तत्, अङ्गं देहं । किं कृत्वा, सङ्गत्य संयुज्य । केन सह, निजात्मना आत्मीयेन नित्येन वा चिद्रूपेण । किंविशिष्टेन, निःसङ्गेन कर्मविविक्तेन । अन्यथा अन्येन संक्लेशावेशप्रकारेण अङ्गत्यागे ग्लपिष्यसे

विक्लवीकरिष्यसे त्वं। कैः कर्तृभिः, भूरिभवक्लेशैः प्रचुरसंसारदुःखैः । उक्तंच ' विराद्धे मरणे देव दुर्गतिर्दूरबोदिता । अनन्तश्चापि संसारः पुनरप्यागमिष्यति ' ॥ १०६ ॥

श्रद्धा स्वात्मैव शुद्धः प्रमदवपुरुपादेय इत्याञ्जसी दृक् ।
तस्यैव स्वानुभूत्या पृथगनुभवनं विग्रहादेश्च संवित् ॥
तत्रैवात्यन्ततृप्त्या मनसि लयमितेऽवस्थितिः स्वस्य चर्या ।
स्वात्मानं भेदरत्नत्रयपरपरमं तन्मयं विद्धि शुद्धम् ॥ १०७ ॥

टीका–किं च उपदिश्यते सद्गुरुभिः। कासौ, दृक् दृष्टिः । किंविशिष्टा, आंजसी पारमार्थिकी । किं, श्रद्धा अभिनिवेशः । कथं, भवति । कोऽसौ, स्वात्मैव न परात्मा । किंविशिष्टः, शुद्धो द्रव्यभावकर्मरहितः । पुनः किंविशिष्टः, प्रमदवपुरानन्दरूपः । किंविशिष्टो भवति, उपादेयो मुमुक्षूणामुपेयः । इत्येवंरूपा श्रद्धैव निश्चयसम्यक्त्वमाख्यायते । तथा संविदांजसी निश्चयज्ञानं सद्गुरुभिरुपदिश्यते । किं, अनुभवनमनुभूतिः । कस्य, तस्यैव शुद्धप्रमदवपुस्त्वेनोपादीयमानस्य स्वात्मन एव । कथं, पृथग् भेदेन । कस्माद्, विग्रहादेः कायवाङ्मनसत्रयात् । कया, स्वानुभूत्त्या स्वसंवित्त्या । तथा सद्गुरुभिराञ्जसी चर्या निश्चयचारित्रं चोपदिश्यते । किं, अवस्थितिरवस्थानं। कस्य, स्वस्यात्मनः । क्व, तत्रैव तथाप्रतीयमानेऽनुभूयमाने स्वात्मन्येव । क्व सति, मनस्यन्तःकरणे । किंविशिष्टे, इते गते प्राप्ते । कं, लयं तन्मयीभावं । क्व, तत्रैव। कया, अत्यन्ततृप्त्या अतिमात्रवैतृष्ण्येन । उक्तं च–दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यते बोधः । स्थितिरात्मनि चारित्रं कुत एतेभ्यो भवति बन्धः ॥ १ ॥ तन्मयं तेन निश्चयरत्नत्रयेण निर्वृत्तं तदात्मकं स्वात्मानं, परमं शुद्धं परमप्रकर्षशुद्धिप्राप्तं । अहो भेदरत्नत्रयपर व्यवहाररत्नत्रयप्रधान आराधकोत्तम विद्धि जानीहि संवेदय ॥ १०७ ॥

मुहुरिच्छामणुशोऽपि प्रणिहत्य श्रुतपरां श्रुतद्रव्ये ।
स्वात्मनि यदि निर्विघ्नं प्रतपसि तदसि ध्रुवं तपसि ॥१०८॥

टीका—तथा यदि चेत् प्रतपसि दीप्यसे त्वं । क, स्वात्मनि । कथं, निर्विघ्नं निष्प्रत्यूहं । किं कृत्वा, प्रणिहत्य प्रकर्षेण नियतं हत्वा । कां, इच्छां कांक्षां । क, परद्रव्ये पुद्गलादौ । किंविशिष्टां, अणुशोऽपि स्वल्पामपि । किंविशिष्टः सन्, मुहुरसकृत् श्रुतपरः श्रुतज्ञानभावनापरिणतो भवन्नित्यर्थः । तदा ध्रुवं निश्चितं तपसि अव्याहतं स्फुरसि त्वं । क, तपसि तपःसंज्ञे साक्षान्मोक्षोपाये । आभ्यां निश्चयाराधनाचातुर्विध्यमुपदिष्टं प्रतिपत्तव्यं ॥ १०८ ॥

इदानीं व्यवहारेतराराधनासाध्यमानपरमानन्दलाभाविष्करणलक्षणेनाशीर्वाददानेन क्षपकं निर्यापकाचार्यः प्रोल्लासयन्नाह—

नैराश्यारब्धनैःसंग्यसिद्धसाम्यपरिग्रहः ।
निरुपाधिसमाधिस्थः पिबानन्दसुधारसम् ॥ १०९ ॥

टीका—भोः सुविहितशिरोरत्न । पिब उपयुंक्ष्व त्वं । कं, आनन्दसुधारसं प्रमोदपीयूषनिर्यासं । किंविशिष्टः सन्, निरुपाधिसमाधिस्थः निरुपाधिर्निर्विशेषो ध्यातृध्यानध्येयविकल्पशून्यः समाधिर्योगो निरुपाधिसमाधिस्तत्र स्थितः । कथम्भूतो भूत्वा, नैराश्येत्यादि । नैराश्येन जीवितधनाद्याकांक्षानिग्रहेणारब्धमुपक्रान्तं नैस्संग्यं बहिरङ्गान्तरङ्गपरिग्रहनिष्क्रान्तत्वं तेन सिद्धो निष्पन्नः साम्यपरिग्रहः परमसामायिकस्वीकारो यस्य स तथोक्तः ॥ १०९ ॥

साम्प्रतमध्यायार्थमशेषमुपसंगृह्णन्नाराधकस्याराधनासहितमरणफलविशेषमुपदिशति——

संलिख्येति वपुः कषायवदलङ्कर्मीणनिर्यापक-
न्यस्तात्मा श्रमणस्तदेव कलयंल्लिंगं तदीयं परः ।
सद्रत्नत्रयभावनापरिणतः प्राणान् शिवाशाधर-
स्त्यक्त्वा पञ्चनमस्क्रियास्मृति शिवी स्यादष्टजन्मान्तरे ॥११०॥

टीका—शिवी स्यादशिवः शिवः सम्पद्यते परममुक्तो भवेदित्यर्थः । कोसौ, शिवाशाधरः मोक्षायाभिलाषभृन्मुमुक्षुरित्यर्थः । किं कृत्वा, त्यक्त्वा । कान्, प्राणान् । किंविशिष्टः सन्, सदित्यादि । सत्या यथागुणस्थानं सम्भवन्त्या रत्नत्रयभावनया निश्चयरत्नत्रयाभ्यासेन परिणतो योगी चरमसमयवर्ती समुच्छिन्नक्रियाप्रतिपातिशुक्लध्यानारूढः । किं कुर्वन्, कलयन् धारयन् । किं तत्, लिङ्गं जिनरूपतां । किं, तदेव पूर्वगृहीतमौत्सर्गिकमेव । किमाख्योसौ, श्रमणः श्रमण इति व्यपदेशभाक् । कथंभूतो भूत्वा, अलंकर्मीणनिर्यापकन्यस्तात्मा कर्मणे प्रकृतत्वात्संसारार्णवनिस्तारणलक्षणाय अलं समर्थोलंकर्मीणः निर्यापको व्यवहारेण सुस्थिताचार्यो निश्चयेन तु शुद्धस्वात्मानुभूतिपरिणामोन्मुख आत्मैव तस्यैव दुःखाद् दुःखहेतोर्वात्मनो निष्कासकत्वोपपत्तेः । यदाह—स्वस्मिन्सदभिलाषित्वादभीष्टज्ञायकत्वतः । स्वयं हितप्रयोक्तृत्वादात्मैव गुरुरात्मनः ॥ १ ॥ अलंकर्मीणश्चासौ निर्यापकश्च अलंकर्मीणनिर्यापकस्तत्र न्यस्तो निक्षिप्तः समर्पित आत्मा येन स तथोक्तः । किं कृत्वा, संलिख्य सम्यक् कृशीकृत्य । किं तत्, वपुः, शरीरं । किंवत्, कषायवत् कषायान् शरीरं च बाह्याभ्यंतरतपोभिस्तनूकृत्य । कथं, इत्येवमुक्तप्रकारेण । एतदुत्कृष्टाराधनापक्षे व्याख्यानं ॥ मध्यमाराधनापक्षे संप्रति व्याख्यायते-श्रमणोनगारः शिवाशाधरो मुमुक्षुः सन् तदेव लिङ्गमाचेलक्यादिचतुर्विकल्पं कलयन् सत्यां समीचीनायां संवरसहभाविपापकर्मनिर्जरासमर्थायां रत्नत्रयभावनायां सम्यग्दर्शनादिरत्नत्रयाभ्यासे परिणत उपयुक्तः सन् प्राणांस्त्यक्त्वा शिवी स्यात् शिवमत्रेंद्रादिपदप्राप्तिलक्षणोभ्युदयः । शिवमस्यास्तीति शिवी अर्श आदेरित्यनेन मत्त्वर्थीयः अः प्रत्ययः । शेषं पूर्ववद् व्याख्येयं ॥ ऐदंयुगीनापेक्षया जघन्याराधनापक्षे तदेवेत्थं व्याख्येयं—श्रमणः प्राग्व्याख्यातार्थविशेषणविशिष्टः पंचनमस्क्रियायां पंचनमस्कारे स्मृतिः चिंता उच्चारणं यत्र तत्पंचनमस्क्रियास्मृति यथा भवत्येवं प्राणांस्त्यक्त्वा शिवी स्यात् । क्व, अष्टजन्मांतरे अष्टानां भवानां

मध्ये उत्कृष्टमध्यमजघन्याराधनानुभवादत्र विभागः कर्तव्यः । तथा चागमः । कालाइं अहिऊण च्छित्तूणं अट्ठकम्मसंखलयं । केवलणाणपहाणा केई सिज्झंति तम्मि भवे ॥१॥ आराहिऊण केई चउव्विहाराहणावि जं सारं । उव्वरियसेसपुण्णो सव्वट्ठणिवासिणो होंति ॥२॥ जेसिं होज्ज जहण्णा चउव्विहाराहणा हु भवियाणं । सत्तट्ठभवे गंतुं ते विय पावंति णिव्वाणं ॥ ३ ॥ अपि च—येपि जघन्या तेजोलेश्यामाराधनामुपनयंति । तेपि च सौधर्मादिषु भवंति देवाः सुकल्पस्थाः ॥ १ ॥ अथवा—ध्यानाभ्यासप्रकर्षेण त्रुट्यन्मोहस्य योगिनः । चरमांगस्य मुक्तिः स्यात्तदैवान्यस्य च क्रमात् ॥ १ ॥ तथा ह्यचरमांगस्य ध्यानमभ्यस्यतः सदा । निर्जरा संवरश्च स्यात्सकलाशुभकर्मणां ॥ २ ॥ आस्रवंति च पुण्यानि प्रचुराणि प्रतिक्षणं । यैर्महर्द्धिर्भवत्येष त्रिदशः कल्पवासिषु ॥ ३ ॥ तत्र सर्वेन्द्रियाह्लादि मनसः प्रीणनं परं ॥ सुखामृतं पिबन्नास्ते सुचिरं सुरसेवितः ॥ ४ ॥ ततोवतीर्य मर्त्येपि चक्रवर्त्यादिसंपदः । चिरं भुक्त्वा स्वयं मुक्त्वा दीक्षां दैगंबरीं श्रितः ॥५॥ वज्रकायः स हि ध्यात्वा शुक्लध्यानं चतुर्विधं । विधूयाष्ट च कर्माणि श्रयते मोक्षसंपदम् ॥ ६ ॥ तदेतच्छ्रमणधर्मधारिणः प्रति फलमुपदिष्टं, तदितरान् प्रति पुनरिदमुपदिश्यते। तदीयं पर इत्यस्य व्याख्यानेन परः श्रावकोन्यो वा सद्दृष्टिस्तदीयं श्रमणसंबंधि लिंगं कलयन् पंचनमस्क्रियास्मृति प्राणांस्त्यक्त्वा शिवी स्यादिति संबधः । शेषं पूर्ववत् यथास्वं विकल्प्य व्याख्येयं ॥ यत् स्वामी—खरपानहापनामपि कृत्वा कृत्वोपवासमपि शक्त्या । पंचनमस्कारमनास्तनु त्यजेत्सर्वयत्नेन ॥ इति भद्रम् ॥ ११० ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मटीकायां
भव्यकुमुदचन्द्रिकासंज्ञायामादितः सप्तदशः
प्रक्रमोऽष्टमोऽध्यायः समाप्तः ॥ ८ ॥

अथ प्रशस्तिः ।

श्रीमानस्ति सपादलक्षविषयः शाकंभरीभूषण-
स्तत्र श्रीरतिधाम मण्डलकरं नामास्ति दुर्गं महत् ।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरवालान्वया-
च्छ्रीसल्लक्षणतो जिनेन्द्रसमयश्रद्धालुराशाधरः ॥ १ ॥

श्रीमान त्रिवर्गसंपत्तियुक्तः । शाकंभरी लवणाकरविशेषः । श्रीरतिधाम लक्ष्मीक्रीडागृहं श्रीरत्न्यां रत्नीति कविमातुः संज्ञा । उदपादि उत्पन्नः ॥१॥

सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत् ॥
यः पुत्रं छाहडं गुण्यं रञ्जितार्जुनभूपतिम् ॥ २ ॥

व्याघ्रेरवालवरवंशसरोजहंसः काव्यामृतौघरसपानसुतृप्तगात्रः ।
सल्लक्षणस्य तनयो नयविश्वचक्षुराशाधरो विजयतां कलिकालिदासः ३

स्पष्टं ।

इत्युदयसेनमुनिना कविसुहृदा योभिनन्दितः प्रीत्या ।
प्रज्ञापुञ्जोसीति च योभिमतो मदनकीर्तियतिपतिना ४ स्पष्टं ।

म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-
त्रासाद्विन्ध्यनरेन्द्रदोःपरिमलस्फूर्जत्त्रिवर्गौजसि ।
प्राप्तो मालवमण्डले बहुपरीवारः पुरीमावसन्
यो धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरतः ॥ ५ ॥

म्लेच्छेशेन साहिवुदीनतुरुष्कराजेन । सुवृत्तक्षतिः सदाचारनाशः । दोः-परिमलः परिमलो लक्षणावृत्त्या बलं बाहुबलातिशय इत्यर्थः । ओज उत्साहोऽन्तःसारो वा । जिनप्रमितिवाक्शास्त्रे जैनेंद्रप्रमाणशास्त्रे जैनेंद्रव्याकरणं च । महावीरतः वादिराजपण्डितश्रीमद्धरसेनशिष्यात्पण्डितमहावीरात् ॥ ५ ॥

आशाधरत्वं मयि विद्धि सिद्धं निसर्गसौदर्यमजर्यमार्य ।
सरस्वतीपुत्रतया यदेतदर्थे परं वाच्यमयं प्रपञ्चः ॥ ६ ॥

अजर्यं मैत्रीं सरस्वतीपुत्रतया निसर्गसौदर्यं प्रकृत्या सहोदरत्वं ॥ ६ ॥

इत्युपश्लोकितो विद्वद्भिल्हणेन कवीशिना ।
श्रीविन्ध्यभूपतिमहासान्धिविग्रहिकेण यः ॥ ७॥

इति उपश्लोकितः श्लोकेनोपस्तुतः । श्रीविंध्यभूपतिः विजयवर्मा नाम मालवाधिपतिः ॥ ७ ॥

श्रीमदर्जुनभूपालराज्ये श्रावकसंकुले ।
जिनधर्मोदयार्थं यो नलकच्छपुरेऽवसत ॥ ८ ॥ स्पष्टं ।

यो द्राग्व्याकरणाब्धिपारमनयच्छुश्रूषमाणान्न कान्
सत्तर्कीपरमास्त्रमाप्य न यतः प्रत्यर्थिनः केऽक्षिपन् ।
चेरुः केऽस्खलितं न येन जिनवाग्दीपं पथि ग्राहिताः
पीत्वा काव्यसुधां यतश्च रसिकेष्वापुः प्रतिष्ठां न के ॥९॥

कान्, पंडितदेवचंद्रादीन् प्रत्यर्थिनः प्रतिवादिनः । के, वादींद्रविशालकीर्त्यादयः अक्षिपन् जयंति स्म । चेरुः प्रवृत्ताः । के, भट्टारकदेवविनयभद्रादयः । अस्खलितं निरतिचारं । जिनवाक् अर्हत्प्रवचनं । पथि मोक्षमार्गे ग्राहिताः स्वीकारिताः । रसिकेषु सहृदयविदग्धेषु मध्ये । आपुः प्राप्ताः । के, बालसरस्वतीमहाकविमदनादयः ॥ ९ ॥

स्याद्वादविद्याविशदप्रसादः प्रमेयरत्नाकरनामधेयः ।
तर्कप्रबन्धो निरवद्यविद्यापीयूषपूरो वहति स्म यस्मात् ॥१०॥

सिद्ध्यङ्कं भरतेश्वराभ्युदयसत्काव्यं निबन्धोज्ज्वलं
यस्त्रैविद्यकवीन्द्रमोहनमयं स्वश्रेयसेऽरीरचत् ।
योऽर्हद्वाक्यरसं निबन्धरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानन्दसान्द्रे हृदि ॥ ११ ॥

सिद्ध्यंकं सिद्धिः सिद्धशब्दोऽङ्कश्चिन्हं सर्गप्रांतवृत्तेषु यस्य तत् । निबंधोज्ज्वलं स्वयंकृतनिबंधनेन स्फुटप्रतिभासं । अरीरचत् रचयति स्म । अर्हद्वा-

त्र्यरसं जिनागमनिर्यासभूतं निबंधरुचिरं । स्वयंकृतज्ञानदीपिकाख्यपंजिकया रमणीयं धर्मामृतं धर्मामृताख्यं न्यदधात् स्थापयति स्म ॥ ११ ॥

आयुर्वेदविदामिष्टां व्यक्तं वाग्भटसंहिताम् ।
अष्टाङ्गहृदयोद्द्योतं निबन्धमसृजच्च यः ॥ १२ ॥

व्यक्तुं प्रकटीकर्तुं । वाग्भटसंहितां अष्टांगहृदयनाम्नीं ॥ १२ ॥

यो मूलाराधनेष्टोपदेशादिषु निबन्धनम् ॥
व्यधत्तामरकोशे च क्रियाकलापमुज्जगौ ॥ १३ ॥

आदिः आराधनासारभूपालचतुर्विंशतिस्तवनाद्यर्थः । उज्जगौ उत्कृष्टं कृतवान् ॥ १३ ॥

रौद्रटस्य व्यधात्काव्यालङ्कारस्य निबन्धनम् ।
सहस्रनामस्तवनं सनिबन्धं च योऽर्हताम् ॥ १४ ॥

रौद्रटस्य रुद्रटाचार्यकृतस्य । अर्हतां अनंतजिनानां ॥ १४ ॥

सनिबन्धं यश्च जिनयज्ञकल्पमरीरचत् ।
त्रिषष्टिस्मृतिशास्त्रं यो निबन्धालंकृतं व्यधात् ॥ १५ ॥

सनिबन्धं स्वयंकृतेन जिनयज्ञकल्पदीपकाख्येन निबन्धेन सहितं जिनयज्ञकल्पं जिनयज्ञकल्पाख्यं जिनप्रतिष्ठाशास्त्रं अरीरचत् निर्मितवान् । त्रिषष्टिस्मृतिशास्त्रं आर्षमहापुराणशास्त्रोद्धृतत्रिषष्टिशलाकापुरुषवृत्तगोचरं त्रिषष्टिस्मृतिसंज्ञं संक्षिप्तशास्त्रं । निबन्धालङ्कृतं स्वयंकृतनिबन्धेन भूषितं ॥ १५ ॥

योऽर्हन्महाभिषेकार्चाविधिं मोहतमोरविम् ।
चक्रे नित्यमहोद्द्योतं स्नानशास्त्रं जिनेशिनाम् ॥ १६ ॥

नित्यमहोद्योतं नित्यमहोद्योताख्यं ॥ १६ ॥

रत्नत्रयविधानस्य पूजामाहात्म्यवर्णनम ।
रत्नत्रयविधानाख्यं शास्त्रं वितनुते स्म यः ॥ १७ ॥
सोऽहमाशाधरो रम्यामेतां टीकां व्यरीरचम् ।
धर्मामृतोक्तसागारधर्माष्टाध्यायगोचराम् ॥ १८ ॥

धर्मामृतोक्ताः स्वकृतधर्मामृताख्यशास्त्रे निगदिताः ॥ १८ ॥

प्रमारवंशवार्धीन्दुदेवपालनृपात्मजे ।
श्रीमज्जैतुगिदेवेऽसिस्थेम्नाऽवन्तीमवत्यलम् ॥ १९ ॥

असिस्थेम्ना खड्गजलेन अवति रक्षति सति॥ १९ ॥

नलकच्छपुरे श्रीमन्नेमिचैत्यालयेसिधत् ।
टीकेयं भव्यकुमुदचन्द्रिकेत्युदिता बुधैः ॥ २० ॥

असिधत् सिद्धा ॥ २० ॥

षण्णवद्व्येकसंख्यानविक्रमाङ्कसमात्यये ।
सप्तम्यामसिते पौषे सिद्धेयं नन्दताच्चिरम् ॥ २१ ॥

समाः संवत्सराः १२९६ वर्षे पौषवदि सप्तमी तत्र दिने इत्यर्थः ॥२१

श्रीमान् श्रेष्ठिसमुद्धरस्य तनयः श्रीपौरपाटान्वय-
व्योमेन्दुः सुकृतेन नन्दतु महीचन्द्रो यदभ्यर्थनात् ।
चक्रे श्रावकधर्मदीपकमिमं ग्रन्थं बुधाशाधरो
ग्रन्थस्यास्य च लेखितो मलभिदे येनादिमः पुस्तकः ॥२२॥

स्पष्टं अलमतिप्रसङ्गेन ॥ २२ ॥

यावत्तिष्ठति शासनं जिनपतेश्छिद्रानमन्तस्तमो
यावच्चार्कनिशाकरौ प्रकुरुतः पुंसां दृशामुत्सवम् ।
तावत्तिष्ठतु धर्मसूरिभिरियं व्याख्यायमानाऽनिशं
भव्यानां पुरतोऽत्र देशविरताचारप्रचारोद्धुरा[1] ॥ २३ ॥

इत्याशाधरविरचिता स्वोपज्ञधर्मामृतसागारधर्मटीका
भव्यकुमुदचन्द्रिकानाम्नी समाप्ता ।

ग्रंथसंख्या ।

अनुष्टुपछन्दसां पञ्चशताग्राणि सतां मता ।
सहस्राण्यस्य चत्वारि ग्रन्थस्य प्रमितिः किल ॥ २४ ॥

अङ्कात्मतो ग्रन्थप्रमाणं ४५०० । शुभं भवतु लेखकपाठकयोः ॥२४

॥ समाप्तोऽयं ग्रंथः ॥

१—प्रबोधोद्धुरा इति च पाठः ।